
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

श्री. के. बापूजी साधु स. ७

58

॥श्रीगुरुभ्योनमः॥

॥अथसुश्लोकराघवटीकाप्रारंभः॥

Acc. No. ~~2758~~ M-1544
Title - सुश्लोकराघवटीका.

Author - ?
Date - ?
Subject - काव्य ३.

folio - 107.
Xerox - 214

॥ श्रीगुरुगणेशशारदामुकुंदराजाय नमः ॥ पूर्णकामं गुणग्रामं विश्रा
मं कामविद्विषः ॥ कामाभिरामं श्रीरामं मेघश्यामं नमाम्यहं ॥ १ ॥ वशीकरो
ति सद्भिक्षि यस्मात्स्फुश्लोकलाघवं ॥ अतस्तल्लाभिकां [illegible]टीकां कुर्वे
वृंदनोरमां ॥ २ ॥ इह खलु कश्चित् पंतविठ्ठलाख्यः कविवृंदानां चित्त
चमत्कारविभावनादिमिषेण भगवदेकनिष्ठतामापादयिषुः कंचन
स्फुश्लोकलाघवनामानं प्रबंधं प्रारभ्य मानाशिष्टाचारप्राप्तं निर्विघ्नमपि
मंगलमाचरति ॥ तत्र वस्तुनिर्देशरूपमाह ॥ अलंकृतीति ॥ अलंका
रभूषितः । अलंकारशास्त्रेति व्याप्तश्च ॥ देवसमाजरक्षणे । स्फुशृं
गारादिरसविभावनेच ॥ खरदूषणं ॥ प्रखरदूषणं ॥ रलयोः सावर्ण्या
त्खलवत्कृतदूषणं वा ॥ तन्मायामौ राक्षसौ च ॥ वृत्तं ॥ चरित्रं ॥ शार्दू
लविक्रीडितादिच ॥ गुणो दयादाक्षिण्यादि ॥ कांसादिश्च ॥ कोमल
क्षणेप्रसिद्धः ॥ श्लोकः ॥ कीर्तिः ॥ पद्यंच ॥ १ ॥ नमस्क्रियारूपमाह ॥
द्वाभ्यां ॥ प्रथमेति ॥ लक्ष्मीविनोदकरं ॥ बिंदुजालकाविभाविशुंठं ॥

पयकं बिंदुजालकमित्यपरः ॥ पयोस्त्रीपयके व्यूह इति देदिनी ॥
पयारव्यासनं श्लेष्मकरं ॥ कदलविकासि किरणं ॥ कदलवहशगोभा
मानहस्तं ॥५॥ गरुडपोषकं ॥ महादंतधारिणं ॥ चंद्रचूडं ॥ चंद्रपो
षकं ॥ स हि सूर्यप्रकाशेन वर्द्धते ॥ आलणरक्षकं वा ॥ स्करथ सदाधि
रक्षक क्षत्रवैश्यरक्षकं ॥५॥ गौः धेनुः सरस्वती नंदी किरणश्च ॥
तत्पालकं ॥ गोपः ॥ कृष्णः तांछ्रुद्दिशति कृष्णवर्णः तादृशाः ॥
यद्वा गां जलं पाति मेघः स्तद्वद्वा अलका यस्य ॥५॥ सद्गणाः
सात्वतगणाः प्रमोदादयश्च ॥ गणानां त्वामिति मंत्रलिंगात् ॥ प्रम
थादयश्च ॥ वेदगणाश्च त्रयीमयत्वात् ॥ उषित्वा दिश्य सन्मार्गप्रि
साद्दो सच्चर्यस्य वेदपरत्व दर्शनात् ॥ देवतागणाश्च ॥ अप्सरोदिभिः
स्त्रीरूपाणि कृत्वा सेवितत्वात् ॥ आस्तीहं ससमारूढे त्वादि चंडीस्त
वे प्रसिद्धं ॥५॥ हस्ती बलभद्रः तत्प्रसादरं ॥ रलयोरैक्यात् ॥ हरयः
हरिद्वर्णाः ॥ शादाः ॥ शादास्तृणानि दूर्वा इति यावत् ॥ ताः स्तानि

गृह्णाति तं ॥ शादोजं वा लशष्पयोरि लमदरः ॥ सशयो रलयो [illegible]ध्यं ॥
हरौ विष्णौ सादरं ॥ हरिभिः अश्वैः यत्सादरः गतिः प्रकृष्टगत्या दौ तां ला
ति ॥ हरिणा सिंहेन यः सादरः गतिः तां लातितत् ॥५॥ मधुनामा परः
शत्रुः तं उद्धतकं कंठं करोति तं ॥ मधुनिषेपराः तत्पराः भृंगाः तेषां उ
त्कंठा यस्मिन् ॥ मदोद्धुक संभृतत्वात् ॥ मधुपा भृंगाः राः मेघाश्च
तद्वत् ॥ उत्कृष्टः कंठो यस्य तं नीलकंठं मित्यर्थः ॥ राः स्वर्णे जलदे
धने इति हैमः ॥ मधु मद्यं पलं मासंच ॥ तयोः उत्कंठा यस्य तत् ॥
॥५॥
॥ गिरिशः गोवर्धनः शिवः कैलासश्च उदयाचलः
हिमाचलः शिवो वा ॥५॥ तेजो इत्याख्यं ॥२॥ महेशेति ॥ अर्धेंदु
रर्धचंद्रः ॥ नादश्च बिंदुः पृषत् ॥ अनुस्वारश्च ॥ शक्तिः गौरी कला
च ॥ बीजाक्षरस्य बिंदुना इत्कला शांताख्या अवयवास्तं मे प्रसिद्धाः
(पं) शांतं तु महेशेति पदं दर्शयति ॥ अथ तद्रूपं निस्समाधि निश्चल
या स्तौमि ॥२॥ आशीरूपं तृतीयमाह ॥ भवनप्रवणात् ॥ गजयानका
१॥ अवनप्रवण इति ॥ ॥२॥

नेनखरदूधरात् ॥ प्रसिद्धसिंहादस्य वैलक्षण्यं श्लेषं ॥४॥
ग्रंथस्यप्रयोजनमाह ॥ कविमिति ॥ बाणरचना शरप्रयोगः शब्द
विन्यासश्च ॥ पुण्यश्लोकः रामभद्रः ॥ एतन्नामा ग्रंथश्च ॥ प्रतिष्ठा
अवस्थानं ॥ संमानश्च ॥ जनस्थानं खराद्यालयं नासिकेतिप्रसिद्धं ॥
सभाच ॥ यतोहि स श्लोकः लाघवयोगेन जनस्थानेन्नृणां प्रतिष्ठा दृष्टा
॥ अतस्तादृशैः तदाश्रयणं कार्यमिति भावः ॥५॥ ननु काव्यस्य
सर्वथा निर्दोषत्वेन रचयितुमशक्यत्वात् सदोषस्य च कुत्सास्पदत्वात्
तत्र कथं प्रवृत्तिरित्यत आह ॥ त्याज्यमिति ॥ प्रतिभा स्वाभाविकी
शक्तिः कृत्रिमा क्रियया निर्वृत्ता ॥ सहजं कर्म कौंतेय सदोषमपि
नत्यजेत् ॥ सर्वारंभाहि दोषेण धूमेनाग्निरिवावृता इतिगीता
यां ॥६॥ किंच दोषोत्सारकाभावे तत्प्रवृत्तौ बाधकं नान्यथेत्याह ॥
अज्ञानादिति ॥ सदोषं दोषसहितं कजसहितं च ॥ निर्दोषं दोष
रहितं कजरहितं च कविभागिभिः कवयिताच सदोषं कार्तवीर्यं

स्था

निर्दोषं कर्तुं भार्गवीश्वभवंत:॥ कविकुलश्रेष्ठाय यत्नात् तत्काव्यं सभा
कर्तुं न स्वयं तदर्थं प्रवृत्ति: स्यादिति भाव:॥७॥ दोषोत्सारणमार्गं दर्शय
ति॥ यद्यहं पंडित:॥ पंत इति॥ भगवन्निखिलवरेण्य जनमध्ये गणनीयो भवि
ष्यं तर्हि इमं प्रबंधं दोषेणुरपि नाश्रयिष्यत्॥ भगवन्निखिलानां हि वर्णा
नकेपि दूषयंति तत्पुण्यप्रभावात्॥ न ह्ययं तादृश:॥ अथवा इ[illegible] ना
धवाय पुरुषेनद: इति केशवादिन्यासे दर्शनात् माधवस्य इकार
वाचकत्वं तंत्रे प्रसिद्धं॥ तं मिलन्यो मूर्धन्य मध्यो इकार:॥ ऋ
टु रषाणां मूर्धेति टवर्गस्य मूर्धन्यत्वात्॥ तथा च उकार इकार संयो
गे डिरिआतं॥ तमाश्रितो धिष्ठित: पंतो पंडितो भवति॥ पंडित
कृतिषु दोषदर्शनेपि तेषां द्विद्वत्तया न केपि तं पश्यंति॥ ते तु महांत:
न कदापि अन्यथा करिष्यंतीति विश्वस्ता:॥ अहं सोपि न॥ एवं च मयि
उभयविधत्वाभावात् मत्कृत प्रबंधे दोष: संभवेदेव॥ परं त्वयं संभा
वित दोष:॥ श्रीमत्पर्षदं आगत:॥ तदत्र सर्वदै:॥ प्रायश्चित्तं नि
योज्यं॥ तदे[illegible]तास्मिन् संभाबितोपि दोषो नातिष्ठेतेति भाव:॥८

यथा अत्रैव, स्त्यद्युयोगे प्रयम्स्ते ति मध्यमपुरुष प्रयोगोऽनुप
पन्न इति दोषः॥ तत्रश्री समृद्धिः॥ भवंतीति भवंतः॥ सपर्या इति
व्यक्त्य प्रत्याप्राय श्चित्तं इत्तं चेदिदं पर्यंभवति॥८॥ ननु प्रायश्चित्तदा
नमानुकूल्य एव संभवेदिति चेत्तत्राह॥ नूनमिति॥ कवौरूढः मलः
दोषः के जले विरूढः मलः कलुषताच॥ सरसानां सो[illegible]त्साहा
नां॥ सशक्ति विशेषाणांच॥ स्वभावतः॥ कविता दोषमपहर्तुं॥ सरस्य
जनस्य॥ जलकलुषमपहर्तुं शक्तस्य॥ कनकस्यच॥ प्रतिकूलता
पि स्नेहहान्यै नभवति॥ यत्सरसकनकशब्दौ प्रतिलोमतः पठि
तावपि समेवार्थमभिदधाते इति॥९॥ किंच महतां समागम एव
दोषनिबर्हणायेत्याह॥ किंकाव्यादिति॥ दोषावस्थितिः॥ दोषस्याव
स्थानं रात्रेश्चावस्थानं॥ सूरीणां पंडितानां॥ आगमः समागमः॥
सूर्योदयश्च॥ सद्वा असद्वा काव्यं॥ सूरिभ्य एव दर्शनीयं॥ [illegible]
रेभ्य एव दर्शनीयं॥ नसूरेभ्यः तत्र सूर्यागमो दोषावस्थितये॥
कदापि न दृश्यत इति भावः॥ सूर्यागमश्चेद्दोषाभावः दोषावस्थानं

मनवघं

स

चेत्सूर्यागमएव नेतिमन्यामह इति॥ ९॥ किंच दोषासंजनमपि भूषा
करणसमर्थेनैव कार्यं नान्येनेत्याह॥ विविधेति॥ विविधार्थाः॥ नाना
द्रव्याणि॥ विविधार्थोद्भावनं च॥ भूषाकरणं॥ अंगप्रत्यंगेषु भूषा
र्पणं॥ सम्यगुल्लासनं च॥ दोषासंगं॥ रात्रौ रत्युत्सवं॥ दोषासंज
नं च॥ एवं च भूषाकर्तुर्दोषोद्भावनं दूषणपर्यवसाय्येवेति भा
वः॥ १०॥ दोषाभासेपि श्रीमद्विविचारितेत्र दोषसद्भावो नस्या
द्वेति सदृष्टांतमाह॥ इतिहासेति॥ दूषणस्य दोषस्य राक्षस
विशेषस्य च॥ यथारामचरिते॥ पूर्वं॥ दूषणस्य॥ भासमान
त्वेपि॥ अंते नाम[illegible] शेषत्वे वा सते॥ तथा[illegible]ति भावः॥ अस्य ग्रं
थस्य॥ भगवद्गुणप्रधानतया॥ तद्वाग्विसर्गो जनताघसंप्लु
व॥ इत्यादि भागवतोक्ते दृश्यमानस्यापि॥ दोषस्यागणनीय
त्वात्॥ ११॥ यद्यप्येवं तथापि विद्वज्जनतिरेव सर्वार्थसाधनी प्रसादो
त्याह॥ पूर्णांजलिमिति॥ सत्कीर्तिरामं॥ एनं ग्रंथं च॥ नैर्मल्यं
अनिर्वचनीय आनंदः प्रमोदः मोदश्च॥ १२॥
[illegible]॥ प्रसादश्चमत्कारश्च॥

॥यत्॥ स्फश्लोकत्वाघवश्लोकोनिर्दोषोत: फलितमाह॥ स्फश्लोकेति॥
सकला: कलासहिता: सर्वेच हरिदासा गोस्वामिन: भगवन्नि
ष्ठाश्च॥१४॥ स्फश्लोकेति॥ खरो राक्षसविशेष:॥ रलयोस्सावर्ण्या
त्॥ खलश्च॥ गर्दभप्रायश्च॥१५॥ वेदांताधिकारिणांसाधनचतु
ष्टयसंपन्नत्वात् चतुष्टयेच नित्यानित्यवस्तुविवेकमुख्यत्वात्त
मेवदर्शयति॥ यदेवेति॥ यत्॥ निभृतं अत्यंतं देशत: का
लतश्चेति यावत्॥ सत्यं सत्तान्वयी॥ तन्नित्यं॥ असंभि[illegible]का
रेण भृतं कृतं॥ त्यकारेण सहितं [illegible] सत्यंच॥ निसंभित्येव॥ प्र
तीयमानापि विचारेण या नास्ति सा माया॥ तदनिसं॥ मा शब्दो
निषेधवाची॥ मा नास्ति या सा माया॥ विचार: विवेक:॥ यद्वा
॥विचार:॥ विष्णु:॥ तदुपासनया॥१६॥ जगदाकारेणप्रती
यमानाज्ञानाभावस्य विचाराधीनत्वात्॥ तस्यच॥ गुरुकृपा
साध्यत्वात् तमेव स्तौति॥ श्रीगुरोरिति॥ श्रीगुरो: देशिकस्य॥

॥परमे॥

गट

दा

बृहस्पतेश्च॥ तमः अज्ञानं राहुश्च॥ गुरोरानुकूल्येयथाराहुर्बा
धितुं नेष्टे॥ तथा देशिकरूपायां सत्यामज्ञानं॥१७॥ इदंसा
क्षाद्धरिरेवाहेत्याह॥ गुरुगुरु इति॥ सिंहस्य मंदशाद्यानुकरणं
॥नहि प्रल्हादस्य॥ अभिजनताच मतिर्न वयः॥ तथापि गर्भेनार
देनानुगृहीत इति तदर्थं ममएतादृक्॥ रूपभाक्त्वं संप्रतिपन्नं॥
तस्मात्॥ गुरोरन्यत्मम प्राप्तये साधनंनास्तीति हर्षव्याकुलतया
तादृशशब्दं व्याहरन्नृसिंह आविर्भूत इति॥१८॥ श्रीगुरुरूप
दिशति अध्यारोपापवादन्यायेनेत्याह॥ नगघटितमिति॥ हे सौ
म्य॥ इदं दृश्यमानं॥ सकलजगत्॥ किंचिन्नगैः स्थावरैर्घटितं॥
किंचित्खलै जंगमैर्घटितं॥ स्थावरजंगमात्मकमस्ति एतत्स
र्वं जडोपरचितं विद्धि॥ जडेन अज्ञानेनोपरचितं॥ ननुजडेन
केवलेन उपरचनं कथं स्यादितिचेत्॥ तत्कलोपमितं॥ तस्य

॥५॥

ब्रह्मणः याकल्प ईक्षण रूपाशक्तिस्तया उपचितं सदृष्टं॥ एव
मध्यारोप मुक्त्वा अपवाद माह॥ इदं सकलं जगत्॥ ।मिथ्यासत्य
त्वेन ब्रह्मैवावशिष्यते॥ रज्जु विवर्तस्य॥ सर्पस्य रज्जु मात्रत्व
वत्॥ शब्दतोपीदं॥ निरूपयितुं शक्यते यथा॥ सकल जगत्
॥नग घटितं॥ गकारेण घटितं न भवति॥ गकारो गतः॥ अवशि
ष्टं सकलजगत्॥ पुनः चलघटितं॥ चकारान्नेत्यनुवर्त्यते॥ ल
कार घटितं न भवति॥ लकारो गतः॥ अवशिष्टं॥ सकजगत्॥
पुनः जडोपरचितं॥ जकारस्य लोपस्तेन रचितं यस्मिन्॥ डल
योरैक्यात् अवशिष्टं सकल्॥ पुनः लत्क लोपचितं॥ [illegible]
शिष्टं तत्॥ ककारस्य लोपः तेन चितं युक्तं॥ ककारो गतः अ
वशिष्टं॥ सत् ब्रह्म जगतः आद्यावंतेच तदेवावशिष्यते॥ ए
तदेतस्य स्वरूपं चर्ययैव ज्ञातव्यं इति ध्येयं॥ १८॥ एवं मिथ्या
स्वरूपस्यास्य प्रपंचस्य सत्यतामुपदिशतः॥ कांश्चिद्विदुषः

उपालभते ॥ मायेति ॥ कविदितं ॥ सर्वैः सर्वत्रज्ञातं ॥ [illegible]

जगदुत्पादने तस्य वशा माया स्त्री ॥ वशा वंध्या वशीभूताच ॥

नपुंसकात् वंध्यायां बहून्यपत्यानि जातानि इत्युक्ते यो नाम

प्रमाणादृढं विश्वसेत् सोत्र विश्वसेत् ॥ २० ॥ एतत्प्रपंचार्थ

मेव एतज्जातीयं पद्यं निबध्नाति ॥ वंध्याया इति ॥ कस्यचिद्द

क्षिणार्थिनो याचकस्यान्यं तादृशं प्रति उक्तिरियं ॥ परार्ध

स्य पारे इति पारे परार्धं ॥ संख्या तु परार्ध पर्यंतं ॥ तदूर्ध्वं सं

ख्याभावात् ॥ २१ ॥ एवमद्वैतासिद्धौ यत्पुनःद्वैतं भासते त

न्मायागुणकृतं नान्यथेत्यत्र निदर्शनमाह ॥ शैलेति ॥ कैला

सेधर [illegible] वलिखते ॥ तपोक्तः ॥ धृङ् अवस्थाने गोवर्धन

धरश्च कुमारेण स्वामिना तुष्टः कुः भू देवी कुमारः मदनश्च

तामा तुष्टः ॥ सत्या पार्वत्या सत्या सत्यभामयान्वित इति एकं

पदं ॥ अब्जेन चंद्रेण शंखेन पद्मेन च ॥ भूति भस्म संपच्च ॥

तोऽ

तया

॥ ६ ॥

विनायकः गणेशः ॥ वीनां पक्षिणां नायकः गरुडश्च ॥ सर्प
भूषणः शेषशायीच ॥ एवं उमाधवः शिवः माधवाद्भेदं न प्रथ
यते ॥ यश्च भासते सः अंतिमो गुणः तमोगुणः ॥ तस्यस्था
नस्थितिः ॥ तत्त्वकृतोयं ॥ न पारमार्थिकः शब्दतोपि ॥ अदेङ्
गुणः ॥ अकारः एकारः ओकारश्चेति ॥ वर्णत्रयं गुणशब्दा
भिधेयं ॥ तत्र अंत्यो गुणः ॥ कः ओकारः ॥ तस्य स्थानं किं उ
कारः ॥ स्थानेंतरतम इति उकारस्य ओष्ठ्यत्वात् ॥ तादृ
शस्य ओकारस्य स्थानं भवति एवंच अयं उमाधवः
समाधव इत्युकारकृतो भेदः ॥ नान्यथा ॥ २२ ॥ निरति
शयात्म सुखसाधनं विहाय ॥ आपातरमणीयसुखसा
धनद्रव्यार्जनं न कार्यमित्याशयेनाह ॥ वित्तार्थमिति ॥ लो
के हि केचित् द्रव्यमेवार्जयंति ॥ परे अर्जित द्रव्यत्यागेन
कीर्तिं ॥ तदुभयमपि नात्यंतिक सुखकारणं ॥ आत्यंति
कसुखसाधनेनैव मनोजयवासनाक्षय हरिभक्ति रूपेण

तन्निरतिशयानंदलक्षणं सुखं तु प्राप्नुयादेव॥ किंच यदर्थं
त्वं यतसे तदुभयमपि तत्रानुषंगिकं नास्तीति न॥ किंतु उ
पलभ्यत एव॥ यथा आत्मशंसाधनं॥ आत्मनः शं सुखं
तस्य साधनं॥ अस्मिन्पदे आत्मशं साधनं च वर्तत एवेति॥
॥२३॥ तद्धितमिति॥ हे सत्तम॥ प्रभुः भो: भूपतेः वित्तं या — श्र
च्यते तत् जनस्य असुखं सुखकारकं न भवति॥ यद्वा॥
असूनां प्राणानां खं जनस्य हेतुरितिशेषः॥ यतः सकुप्रभुः
॥कुत्सितप्रभुः॥ नदेयविशारदपति॥ यः धन[illegible]मदोन्मत्ते — मदन
न मनसा वित्तः स्यात्। तस्मादात्मविषयकविचारमेव कुरु॥
तेन परमसुखं स्यात्॥ किंच यदर्थं त्वं यतसे तद्धनमपि त
त्रानुषंगिकमपि नास्तीति न॥ आत्मनः बहुशोधनमित्यत्र
बहुशः॥ धनं [illegible]त एवेति॥२४॥ किंच॥ कि यदपि मेलितं
द्रव्यं धनं न धनं भवति॥ धनं तु ब्रह्मपद एव स्थितमित्याह॥
मितेहिति॥ अयुतं दशसहस्रं धनं न धनं यस्य कस्यापि सकाशे

॥७॥

स्य

अत्त्यये वेति॥ अकारेण युतं युक्तं धनं निधनवत्तत्॥ तथा
धनपरार्धकं धनं परार्धं परमसंख्यावधिसंख्यां परार्ध
पर्यंताहि संख्या ज्योतिःशास्त्रे प्रसिद्धा॥ एवं तर्हि किमपि ना
स्ति धनराशावस्य धापूर्वार्धं नापरार्धं यश्च नकारः॥ सः
अभाव एव। धनं तु अक्षरपदांतरे॥ ब्रह्मपदे विष्णुपदे वा॥
अक्षरं ब्रह्म परमं॥ तदहमक्षरमक्षरमितिश्रुतेः॥ नित्यं दृश्यते
॥ अक्षराणि अकारमारभ्य क्षकारपर्यंतानि॥ तन्मये पदे॥
यकार दकाररूपे॥ तन्मध्ये धने ति सर्वदा स्थितमिति॥
तथा॥ तथ द धन पफ बभ मेति अक्षरशब्दो हि स्वरे रूढ
स्वरव्यंजनरूपेपि प्रयुज्यते॥ यथा॥ मकारस्तृतीयाक्षरो
भवतीति श्रुतिः॥ मंत्रराजः षडक्षर इत्यादिस्मृतिश्च॥ पद
इत्यत्र क्रमोऽविवक्षितः॥ अतो न धनार्थं यत्नं कुर्यात्॥
किंतु ब्रह्मप्रविष्टो भवेत्॥ ब्रह्मनिष्ठः प्रतितु धनमेव स्वयं प्रा

र्प्यते॥ ममांगीकारः कार्य इति स तु तत् प्रतिनक्त्याक्षक्लेश
मात्रेणापि संभावय[illegible]लिंधनत्वादिति तात्पर्यं॥२५॥ एक एव
मनो देवो जितः सर्वार्थसिद्धिर् इति वाशिष्ठोक्तेः॥ मनोजय
मंतरेण आत्मप्राप्तेरभावात्॥ तत्क्षयमाह॥ आत्मन इति॥
चित्तस्य तस्य क्षये चित् स्वयमेव प्रकाशते॥ यथा॥ चित्तशब्द
संबंधिनस्तकारस्य क्षये लोपे धात्॥ चिदेवावशिष्यते॥२६॥
चित्तजयस्य निरोधसमाधिरेवोपाय इत्याह॥ वैराग्ये वन
वासे॥ ब्राह्मणः शिवस्य च॥ उपदेशेऽपि समाधावेव निवृत्ति
सिद्धिः॥ चित्तस्य विषयोन्मुखतापरिहारेण आत्माभिमुखी
भावः॥ यथा॥ सुरथस्य राज्ञः॥ समाधेनाम वैश्यस्य च॥ स
माने वैराग्ये विपिनवासे॥ ब्रह्मभवस्य सुमेधोऽपरपर्यायस्य
विशिष्टस्य उपदेशे समानेऽपि निवृत्तिसिद्धिः॥ आत्माभिमुखी
भावः॥ समाधावेव नान्यत्रेति सप्तशत्याख्य देवीचरिते प्रसि
द्धं॥२७॥ सुगमोपायमाह॥ [illegible]य इति॥ रजः रजोगुणः धूलिश्च॥

पूर्णे

॥सत्पाति॥

॥२८॥

पिप्पलं विषयसुखं ॥ तस्य यो भोगः ॥ तयोरन्यः ॥ पिप्पलं
स्वादित्यत्र स्वीकारात् ॥ पिप्पलस्य अश्वत्थस्य यो भोगः भ
क्षणं ॥ सहि गजाय रोचते ॥ पिप्पलं कुंजराशनः इति ॥ हरिं
सिंहं च ॥ प्राणस्पंदनिरोधात् ॥ सत्संगात् वासनात्यागात् ॥
हरिचरणभक्तियोगात् मनः स्ववेगं जहाति शनैरित्याचार्यो
क्तेः ॥ २८ ॥ सर्वानर्थमूलस्य संसारस्य निवृत्तिरेव परमपुरु
षार्थ इति निवर्तकस्य स्वरूपमाह ॥ मर्यादेति ॥ मर्यादा कुल
भूमिः अवधिश्च ॥ अप्तलमयः उदकमयः मृलमयश्च मूले
नजननमपि लक्ष्यते ॥ रुदवि वाडवः वाडवानलः ॥ शुद्धवि
ग्रश्च ॥ नीचगैर्जलैः निम्नप्रवणैः उदकैः ॥ नीचानुसारि
भिः जडैः ॥ उभयो रैक्यात् ॥ स्वातिवर्षं ॥ स्वातिनक्षत्रवृष्टिः
तस्य द्रव्यस्यातिवृद्धिः ॥ प्राप्तिश्च ॥ मुक्ताः मौक्तिकानि
जीवन्मुक्ताश्च ॥ अमंदः तीव्रः रागः ॥ प्रीतिः तेन मथनं

र्यस्य

अनल्पसत्तया व्यवहारः मंदरसंज्ञकः अगः शैलैः तेन मथनं विलोडनं च ॥ उच्चैःश्रवानाम हरिरश्वः महायशा भगवांश्च ॥२९॥

॥ तन्निवृत्तिसाधनमात्मज्ञानमेवेत्याह ॥ विहीन इति ॥ स्नेहः प्रेमा तैलं च दशा वयोवस्था वर्तिश्च ॥ अंजनं विषयसंबंधः कज्जलं च ॥ तमः संसारकारणमूलाज्ञानं अंधकारश्च ॥ अनलप्रभः अव्याहतप्रभः वातादिनाचलप्रभश्च ॥ प्रसिद्धदीपादयं विलक्षणस्वभावः ॥३०॥ आत्मज्ञानाभावे यत्फलं तद्ध्यायेत्याह ॥ कर्मसाक्षीति ॥ कर्मसाक्षी आत्मा सूर्यश्च ॥ दोषावाप्तिः रात्र्यवाप्तिश्च ,

म

सुदिनं पुण्यसुकृदिवसश्च ॥३१॥ आत्मभिन्नतया इतरदेवतोपासने स्वर्गादिफलं भवेत् न तु मोक्ष इत्याह ॥ इतरेति ॥ इतरेषां देवानां भजने यो घनः सांद्रः रसः प्रेमा इतरो यो भजनः नक्षत्रजनः स्वात्यतिरिक्तो मृगादिः तस्य घनरसः आसक्तिः स्वाति नक्षत्रोदकं च ॥ तथा च ॥ श्रुतिः ॥

१+ उदकवर्षे फलनिष्पत्तिः स्वर्गादिफलप्राप्तिः धान्यसंसिद्धिश्च ॥१॥

मुक्ता जीवन्मुक्ताः मौक्तिकानि च स्वाति घनरसः आत्मत्वेन देवभजनविषयको यो घनरसः +

१४

त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसीति ॥ अथ योन्या
देवता उपास्तेन्योसावन्योहमिति न स वेद ॥ यथा हि पशुः स दे
वानामिति ॥२२॥ ननु ब्राह्मणः सर्वात्मकत्वेन तत्रस्थानामस्मा
कं तल्लाभः कुतो नास्तीत्यत्राह ॥ संसारिणामिति ॥ अमृत
लाभः वस्तुलाभः जललाभश्च ॥ अद्वतं ब्रह्म तत्रस्थानां ज
गंतरवर्तिनां च ॥ प्रत्यगभिन्नात्मक प्रवणताभावः प्रत्यगुल्लव
नाभावश्च ॥२३॥ निर्धर्मकस्य वस्तुनः स्वात्मन्येवान्वेषणं कार्य
मित्युपदिशतीत्याह ॥ स्त्रीत्वमिति ॥ विभक्तिः परिच्छेदः प्रथ
मादि सप्तम्यंता च ॥ वचनं उक्तिः एकद्विबहुत्वोपाधिकं च ॥ अ
व्ययस्य अविनाशिनः परमात्मनः स्वरंतरु[illegible]रित्यादिरूप प्रात
स्वरस्थानं स्य च ॥ आत्मरूपं स्थानं ॥ स्वर् इत्यव्ययस्थानं स्वरादिगणश्चेति
॥ स्वरादिनिपातमव्ययमिति ॥ पाणिनिस्मरणात् ॥ स्त्रीत्वादिशू
न्यमव्ययं यथा स्वरादिगणे लभ्यते ॥ तथा ॥ परमात्मवस्तु ॥ आ
त्मन्येव लभ्यत इत्यर्थः ॥२४॥ एवं निवर्त्य संसारं निवर्तकं च आत्म

ज्ञानं पृथक्त्वेन निरूप्य समुच्चयेन निरूपयति पंचभिः ॥ अचल इति
॥ अचलः व्यवहारेण निश्चयः पर्वतश्च ॥ स्वरूपस्य संधानं सर्वानु
स्यूतत्वेन ॥ स्वरोर्वज्रस्य उपासनं ॥ ३५ ॥ संसार सागर इति ॥
दोषाकरस्य दोषराशेः चंद्रस्य तस्य संसारस्य शोषं क्षयं करोति
तादृशं ब्रह्मरूपं तेज एवैकं ॥ तं सागरं शोषयति ॥ तच्छोषं कुर
कं
के कुंभे संभवं कारं ब्रह्मतेजः ॥ द्विजरूपं तेजः अगस्त्याख्य
मेवैकं ॥ ३६ ॥ दोषोद्रेक भवे इति ॥ दोषोद्रेकः बंधककर्मोद्रेकः
तन्मूले भवे कीदृशे प्रभूततमसि बहलाज्ञाने रात्र्युद्रेक संभवे
गाढांधकारे च ॥ द्विजानां विप्राणां पक्षिणां च ॥ नष्टस्फुटज्ञानोन्
मेषनेत्रशक्तिश्च ॥ द्रष्टुं ज्ञातुं वीक्षितुं च ॥ स्थाणुं शिवं परमात्मानं
वृक्षं च ॥ आत्मानं घोषयंति आत्मघोषाः वेदांतिनः तेषां द्विषः
शत्रवः ॥ नास्तिकाः आत्मघोषाः काकाः तेषां द्विषः घूकाश्च ॥
ते हि रात्रौ प्रवृत्तदृशः ॥ अनंतो विष्णुः तस्य पदं चरणः ॥ तस्मा
दुदयो यस्य भक्ता उपासनवशात्स्वन्त इत्यर्थः ॥ अनंतं आकाशः

कुंभः कोटिः कलशः कुटो घटः निपावपि इति कोशः ॥७॥

तद्रूपं यत्परं तत्र उदयो यस्य कर्मसाक्षी परमो सूर्यश्च ॥३७॥
आत्माराम इति ॥ आत्मैव आराम उद्यानं ॥ पूर्णाखंडरसेन हेतु
ना ॥ अनवच्छिन्नजलसमृध्या हेतुना च ॥ शुकः योगीन्द्रः कीर
श्च ॥ नीलकंठः भगवान् शिवः मयूरश्च ॥ कपिराट् हनुमान्
कपिश्रेष्ठाश्च ॥ हंसाः परमहंसाः पक्षिविशेषाश्च ॥३८ + आग
माः शास्त्राणि वृक्षाश्च सद्रुचिं उत्तमप्रीतिं प्रतिपादनविषये
सम्यक् शोभाविशेषं च ॥ ९ ॥ योवा इति ॥ पंचाक्षरीभूता
द्युपद्रव निर्वर्तकः पंचपरिमिताक्षरवांश्च ॥ पंचमहाभूतानि
आकाशादीनि सत्ववि‍विर्वतः ॥ मिथ्याभासः पंचानां महतां भू
तानां पिशाचानां विवर्तः अभिग्रहः ॥ ब्रह्मविचार इति पंचाक्षरा
णि ॥ ३९ ॥ नयोग इति ॥ योगे अष्टांगे विष्कंभादिषु च करणे
ज्योतिषो मादिक्रियायां बवादिषु च ॥ मूलं मूलमधिष्ठानं
परमात्मा ॥ मूलनक्षत्रस्मिन्नितिवं ॥ भजने भक्तौ नक्षत्रजने
च ॥ ४० ॥ बाल इति ॥ बाला अज्ञाः शिशवश्च ॥ स्थूलाक्षरं व्यक्ति

मापन्नं सगुणं ब्रह्म रामकृष्णशिवादि॥ महांत्यक्षराणि अआइ
त्यादीनि सूक्ष्माक्षरं परमसूक्ष्मवस्तुभूतं ब्रह्म॥ अन्यत्प्रसिद्धं
॥ लेखेषु देवेष्वेव शुद्धसात्विकत्वात्॥ अर्हा योग्या स्थिति
र्यस्य॥ लेखेषु पत्रादिलेख्येषु च॥ नहि पत्रादिव्यवहारः स्थू
लाक्षरैर्भवति॥४१॥ यदि न हरेरिति॥ सारथ्यं सूतत्वं च॥ गुरोः
सद्गुरुः द्रोणश्च नरो मनुजः पार्थश्च शास्त्रविद्यातत्वमस्या
दि वाक्यजज्ञानं शास्त्रसंबंधिनी विद्या च॥ कलियुगोद्भवमहा
भारस्य तरणे उत्तरणे दक्षिणः कलिः कलहः तेन भवो यस्य तस्मि
न्महाभारतानां रणे युद्धे च॥४२॥ सत्तारक इति॥ सत्पथः धर्म
मार्गः नक्षत्रपथः आकाशश्च यो हि भजनैकमूकः सएव सत्तार
कः॥ सम्यक्तारकः उत्तमताराविशिष्टश्च भजनं भक्तिः न

क्षत्रजनश्च॥ शतहृद्रा विद्युत् सा चानेकहृद्विशिष्टेति जल

वृद्धिहेतुः॥४३॥ हरिपरिचरणमिति॥ हरेर्भगवतः हस्ते महतो

लांगलस्य च॥ रलयोरैक्यात्॥ परिचरणं भजनं परितः प्रवर्तनं च॥

त्र

वृषेण स्वधर्मेण बलिवर्देश्च क्षेत्रस्य शरीरस्य केदारस्य च॥
घनवत्कमनं महः कांतिर्यस्य हरेर्दयामृतार्द्रैः घनस्य यः कष्टु
भेषु महोदयः तस्माद्यदमृतं तेनार्द्रैः सद्भिः प्रहितं उपरिष्टंसत्
सम्यक् उत्पं नं च॥ आत्मलाभस्य बीजं ज्ञानं॥ तस्य द्रव्यस्य लाभो
यस्मात्तद्बीजं॥४४॥ नेति॥ करतानंदः स्वस्मिन्यो देवताभावः
तत्प्रकाशेय आनंदः॥रतिकखंच॥रामे आसंगः द्रढासक्तिः
स्त्रीसंगः श्च॥करणानि श्रवणकीर्तनादीनि च चुंबनाश्लेषादीनि
धेनुकादी न्यासनानि वा॥४५॥ खगासन इति॥ भव्यगुणे उत्त
मगुणे उत्तममौर्विके च॥ खगासने गरुडासने शरासने च अंत
रेण मध्ये रीतिधरं री इत्याकारकवर्णं धरति तत् शरं शरीरं पि
तलरेखा भूषितं बाणं च उभयत्रापि अंतरेण रीतिधरं स्वनिष्ठ
सौष्ठवधरं च॥ उपासनस्य उपा स्त्याः॥शराभ्यासस्य॥ सूक्ष्मं च
लक्षं परात्मवस्तु अणुशरव्यं च॥४६॥ शंकर इति॥ शंकरं
॥ततो आत्मबुद्धिः देहे हं भावः॥४७॥ भक्तिहीनं न शोभत इत्याह॥
सर्व

बव्हर्भकैमिति ॥ शिशुभिरलंकृतं ॥ महैश्वर्यं स्त्रीसमृद्धं उत्तमा
भरण [illegible] नं ॥ एतादृशमपि भवनं गृहं भ[illegible] स्थिरसा भ
क्त्या हीनं चेद्वनमेव भवति ॥ भस्य वर्णस्य अवस्थाने नहीनं भ
वनं वनमेवावतिष्ठते उक्तः सर्वविशेषणेषु भकारवर्जनेनार्थः ॥ बव्हर्कात्यर्थं तत्कं ॥ यद्वा ॥ बहुः अर्कप्रतापो यत्र च्छायाभा
वात् ॥ महापर्वतप्रायं दुर्गमवर्त्मैककं सदाम्बरणार्हस्थलं ॥ य
द्वा दारणस्थलसहितं ॥ वनं तदप्येतादृशं नतु रमणीयं ॥ ५१ ॥
भक्तिं विना मुक्ता अपि न शोभन्त इत्याह ॥ मुमुक्षव इति ॥ अच्युत
तस्य सद्गुणान् मुक्ताजीवेषु स्पृहाः ॥ मौक्तिकानि च ॥ तैः अच्युत
सद्गुणैः ॥ अतृप्तिसाध्यहारकैः विभक्ताः पृथग्भूताः ज्ञानर[illegible]का
भावात् ॥ पतिताः ॥ पातित्यकाः गलिताश्च ॥ येऽन्येरविंदाक्ष विमु
क्तमानिनः इतिभागवतं ॥ ५६ ॥ भक्तारूढ मुक्तिं न स्पृहयन्तीत्याह ॥
श्रीरामेति ॥ रामभक्ता हि ब्रह्मलोकोपरितनान् सांतानिका[illegible] लो
कों गच्छंति ॥ तत्रत्यानंदेन कषायितेभ्यः ॥ अमृत[illegible] संपत् ॥ मोक्ष

दृक्षा

न्.

र्

रव्य

संपत्तिर्नरोचते॥ सांतानिका तप्तक्षीरोपरितनो मंडः॥ साय

॥इत्यतिलोके॥ तद्दामोदककपायितेभ्यः॥अमृतं॥दुग्धं॥नरो

चते इतियुक्तमेव॥५०॥ तेवदंतिग्व॥नपूजनमिति॥ पूजनं

फलं बंदिभावो भजनं॥ मूर्तिवीक्षा यत्रना स्तीतिकृत्वा ताद

शस्य अपवर्गत्वं लोके पवर्गरहितत्वं चेति॥५१॥अहेतुकी भक्ति

र्मुक्तिरेवेत्याह॥ आदिमेति॥ आदिमा श्रेष्ठा॥आद्ये वर्णे मका

रे मो मकारो यस्यां सा॥अनाशोचिता॥आशया उचिता समु

चेता तादृशी न भवति सा॥उच समवाये॥अकारस्य नाशो य

स्यां तत्र उना उकारेण चिता युक्ता॥एवंच॥भक्तिरित्यत्र भ

स्य मादेशे तदुत्तराकारस्य॥लोपे तत्र उकार निवेशो मुक्ति

भवतीति॥५२॥ भक्तिर्जातिश्रैष्ठ्यं नापेक्षते इत्याह॥ मातंग

इति॥ मातंगो गजः अंत्यजविशेषश्च॥५३॥ तथागुणवत्ता

मपि नापेक्षत इत्याह॥ यत्विति॥ नीचकर्मणि निरतत्वेन भग

वत्प्रोक्तकारित्वाभावात्॥ भगवदपराधस्थितं॥ प्राणिजातं

त

तू

यदृच्छया भगवति दृढभावं चेत्तस्याधोगतिर्नास्ति । यद्भगवत्यो नि मे यस्त्र जघन्यकर्माणि मैथुने निरतत्वेन अपरस्य अधोभागे स्थितमपि उत्तमपुरुषे दृढभावं चेत्तस्य ऊर्ध्वगतिर्भवति ते पुरुषापि विपरीतरते प्रवर्तते इत्यर्थः ॥ ५४ ॥ अतः कवि स्तामेव भगवंतमभ्यर्थयते ॥ माराजेति ॥ राजरूपा ॥ राः ॥ द्रव्यं ॥ रामा स्त्री कुमारस्य खं ॥ खमहात्म्यं च मा भूत् ॥ हे मा राजरमानाथ ॥ ५५ ॥ उद्दामिति ॥ त्वमेव उदाराः उः शंभुः ॥ तस्य दाराः ॥ कुटुंबिनी ॥ उदारा दानशूराश्च ॥ ५६ ॥ भामेइति ॥ भामे क्रोधे अंगीकृते मे भा शोभा कथं स्यात् ॥ कामं गीकृते ॥ मे गतिः का स्यात् ॥ रामे परा भक्ति मे राः ॥ द्रव्यं ॥ अतः प्रतियामं राममेव भजामि ॥ ५७ ॥ यतोऽज्ञानं भक्त्यैक लभ्यं सा च भगवद्विषयिणीति संसारनिवृत्त्यर्थं सएवाश्रयणीयेत्याह ॥ श्रांतोसीति ॥ भवदुःसहतापतः सम्यक्दूयः ॥ स्मृति संबंधी तीव्रतापश्च ॥ पंथानः पद्वी सृतिरित्यमरः ॥ सीतयान्वितं ॥ शीतेना

तू ॥ ता य पद

न्वितं ॥ सशायो रैक्यात् ॥ वायुसुतेन हनुमता सेवितं ॥ मंदमा
रुतेन च ॥ पलाशिनो राक्षसाः तेषां सम्यक् घातः नाशः तत्र
समृद्धः विक्रमो यस्य ॥ पलाशिनो वृक्षाः तत्संघातः समूहः
तत्र वीनां पक्षिणां क्रमः पदन्यासो यत्र ॥ धृताकारं सगुणं ॥
रामं ब्रह्म इति ॥ रामपदेनासौ परंब्रह्माभिधीयते श्रुतिः ॥ आ
कार सहितं च ॥ राम आकारसहित आरामः ॥ ५८ ॥ यातायाते

इति

रस

रिति ॥ घनवत् छाया कांतिर्यस्य ॥ निबिडच्छायं ॥ सीतायुतं राम
चरणं ॥ शीलं आरामपदं च ॥ यातायातं पुनरपि जननं पुनरपि
मरणं ॥ गतागतं मार्गविपर्यं च ॥ ५९ ॥ विषयोपेति ॥ विषयाः
॥ उप अधिकं हिता यत्र ॥ विषेण यो योपः मोहः सहितो ग
तो यस्मात् ॥ युपु रुपु लुपु विमोहने ॥ इति ॥ हिंगता विति
धातो रूपं ॥ ध्रुवस्थितिः ॥ कैलासवासलब्धश्च ॥ सानानः ॥
सत्तमो गुणश्च ॥ कनकं अंगनाच ॥ प्रिये यत्र ॥ कनकधत्तूरः ॥

27

अंगना गोरीच प्रियेऽयस्य॥ उग्रोपिभवः शिवश्च॥ शांतिनिवृ
त्तिं॥ परमानंदंच॥ ६०॥ असाविति॥ नरेंद्रं राजानं॥ विषवै
द्यंच॥ प्रणतानंदद्रं॥ गरुडंच॥ वैनेतयत्वात्॥ ६१॥ सुचीति॥
सुचिः साधुः॥ अग्निश्च॥ रामो पगूहनं॥ रामध्यानं॥ स्त्रीणा
मा श्लेषश्च॥ आत्मनो दर्शनं॥ सूर्यातप सेवाच॥ ६२॥ अंधं
तम इति॥ अस्तानं अंधकारश्च॥ मित्रं॥ स खायं सूर्यंच॥ ६३॥
कृच्छ्र द्विषयेति॥ दुःखदृविषयसहितः॥ कृच्छ्र प्र[illegible] देशसहितः॥
कृच्छ्रदो यो विक्षेण योपः विमोहः युधुविमोहने॥ तस्यहितं॥
आधानं यस्मात्॥ महापन्नगः सर्पः महापत नगोवा॥ जिष्णुः
अर्जुनः तं पाति स हरिः॥ तस्य विक्रमः अवतार लीला॥
जिष्णुपो हरि स्तस्य विः पक्षी गरुडः तस्य क्रमः पदन्या
सः॥ जिष्णुः इंद्रः तस्य पविः वज्रः तस्य क्रमः क्षेपश्च॥
॥ ६४॥ कुजन्मीति॥ कुत्सित प्राणि बहुला॥ वृक्षप्रायाच
मरुकरोयः कलिः तस्य व्याप्याविषमा॥ मरुकलाः ये कारिणः॥

२ग

तेषां च ॥ रलयोरैक्यात् ॥ कुत्सित स्त्री व्यभिचारैर्दूषित कुलं ॥ कुंदा
रयंतिते शूकराः तेष्वां संगेन उत्कीर्ण भूमिः द्विजिव्हाः खलाः ॥
सर्पाश्च ॥ महावंचकाः ॥ प्रतारकाः ॥ जंबूकाश्च ॥ नरहरिं ॥ नृसिंहं
॥ अरण्यां नारसिंहं चेति वचनात् ॥ ६५ ॥ भ्रमयतीति ॥ नरःअ
र्जुनः तस्य यः सारथिः श्रेष्ठः ॥ तं कृष्णं ॥ हे नर ॥ कृष्णं वर्णितः
॥ सूतशेखर नाम रसायनं च ॥ सद्रोरसः ॥ साधूनां वाग्रसः ॥
दुग्धं च घृतं वा ॥ हसितेन स्मितेन ॥ सहितं सशर्करं च
अनुतृटिकं त्रटिः ॥ सूक्ष्म कालमानं ॥ प्रतितत् ॥ अनुगत सू
क्ष्मैलं बीजं च ॥ स्नेहं गृह दारादि प्रेमाणं ॥ तैलं च ॥ ६६ ॥
पतितानामिति ॥ नष्ट ज्ञानानां ॥ नष्टेक्षणां च ॥ अन्धतावतारक
था भगवत्कीर्तनं ॥ अभ्रष्ट सोपान मार्गलीश्च ॥ ६७ ॥ पतिता बा
नामिति ॥ महाद्रि सद्रिः ॥ बलवद्रिश्च ॥ चक्रिणः भगवतः अर
घट्टस्य च ॥ गुणानां भजनं सेवनं च ॥ स्थूल रज्जोश्च ॥ ६८ ॥
संसार इति ॥ कृष्णो हि नरकस्य असुरविशेषैर्हंता ॥ ६९ ॥ भवसा
गरमिति ॥

स

तारकाणामीशश्चंद्रः ॥ तस्य कुले रत्नमिव श्रेष्ठं ॥ कृष्णं ॥ तारयंति
ते तारकाः ॥ कर्णधाराः ॥ तत्कुलश्रेष्ठौ ॥७०॥ द्याविहेति ॥ उडुपश्चंद्रः ॥
चर्मवेनद्धवंशविदलनिर्मितं ॥ तरणसाधनं ॥ टोकरेति प्रसिद्धं ॥
तरणिः सूर्यः ॥ नौकाच ॥ ७१ ॥ जातइति ॥ जलस्य जडस्य अविद्या
याः उदकस्य च भ्रमः ॥ भ्रांतिः ॥ शुभं अध्वना ॥ उत्तममध्वनाच
आर्द्ररसेन ॥ सांद्रप्रेम्णा ॥ आर्द्रकस्य ॥ रसेन च ॥ स्करैः संसेव्यं ॥ ✓ ×सुरसे ॥ सेव्यं रति ११ हृदयं च ॥
चंडीशं महादेवं ॥ राजचंडीश्वराख्य रसायनं च ॥ ७२ ॥ समसितेति ॥ सम्यक् याः असिताः श्यामलाः रुचयः तासां राज्या पंक्त्या
उपेतं ॥ यद्वा समातुल्या यासिता श्वेतरुचिः ॥ तसंत्या ॥ यद्वा ॥
मया लक्ष्म्या सहितः समः सितरुचिः श्वेतद्युतिः ॥ राज्येन त्रि
भुवनाधिपत्येन उपेतः ॥ साचासा वितिविशेषणोभय कर्मधारयः
॥ तुल्यशर्करायुतस्कंदर घृतेनोपेतं च ॥ नरकेसरिणं नृसिंहं ॥
नृकेसर्याख्य रसायनं च ॥ अमृताभिमुखः दुग्धपानादिमुखश्च ॥
भवतरुणः संसारश्च ॥ ७३ ॥ व्यथयतीति ॥ अनेकदोषसंभवसंसार

॥१६॥

दोष

संबंधितापः ॥ उल्बण वातपित्तादिसंभवः उपतापः रोगः अभव त्कृष्णः ॥ कायो यस्य ॥ तस्मै कृष्णाय ॥ अनेक वारकृत स्करसमूहरक्षणैः भख्या नाय ॥ अनेके ये स्करसाः औषधीरसाः तेषां भावनै भाविनामभिः ५ प्रसिद्धाय संपन्नाय ॥ इत्तसह स्तपुटाये त्यर्थः ॥ ७४ ॥ संसारेति ॥ गदा अरि चक्रं हस्ते यस्य तं ॥ गदारिः औषधं च ॥ यत्कर्तृकं रसोद्धरणं ॥ भूम्युद्धरणं सौकर्येण सूकरभावेन ॥ तद्रूपावतारेण ॥ पारदोद्धरणं च ॥ सुकरत्वे न औषधीशश्चंद्रः वैद्यश्च ॥ ७५ ॥ स्कवर्णेति ॥ स्कवर्णमालो[illegible]नां रसायनविशेषं च ॥ कृष्णां कृष्णा वेणी ॥ अधुना कृष्णा मधुना पिप्पली क्षौद्रेण च ॥ पिंडिका न पिंडः ॥ उद्वेष्टनं वस्त्रं च ॥ पिंडकयोः ॥ जंघाश्चाश्मयोः ॥ उद्गलनं ॥ तत्रजीर्णज्वरं ॥ द्योतयति ॥ ७६ ॥ उन्मेति ॥ धैर्यशालिनं धीरता च ॥ कलिंग प्रसिद्धं च ॥ करिद्वंद्वं च ॥ रलयोरैक्यात् ॥ महागमाः महाशास्त्राणि महावृक्षाश्च ॥ द्विजकुलं विप्रकुलं पक्षिकुलं ॥ रजः रजोगुणः धूलिश्च ॥ तमः तमोगुणः अंधकारं च ॥ नैगमः वैदिकः ॥ ७७ ॥ दूरेणेति ॥ वणिकुजन संबंधी ॥ वृषः धर्मः बलिवर्दश्च ॥ मदे गर्वे आमोदः तोषः मदस्य दानोदकस्य

५

च

गेधश्च॥ मधुपाः भृंगाः मद्यपाश्च॥ विटपे वृक्षशाखायां॥ जारश्रेष्ठे॥ नानाआदरैः भयैश्च॥ भीरवः स्त्रियः भयशीलाश्च॥ हरिं॥ भगवंतं सिंहं च॥ ७८॥ कलीति॥ नरस्य नलस्य च स्वपदं स्वराज्यं च॥ हरिगुणपरिशीलनं॥ भगवद्गुणचर्चा॥ अश्वरज्जुधारणं च॥ नलैरा ज्ञोहि ऋतुपर्णराजस्य सारथ्यांगीकारेण स्वराज्यप्राप्तिरभूदिति॥ ७९॥ कलिप्रदुष्टेति॥ कलिना प्रदुष्टेति समानमुभयत्र॥ अश्ववशं पाशवशं च॥ स्वरूपानंदच्युतिः॥ साम्राज्यच्युतिश्च॥ नरः नलश्च परं स्वरूपं राज्यं च॥ हरेर्भगवतः हृद्या प्रिया या विद्या॥ अध्यात्माख्या अस्य हृदयविद्या च॥ नलः किल कलिनाग्रस्तः पुष्करेण भ्राता द्यूतार्थमाहूतः सन् तेन सह द्यूतं कृतवान्॥ तत्र तेन राज्यादि सर्वं जित्वा विवासितः स ऋतुपर्णराजगृहे निवासस्थलेन च अश्वहृदयविद्याहेतुना सारथ्ये नियोजितः तेन कारणेन पुनः स्वपदप्राप्तिरिति भारतकथासूचनं॥ ८०॥ द्विजेंद्रेति॥ द्विजेंद्राणां ग्रासः तेन आढ्यः युक्तः अतिशीतलत्वात्॥ बहलदोषाणां वृद्धिकृत्

ग्रासो येषां ताः दशाः आत्मा यामिका यस्मिन् चंद्रार्घः

॥ १९ ॥

प

॥बहलोयो दोषोच्चयः रात्रिवृद्धिः तांकरोति॥जाड्यंमौर्ख्य
मालस्यंच॥गुर्वी या स्फ दिनचर्या पुण्याचरणं दिवसचर्या
च॥हेमंतेहि रात्रिमानं वर्धते॥दिनमानंहीयते॥हृदयेधृ
तः रामोयेन॥रामा स्त्रीच॥२१॥ऐहिकामुष्मिकं सर्व
मपि भगवदाश्रयेणैवसिध्यतीति॥अतउत्तरं वर्णयति॥
र उरीति॥उःरुदः तद्वतारात्वाद्धनुमान्॥हशि चेस्फुतं
च॥सिद्धः सर्वदा कार्यकारणे उद्यतः॥रोतीति लोपदृष्ट्या
सिद्धश्च॥सचगुणोदयः गुणे रूढ्रूढः गुणत्वेन उदयो
यस्य॥ओकारो भवितेतियावत्॥असिद्धः अविद्यमानः
हशि चेति दृष्ट्वाच रलोपः अग्निलोपः राममंदिरे सीता
वियोगेपि अश्वमेधादेजातत्वात्॥अग्निसद्भावः॥रो
रीति लोपश्च॥सच॥स्नः स्वर्गे अगौ रवप्रदः॥तुम्रत्वा
पादकः॥स्वरस्य अचः॥गौ रवं दीर्घत्वं ददाति॥मनोरथ

शाब्दप्रक्रियातु मनःरथ इति स्थिते स सजुषोरुरिति स
कारस्य रेफे मनर् रथइति तत्ररोरीति रेफलोपः हशिचे
तिउत्वं च प्राप्तं॥ विप्रतिषेधे परं कार्यं इति परत्वा ल्लोपे
प्राप्तेपि पूर्वत्रासिद्धमिति तस्यासिद्धत्वात्॥ हशिचेति॥
उत्वे मन उ रथ इति॥ तत आद्गुण इति गुणे मनोरथइ
त्यस्य सिद्धिर्जायते॥ एवंच मनोरथसिद्धौ उः सिद्धः रलो
पः आसिद्ध श्चापश्चितः॥ तदत्र उभयमस्तीति राममंदि
रे एव मनोरथसिद्धिर्नान्यत्रेति॥ ९२॥ कस्मादिति॥ दुर्गतिः
अधोगतिः॥ दारिद्र्यंच॥ उदारः सरलः दाताच॥ तदीयजन
ता साधवः राजपुरुषाश्च॥ आचारस्य कर्मणः फलं॥ चारु
फलं राजादत्त फलानिच॥ स्वलाभः आत्मलाभः द्रव्यलाभश्च
॥९३॥ रामस्य भजनेन संपूर्णकामाः भवंति॥ चतुर्विधपुरुषार्थ
धर्मअर्थकाममोक्षादि प्राप्तिरित्याशयेनाह॥ अजरामरत्वेति॥
अजश्चासौ रामश्च तत्परता भगवद्भक्ता अजरामरता॥

जरामरणशून्यता ॥ जननमरणादि स्वप्नेपि रमारमणचरण
रते भगवद्भक्ते कदापि न भवतीति भावः ॥ ९४ ॥ मुक्ति
रिति ॥ रामः राद्रव्यं मः बोधः ॥ मन अवबोधने इत्यस्मात्
अन्येभ्योपि दृश्यत इति ॥ एवं च राम इत्यत्र ऋद्धि मुक्तिसा
धनमुभयमपि लभ्यते ॥ ९५ ॥ श्रीरामसंबंधवंतं सर्वे
जनाः सत्कुर्वंतीत्याह ॥ सूर्य इति ॥ मित्रतां सूर्यतां सख्यं
च ॥ ९६ ॥ सूर्य इति ॥ सूर्य आत्मा जगतस्तस्थुषश्चेति ऋषि
श्रुतिः ॥ एकैव वा महानात्मा देवता स सूर्य इत्याचक्षत इ
स्मृति ति॑रूपा सर्वानुक्रमणी ॥ यतः सर्वमंत्राणां सूर्यो देवता ॥ कर्म
तस्मात्तन्मंत्रैः क्रियमाणं॑ सूर्यविषयकमेवेति ॥ ९७ ॥
भास्वानिति ॥ जडस्वरूपं उदकमयं मंडलं उभयोरैक्यात् ॥॑ जडरूपं च ॥
उदकमयमंडले संक्रांताः किल सूर्यरश्मयश्चंद्र इत्याचक्षते
॥ प्रतिदेयं सत्कृप कर्तव्यं ॥ द्विजशेखरश्चंद्रः ॥ पाठांतरे ॥
भिक्षुकः शिवस्तस्य शेखरोवतंसः ॥ भिक्षुश्रेष्ठश्च ब्रा

लणश्च ॥ रामचंद्र इत्यत्र रामस्य पृष्ठं सर्वदा लग्नश्चंद्रो दृश्य
ते ॥ ८८ ॥ वृत्तिं पुनरिति ॥ वृत्तिं जीवनोपायं क्षेत्रारामा
दिमनोवृत्तयश्च ॥ व्याजनिं देयं ॥ ८९ ॥ विस्मयमिति ॥
विषमाक्षः शिवः चक्षुः नेत्रं ज्ञानं च अंधकस्य दैत्यवि
शेषस्य अरिणा अंधंकरोत्येवं शीलेन ॥ ९० ॥ नीलांग इति ॥
महापद्मश्च पद्मश्च शंखो मकरकच्छपौ ॥ मुकुंदकुंदनीला
श्च खर्वश्च निधयो नवेति भवावतो नवनिध्यात्मकत्वात्स
मेव आश्रय ॥ हे पूर्णविलेच्छवः ॥ पूर्णज्ञानेच्छवश्च ॥ खर्वो
वामनः विदः भावोवित्ता ॥ ९१ ॥ यो वा इति ॥ व्योमम स्पर्श
मात्रेण हि लोहलं ध्रुवं चकार शंखोपि स्ववर्णं संगतं ॥ ९२ ॥ तं
स्पर्शाख्यो मणिः ॥ यत्स्पर्शेन लोहं स्वर्णं संपद्यते ॥ लोहलं
अस्फुटवाचं बालत्वात् ॥ ध्रुवं उत्तानपादपुत्रं लोहसंग्रा
हकं च ॥ लोहं लातीति व्युत्पत्तेः ॥ स्ववर्णाः शोभना[illegible]क्षराणि

॥कांचनंच॥ ध्रुवः किल सपत्नमात्रावहेलितः स्वजननीकथ
नाद्भगवंतं प्रसादयितुं वनेनिर्जगाम। तत्रच श्रीनारदेनसं
बोधितः सन् मधुवने तपोऽध्यतिष्ठत्॥ अथानुग्रहीतुमा
गतं श्रीभगवंतमालोक्या द्वितीयोयंपुरूषइतिकृत्वा तं स्तो
तुमियेष॥ परंवाक्स्फूर्तिवाभावान्नाशक्नोत॥ तद्भगवता वि
ज्ञाय श्रुतिमयपांचजन्येन गल्लदेशे स्पृष्टः॥ तत्प्रभावाद
धिगतवाक्‌शक्तिर्भगवंतंरमणीयस्तवैरस्तौषीवेतिदिक्
॥९२॥ अहो इति॥ मधनं फद्दं॥ निधनं मरणं धीराः विवे
किनः॥९३॥ स्यादिविसर्जितापर्णि उत्तमइत्यापर्णं ब्रह्म
विज्ञापर्णंच॥९४॥ नाद्भुतस्येति॥ सनंदनः एतन्नामा नंद
नेनपुत्रेण सहितस्य॥ योहिजातमात्रएव प्रव्रजितः॥
यस्योपनयनमपि नास्ति॥९५॥ सर्वगस्यसर्वात्मनोपि ब्रह्म
णो भक्तकार्यकारित्वं सगुणद्वारेवेत्याह॥ तेज इति॥ तेज
सां निधिः प्रकाशमयश्च कर्मसाक्षी ब्रह्मसूर्यश्च सूर्यान्वय

कांतः सूर्यवंशकमनीयो रामः सूर्यशब्दसंबंधकांतः सूर्य
कांतश्च॥ सत्पाकता पाकः पवित्रः तं पाकेनमनसेत्यादौ
दर्शनात्॥उत्तमपवित्रता साधुपाकः पचनं यस्य तस्य भा
वस्तत्ता उत्तमपाक इत्यर्थः॥वद इत्येत्यात्मने पदं भासना
र्थे भासमानो वदेत्यर्थः॥९६॥ तादृशस्य परमदूष्णालो
र्भगवतः प्रातिकूल्येनचिंतनमपि न स्वार्थं विहंतीत्याह॥

पी

यद्यौति॥अपकारः विरोधः तद्युक्ता बुद्धिः पकाररहितो
यमिति धीश्च॥ परमेश्वरेअपकार बुद्धौ प्रयुक्तायामपि
परमेश्वरो वर्तिष्ठते॥यश्च रमेश्वरः सपरमेश्वराद्परोनेति॥
॥९७॥ मानरहितः स्वकार्ये पटुश्चतुर्दशजगत्प्रथितगोत्रः
मकरालयांतवासी प्रियभक्तश्चितपावनो भगवान्॥९८॥
भगवतो हि भक्ताः प्रियाभवंतीत्याह॥मानेति॥मानं
प्रमाणं तेन रहितः अप्रमेय इत्यर्थः यद्वा माच नरश्च

॥७१॥

पापैश्च ताभ्यां हितः अभिमानरहितश्च॥ स्वेषां स्वीया
नां भक्तानां कार्यसंपादने पटुः स्वस्यात्मनः कार्यसंपाद
ने पटुश्च। चतुर्दशसु जगत्सु भुवनेषु प्रसिद्धं गोत्रं नाम
यस्य॥ चतुर्दशसंख्याकानि जगत्संख्यातानि गोत्राणि
यस्य॥ समुद्रस्य अंते मध्ये वा तल्लय्यः विद्या तेपुरूम
यस्य॥ समुद्रस्य मध्ये वा तत्त्वदर्शनात् समुद्रस्या
र्धनेत्यन्तांतशद्वस्य मध्यपरत्वदर्शनात् समुद्रस्यां
ते प्रांतेच प्रियाः भक्ताः अस्य प्रियं भक्तं ओदनं यस्य॥
च चित्तं पावयति शोधयति चित्तं पावनं इति प्राप्त
णजातिविशेषश्च॥ ९८॥ ... पुष्पेति॥ पुष्पवंतौ॥
सूर्याचंद्रमसौ दृशौ यस्य॥ एकयोक्त्या पुष्पवंतौ दिवा
करनिशाकरौ इत्यमरः॥ पुष्पं नेत्ररोगविशेषः॥ तद्
कदकृ॥ धृताः पोषिताः पांडुवालेः पांडवाः येन॥
धृतपांडुरकेशश्च॥ वलिना तन्नामक दैत्येश्वरेणा

चितं पूजितं अंगं यस्य॥ बलिभिः शिथिलचर्मभिः॥
अंचितं अंगं यस्य॥ नवनीरदवत् श्रीः शरीरकांति
र्यस्य॥ नवं निर्गता रदश्री ईतशोभा यस्य॥ निरुक्ति
रेफस्य रोरीति लोपे दृ लोपे दीर्घः॥ भक्तप्रियः ओर
नप्रियश्च॥ कपैव कपिका॥ गुणकीर्तिनं प्रियं यस्य॥ क

ष

पिकातक्रतं व्यंजनविशेषः प्रियो यस्य॥ अतिवृद्ध
स्य हि कपिका भक्तमंतरेण निर्वाहायोगात् तत्रप्रिय
त्वं युक्तमिति॥ ९९॥ हर्यप्रिय इति॥ हयमारः करवीर
मूलं सर्वप्रियं उपविषत्वात्॥ यश्च हयमारः सहर्य
प्रिय एव हरिः अश्वः॥ चणको हि हरेरश्वस्य प्रियः॥
यश्च हरिप्रियः स हरिप्रिय एव अतः सर्वप्रियः॥ १००॥
॥ धर्मनिष्ठं ब्रह्मनिष्ठं मन्निष्ठं च॥ नाहमुपेक्षे॥ इत्याह
त्रिभिः॥ सद्वंशजात इति॥ सद्वंश उत्तमकुलं वेणुश्च॥

॥२०॥

रथ्याचक्रेभ्यः

कः

सगुणः मैत्र्यादिगुणसमौर्वीकश्च ॥ नम्रः अनुद्धतः कुंड
लितश्च ॥ यश्चापि शक्तो सत्यां मार्गणेभ्यः लक्षं तत्संख्या
कं धनं ददाति ॥ यश्चापि धानुष्कः तस्य शक्तो पाटवे सति
मार्गणेभ्यो बाणेभ्यो लक्षं शरव्यं ददाति ॥ ११ ॥ जलमिति
॥ डलयोरैक्यात् ॥ जडं मायाउदकं च ॥ अधिगतामोदं ॥
आमोदो हर्षो गंधे [illegible]श्च ॥ भ्रमेण रहितं ॥ भ्रमरेभ्यो हि
तं च ॥ १२ ॥ चरंतीति ॥ हरिर्भगवानश्वश्च ॥ निजं भारं
स्वहितादिविषयं स्वोपस्कररूपं ॥ तच्चरणं पादं रथस्य च
रणं चक्रं च ॥ ये मदेक[illegible]रा स्तेषां दास्यमपि करोमि किं
मुतान्यदिति भावः ॥ १३ ॥ ननु भगवानुत्कगुणकानामे
वांगीकारं करोति ॥ नास्माकं पापाशयानामिति नाशं
क्यमित्याह ॥ विष्णुपदमिति ॥ भगवच्चरणं आकाशं च
बहु यथा तथा तारकं बहुतारकाविशिष्टं च ॥ प्रदोषस्य

रजनीमुखस्य प्रकृष्टदोषस्य ॥ पातकस्यपेक्षया हित
स्य तारकत्वं नान्यथेति ॥ तदंगीकारेणैव स्वमहात्म्या
भिवृद्धिरिति ॥ ४४ ॥ बहुतारकेति ॥ पदद्वयं व्याख्यातं
बहुलाये दोषास्तेषामुद्रेकः ॥ बहुलः कृष्णपक्षस्तस्य दो पक्षे
षा रात्रिस्तस्या उद्रेकश्च ॥ यथा हि कृष्णे बहुलो दृश्यं
ते तारकास्तथा न शुद्धे तद्वदिति ॥ ५ ॥ दोषाकर इति ॥ दो
षाकरः पातकी चंद्रश्च ॥ विष्णुपदं हरिचरणं आकाशं पौर्णिमायां
च ॥ सवृत्ततां पूर्णज्ञानतां पूर्णमंडलतां च ॥ पंचदश्यां
तन्मात्रकाध्यात्मविद्याग्रंथे च ॥ षोडशकलाः इंद्रियद
शकं प्राणपंचकं मनश्चेति लिंगशरीरं ॥ अन्यत्र प्रसिद्धाः
विदेहभावः विदेहमुक्तिः ॥ अदर्शनं च ॥ पातकिन्यपि
हरिभक्तौ प्रवृत्ते तत्प्रसादेन कंचन गुरुमुपलभ्य तत्

सकाशाद्वृत्तांतश्रवणेन जातप्रसादस्य निश्चयेन लिंग
देहभंगपूर्वकं मुक्तो भवतीति तात्पर्यं॥ नतस्य प्राणा
उत्क्रामंति अत्रैव समवलीयंते विमुक्तश्च विमुच्यत
इत्यादि श्रुतेः॥ ६॥ भवचरण इति॥ अकं पापेदुःखे चेति
विश्वः॥ अकः पापः आकारोघस्य पापरूपमित्यर्थः॥
कामरणं वेश्यास्मरतोत्सवं मरणं संसारः मृत्युश्च॥
भवचरण इति शब्दे चकारे ॥तः॥ तकारः॥ स्मृतश्चेत्॥ चे॥
भवतरणं भवति॥ तथा कामरणशब्दः अकाकारः॥
काकारेण रहितश्चेन्मरणमिति जायत इति॥ ४७॥
॥स्यादिति॥ कामः अभिहतो यस्य॥ निष्कामस्येत्यर्थः
बहुवारान् बहुकालं रामे यः आसंगः आसक्तिः तेन
लिंगदेहस्य सप्तदशकलात्मकस्य भंगः नाशः तस्मि

न्विदेह कैवल्यं मोक्षः स्यात् कामेन अभिहतस्य
ताडितस्य बह्व्यः यावाररामाः वेश्याः तत्संगेन॥
लिंगभंगः उपदंशेन २ तस्मिन्सति विदेहभावो मरणं
जायेतेति॥४८॥ स्मरस्येति॥ शर्वस्य शिवस्य हास्ये
उज्वलत्वं॥ निष्कपटत्वं॥ यद्धर्वहास्योज्वलत्वं त
द्धसयो रभेदात् सर्वहास्योज्वलत्वं सर्वदा अस्य मुख
स्य उज्वलत्वं॥ ९॥ तत्र श्रवणं॥ अथ सामान्येनोक्तां
भक्तिं श्रवणकीर्तनादिविशेषाद्वारेण वर्णयति॥ तत्र
तावद्दादौ श्रवणमाह॥ भो इति॥ श्रवणेन तन्नामभग्म्या
नक्षत्रविशेषेण च भजनस्य कीर्तनादेः नक्षत्रलक्ष
णजनस्य आश्विन्यादि सप्तविंशति राशिरूपस्य॥
॥४४॥

॥२२॥

॥स्पृहयत इति॥ श्रवणधिष्ण्यं। श्रवणनक्षत्रः पदं॥ तत्र
क्षत्रं च॥ श्रवणस्य विष्णुदेवताकत्वं॥ तथा च श्रुतिः॥
त्रेधा विष्णुरुरुगा इति॥११॥ श्रवणेति॥ श्रवणं तन्ना
मक भक्तिः श्रवणाख्या वैश्यमुनिश्च यत्र हते तत्पित्रा
दशरथं प्रतिशापो दत्तः किमिति त्वमप्येवं पुत्रविरहवा
न् भवेति॥ श्रवणमुनि पितुः प्रापहा शापकालमिति
हनुमन्नाटके॥१२॥ यइति॥ यथा नूतनब्रह्मचारिणां
न श्रवणनक्षत्रे कर्तव्ये उपाकरणाख्य संसारेण विनो वेद कृतं
ग्रहणं विफलं शिष्टासंमतं च॥ तथा वि:ग रूढः तस्य इनः विष्णुः
ता तेन उपसमीपे नीतैस्तेन भवं लिलेन बीनोपनीताः संसारि
णः॥ तेषां सन्ध्यास्य श्रवणं विना कृतं कर्णग्रहणं विफलं शि
ष्टासंमतं च॥ बिलेबलो रुक्म विक्रमान्ये नश्रण्वं तः कर्णपुटे

नरस्येति भागवतोक्तेः॥१३॥ भगवद्यशः श्रवणमात्रं कुरूत
तस्तु र्थ्यं तद्धि नान्यत् किमपि करोचेतेति कविः स्वकर्णमभ्य
र्थयते॥ श्रवइति॥ यथापयः पयः इतिनाम्ना माधुर्यादि
गुणेन च दुग्धजलयोर्मुख्यं सख्यं तथा हे श्रवः कर्ण तवापि
मुकुंद श्रवसश्च स्यात्॥ यशोपि दिग्गंतारूढं॥ त्वयि दिशः
देवतात्वेन अंतरूढाः यस्मिन् तथोक्तं रोरीति लोपे द्रे
तिदीर्घः॥१४॥ धत्स्व इति॥ कुंडलं कर्णवेष्टनं तदेव स
हजं च॥ अंगेषु प्रतीकेषु देष्या विशेषु च नेत्रांकतः न
यन समीपे॥ नेत्रोनायकः तस्यां कं चिन्हं तेन प्रभुत्वेने
त्यर्थः॥ खं आकाशं त्वं तिग्र ण्हंति तथोक्तान् तद्गुणत्वा
त्॥ उद्धतांश्च॥ समुदितान् उच्चारितान्॥ उदयंगतांश्च॥
कौरवान् स्सुयोधनादीन्॥ कौ पृथिव्यां रवान् शब्दान् राधा

षे

॥२३॥

प्रियः कृष्णः राधायाः एतन्नाम्न्याः कैवर्तकुटुंबिन्याः इष्टं
च॥ तया हि कर्णः पालितो भूत्॥ नरः मनुजः अर्जुनश्च॥
॥१५॥ कदाचिदापातरमणीयत्वेन गीतप्रवृत्तिर्भविष्यसे तत्राह
॥ या किंनरेति॥ किंनरा देवगायनविशेषास्तैरुपज्ञा आद्यज्ञानं
यस्याः स्त्रीलिंगविशेषणत्वेपि उपज्ञोपक्रममिति नपुंसकत्वं॥
अनेके रागा भैरवरामकल्यादयो यस्यां मूर्छना एकविंश
तिः सप्तस्वराणां प्रत्येकं ग्रामत्रयं स्वराः षड्जादयः सप्त
तेषां सत्ता यस्यां॥ भगवद्गीता तु पुरुषोत्तमोपज्ञं वैरा
ग्योपादिकाः मोहविध्वंसिन्यश्च॥ स्वर्गप्रापिकाश्च॥ किं
नरः देवगायनः कुत्सितनरश्च॥ रागः विषयप्रीतिः
रामकल्यादिश्च॥ मूर्छना मोहः एकविंशतिश्च॥ स्वरित्यव्य
यं स्वर्गवाचि इति भावः॥ षड्जादिसनाथेति॥ ११६॥ ...सप
री... हरिगुणश्रवणमेव चकार तत्फलमित्याह॥ युक्त

मिति ॥ विश्वस्य देवः नाथः हरिस्तेन श्रितः यः उत्तरागर्भस्त
त्रभावः ॥ अश्वत्थामप्रयुक्तं ब्रह्मास्त्रं ॥ भगवान् गदापाणिः ग
र्भस्थः सन् निवार्य परिक्षिद्रक्षणं कृतवानिति भागवते प्रत्य
गृशि स्वरूपज्ञाने स्थितः ॥ भजनस्य मध्ये विष्णोः श्रवणमेव
ददर्शेति फलं ॥ विश्वैर्देवैः श्रिता देवतात्वेन साउत्तरा उत्तरा
षाढा तत्रस्थः ॥ प्रत्यक् पराचीनायादृग्दृष्टिः ॥ तत्रतिष्ठति
तथाभूतश्च ॥ विष्णुदेवताकं श्रवणमेव भजनस्य नक्षत्रजन
स्य मध्ये पश्यति ॥ प्रममोपनत्वात् ॥ अश्विन्यादिनक्षत्राणि हि
शुश्रुमारचक्रे स्थितानि प्रागगंति ॥ ११७ ॥ तत्र नाम्ना प्राथा
न्यात् देवस्तवन्भाही नाम कामं जयंतीत्याह ॥ स्त्रीति ॥ साधोः
सतः महेश्वरस्य महासमर्थस्य शिवस्य ममच ॥ यथा ममस्त्रि
यमदंगे वहतोपि नामजपप्रभावात्स्मरो ग्रतः स्थातुं नशक्तो
भूत् ॥ एवं नामसंकीर्तयितुरपीति दर्शयन् ॥ ११८ ॥ सत्वप्र

धानानीति॥ भावप्रधानमाख्यातं सत्वप्रधानानि नामानीति
यास्को नाम ऋषिः नैरुक्ते नाह॥ यतः नाम सत्वप्रधानं सत्वं
स्कंदकारणं तस्मा नामैव स्कंदायकल्प्यते॥ १९॥ नामज्ञान
प्रापकमित्याह॥ भोमानवा इति॥ वद्ध्वं भासमाना श्रूत॥ भा
सनोपसंभाषेत्यात्मनेपदं॥ स्कप्रत्ययः॥ सम्यक्ज्ञानं॥ अविशे
षतः॥ स्त्रीशूद्राणामपीत्यर्थः॥ नकेवलं ब्राह्मणानामेवेति॥
अनंतःशेषः॥ भगवानेव वा॥ अनंतः शेषावतारः॥ पतंजलिः
॥ एकवचनमुत्सर्गतः॥ करिष्यामीति॥ नाम्नः प्रादिकमात्रा
त्स्कप्रत्ययं एकवचनं विधत्त इति॥ १२०॥ नाम्ना मुक्तिर्भव
तीत्याह॥ मंथानमिति॥ मंथानं मंथनदंडं॥ आम्नायो वेदः॥
द्विव्यात्मने द्विव्यदेहाय॥ धन्यतमाय॥ धनहेतुधन्यः सुर
तिशयबलेन च॥ २१॥ श्रीरामेति॥ भिन्नात्मनां द्वैतं॥ भिन्नपद
तां च॥ ऐक्यमद्वैतं एकपदतां च॥ नानरः कुत्सितजन्मा॥ ना

म

कुः वाल्मीकं ॥ तस्माज्जन्म यस्य स वाल्मीकिरित्यर्थः ॥ नाकुजन्मे
ति ॥ भगवद्भिन्नात्मतयास्थितं तन्नाकुजन्मेति एकपदमभूत् ॥
॥१२२॥ नामपराङ्मुखं निंदति ॥ बहिष्करतइति ॥ गोत्रं नाम ॥ ज्ञा
तयश्च ॥ २३ ॥ बहुदोषेति ॥ बहुदोषविशिष्टसंसारजन्य उपतापः
संतापः बहवः प्रबलाः ये दोषा वातादयः तेभ्यः उत्पन्नः यः
उपतापो रोगः विकृतिं असद्ग्रहं स्वधर्मत्यागादिकं रोगांत
रेच ॥ नामरसायनं आमरसायनं न भवति तच्च ॥ आमरसायनं
सेवितं उद्दिष्ट रोगं वारयेद्वा नवेति संशय एव परं रोगांतरं अ
वश्यं कृष्ण इति उद्घोषयेत् ॥ अक्षरं ध्रो भेदपुरः सर कृष्ण सायु
ज्यमाप्नुयात् ॥ + मुसादये दिति तादृशं दंतं भवति ॥ २४ ॥
योघातुक इति ॥ घातुकः हिंस्रः अघः पाप्म ॥ यदृच्छया कृष्ण
कृष्ण [illegible] + यथा कृष्णं जिघांसुः अघासुरः कृष्णकंठ
त्वेन मूर्धानं भित्वा तत्सायुज्यं गतः ॥ अघासुरः सर्परूपः कृष्ण

॥२५॥

जिघांसया मुखं व्यादाय वने स्थितः ॥ गोपशिशुभुगदूरधि
यांतः प्रविष्टेष्वपि कृष्णं प्रतीक्षमाणोभूत् ॥ भगवता तत् ज्ञा
त्वा तत्कंठं प्रविश्य शरीरं वर्धयित्वा तत्कंठनालरोधः कृतः
अथ घ्राणरोधे जायमाने मूर्धानं भित्वा तत्सायुज्यमापेति श्री
मद्भागवते स्पष्टं ॥१२५॥ नाम ईदृशं सदपि अति मधुरमित्या
ह ॥ अंगेति ॥ संबोधने ॥ अद्भुतरसो दुग्धरसो मोक्षरसश्च ॥
हृद्यः वक्षसि भवः [प्रि]यश्च ॥ क्रमः परिपाटी बालान् शिशू
न् अज्ञानिनश्च ॥ अद्विजान् दंतरहितान् शूद्रादींश्च ॥ सन्दरः अ
न्नरसः ब्रह्मरसश्च ॥ सद्विजान् दंतसहितान् उत्तमद्विजान् ना
रदादींश्च ॥ २६ ॥ श्रीरामेति ॥ मृद्विका द्राक्षा तस्या यो रसः त
स्य रूपं तुच्छं भासते यतस्तत् ॥ मृदः [illegible] विकारस्त
द्रूपं ॥ उपसपसर्गस्य यत्र मतुप्ष्वे बहुलमिति पाक्षिके दीर्घः

सुधां

परिहारवत् ॥१२७॥ श्रीरामेति॥ शर्करांसितां अमृतं परार्धत्वे
न अन्यथावाचकत्वेन मन्यते॥ ननु प्रसिद्धशर्करामृतवाचकत्वेन
शर्कराचूर्णद्विपत् सुधाचूर्णं॥२८॥ ननु नामैव तादृगमधुरं चे
दनुभवारूढं कुतो न जायते नहि माधुर्याभिज्ञाः कश्चित् गुडश
र्करादिकं परित्यज्य तत्कार्यकारित्वेन नामान्यनुसंकीर्तयतीति
चेत्तत्राह॥ मन्य इति॥ ईशितुः परमात्मनः रामेति नाम वेदा
म्रवृक्षस्य व्यूढं विशालं फलमस्ति॥ तत्प्रथमतस्तु गूढमाधुर्यं
॥ तत्र अनुतापे वैराग्ये उष्मणि च सति रागः तद्विषयप्रेमा॥
तन्निष्ठो रक्तिमा च॥ महामोदः परमामोदः गंधश्च॥ चोक्षेस
म्यक् पक्वे॥ स इसः ब्रह्मरसः श्चोतति क्षरति॥ यथाम्रफल
मादावम्लमवातस्य च॥ पानकसमये उष्यापेक्षा॥ अन्यथा
दार्ढ्यमावहत्॥ न सम्यक् पच्यते॥ ततस्तत्र आमोदस्तुद्गिरन्

रन्नमो देति ॥ ततो वृक्षा इव भित्यचो षितमात्र एव रसं मुंचंति ॥ यद्वा इद
म पीति एतेन परिपाकः पर्यंतं वेदोदित कर्म साहित्येनैव कीर्तनं ॥ जाते
परिपाकेन कर्मण्यासंग संग इति सूच्यते ॥ तावत्कर्माणि कुर्वीत इति
भागवते ॥१२९॥ नाम्नः साक्षात्संकीर्तनं महाफलमिति किं वाच्यं ॥ य
देतस्य यत्र्काऽपि संसर्गोऽपि महाफलमित्याह ॥ न हि षंतीति ॥ दुराचा
रपी उक्ता अपि ग्रहा न चंद्रं द्विषंति ॥ विधोर्नो रिपुरिति ज्योतिषात् ॥
रामचंद्र इति । पदे चंद्रस्य रामसंसर्गो जात इति ॥१३०॥ चंद्र इति ॥ न
सुशीलः न च क्षात्र शाली नापि बलिष्ठः नैव कीर्तिमान् ॥ न पुर्ण्यशीलः पुण्य
न च बुद्धिमान् ॥ तथापि राजभाव मापन्नः ॥ परदारारतारा नक्षत्रमा
र्ग आकाशः क्षत्रमार्गाभावश्च ॥ कलंकः अंकः गर्हितं च ॥ अंतर्जडः मं
दः अंतर्जलश्च ॥ जलमयमंडलत्वात् ॥ राजा भूपश्चंद्रश्च ॥१३१॥ जात
सन्निभेति ॥ वारुणीं प्रतीचीं दिशं सुरां च ॥ शुभ्रांशुः श्वेतकिरणः श्वे
तद्भूषितपादश्च ॥ ब्रह्मघ्नः शिवः तेन हि चतुराननस्य पंचमशिरश्छेदः

द्रः कृतइतिपुराणादौ ॥ चंद्रचूडत्वात्संसर्गः अन्यत्र प्रसिद्धं ॥ द्विजेंद्रः चंद्रः ब्राह्मणश्रेष्ठश्च ॥ ३२ ॥ जातस्येति ॥ जैवातृक आयुष्मान् ॥ चंद्रश्च ॥ हिमकरः यस्य हस्तपादाद्यवयवा पिशीनता जाता एतावान् क्षयी आसन्नमरण इत्यर्थः ॥ एतैश्च उक्तदोषफलयुक्तः ॥ तथापि जैवातृकः ॥ ३३ ॥ विश्वस्येति ॥ सर्वत्र सर्वेषां ग्रहाणामानुकूल्यमपेक्षंते ॥ प्रायेणेति उक्तेः चंद्रबलं प्रोक्तं कृष्णे ताराबलं स्मृतमिति अपि प्रायेण ॥ ३४ ॥ चंद्रेयमिति ॥ चंद्रस्य बहुदोषेष्वपि सर्वग्रहाः प्राणिनां साध्वसाधुफलदाने अस्यैव बलमपेक्षंते ॥ तत्र नाम नाम वैभवप्रसंगजं ॥ अमृतकीर्णरश्मेः वीर्यमादाय सर्वे ददति हि फलमेते प्राणिनां साध्वसाधु इति श्रीपतिः ॥ ३५ ॥ रामेत्यानुपूर्व्याः संसर्गे महाफलमिति किं वक्तव्यं ॥ यदानुपूर्वीभंगे नापि यथाकथंचिद्वर्णग्रहणे फलमित्याह ॥ द्वाक्षादीनीति ॥ राम इत्यत्र यो रेफः आकारः मकारः अकारः इति वर्णचतुष्टयं तदा आम्रेण गृहीतं ॥ यथा वाल्मि

अ

रा

॥ २७ ॥

आकार इति ॥ ३६ ॥

क्लिना ॥ मरेति ॥ तथा आकारः मकारः रेफः ॥ चाप इति ॥ रैमो इत्य
त्रापि म् आ र् ॥ अ ई इति वर्णचतुष्टयं ॥ ३७ ॥ अत्यंतमिति ॥ रमा
इत्यत्रापि र् आ म् आ ई इति वर्णचतुष्टयं ॥ द्वेधा अभ्यंतरे बाह्ये च ॥
॥ १३८ ॥ पापा इति ॥ पापा अपि रामेति नामसंसर्गमात्रेण लेखेषु देवे
षु सर्वोपरि स्थितिं दधति ॥ परमे ते निरक्षरा अपेक्षिताः येनैषां द
ढाभक्तिर्भवति ॥ अधिवर्तां तु चितकाकुलतया दृढसत्त्वाभावात् ॥
यत् रेफात्मनि रेफरूपे कुत्सितात्मनि च नापवर्गभवने अपव
र्गो भवनं यस्य स न भवति अपवर्गभवनः स न भवति नापवर्गभवनः
पवर्गी इत्यर्थः ॥ जघन्ये चरमे वर्णे मकारे ॥ मोक्षायोग्यो न भवति
तादृशे नीचवर्णे च ॥ रामेति संसर्गस्य फलं दृश्यते ॥ यल्लेखेषु ले
खनेषु सर्ववर्णोपरि रेफमकारौ स्थितिं कुरुतः परमे तौ निरक्षरौ
स्वरैर्लीनेत् ॥ यथा भर्गः संज्ञा ॥ नतु सरसः समर इत्यादौ कस्मा
त् साक्षरत्वात् अक्षरं तत्कमक्षरत्वादध्ययनं अकारादिस्वरजा

रहि

तेन॥ परे ब्रह्मणि दृढा भक्तिः परवर्णेषु च॥ खेरवः देवः खेरवनं च ॥रेफः रवर्णः कुत्सितश्च॥ नापवर्गः भवनः अपवर्गस्थः मोक्षा हिश्च॥ जघन्यः अंत्यः नीचश्च॥ वर्णः अक्षरं ब्राह्मणादिश्च॥ ३९॥
किंबहुना नामेदं रामादृप्यधिकमित्याह॥ परमिति॥ रामेण तु एका अयोध्यैव परंपदं नीता॥ खरो दूषणश्च॥ एकैक एव हतः विश्वामित्रमखश्च एक एव विहितोपघाताद्रक्षितः॥ नाम्ना तु त्रिभुवनं परपदं नीयते अनेकानि खरदूषणानि हन्यंते यस्यस्मृत्ये त्यादिना विहितादविहिताच्चोपघातात्॥ विहिते प्रतिपादोक्ते प्रायश्चित्ते कृतेपि तदीयवैगुण्यापनोदार्थ अविहिते त्वपादितदेवेति मखमात्रं रक्षते॥ ४०॥ रंजतीति॥ नाम सुशीलेषु वरं श्रेष्ठं जनं करोति॥ रामः सुशीलवयोः पुत्रयो रंजनं लालनं करोतीति॥ अर्थांतरं॥ रामावतारयोगेन रघुवंशस्य सूर्यवंशस्य भूषणं भवतीति॥ ४१॥ अतएव भगवान् महेश्वरः परमोत्कृष्टमिति कृत्वा नाम

॥२८॥

साधकस्मरती त्याह॥ महेशइति॥ ४२॥ आद्यो रातत्पदस्या
र्थे मकारस्त्वं पदार्थवान्॥ तयोः संयोजनमसीत्यर्थे तत्त्ववि
दो विदुः॥ तत्त्वमस्यादिवाक्यं तु केवलं मुक्तिदं मतं॥ मुक्ति
मुक्तिप्रदं चैतत्तस्माद्व्यतिरिच्यते॥ इति रहस्योपनि
षदं मनसि निधायाह॥ मित्रक्षेत्रेति॥ कूर्चश्मश्रु॥ मि
त्रादि सर्वं हित्वा भिक्षाटनं आदिश्य॥ त्यक्तुं पुनस्मरेदि
ति दंड निर्दिश्यं तत्त्वमसिवाक्यं श्रुतिगोचरं भवति॥ दं
डः वैष्णवः अपराधशिक्षार्थं क्रियमाणश्च॥ १४३॥ रात
न्मेति॥ रकारस्तत्पदार्थः॥ मकारस्त्वं पदार्थः॥ तयोर्योगः॥
असिपदार्थः॥ एतन्महावाक्य सर्वेषामाचांडालं सकलं॥
तत्तु श्रीलक्ष्मणानामेव नेतरेषां॥ तत्तु एकांते गुरु शिष्यैकस
मधिगम्यं॥ इदं तु वाद्यघोषपुरःसरं सर्वत्र विराजते॥

तन्तु सर्वं त्यक्त्वा श्राव्यं॥ इदं तु सर्वं त्यक्त्वतो वत्सं दुक्तिम
पयिति॥ भगवता रामेण वरं वृणु इत्युक्ते॥ त्वन्नामस्मरतो
राम न तृप्यति मनो मम॥ अतस्त्वन्नाम सततं स्मरन् स्था
स्यामि भूतल इति हनुमता सर्वत्र विरज्य नामन्येवार्थि
ते जगज्जनन्या जानक्या॥ तमाह जानकी प्रीता यत्र कु
त्रापि मारुते स्थितं त्वामनुयास्यंति भोगा सर्वे ममाज्ञ
येति आहृतः॥ यश्च सीता हेव्या आहृतः स आनंद
मुक्त्या जीवन्मुक्तेणाहृतः॥ विमयत्वात्॥ ४४॥ अनंताका
रमिति॥ एतद्रामेति नाम॥ अंतेयः आकारः॥ तेन रहित
मपि॥ राम्॥ इति बीजं भवति॥ तच्च अनंताकारं॥ य
थैव वटबीजस्थः प्राकृतमहाद्रुमः तथैव रामबीजस्थं
जगदेतच्चराचरमिति श्रुतेः॥ विपरीते कृते मरा इति

॥२९॥

गातं चेदपि व्यतीहारः संपद्यते॥ सोहमहं स इतिवत्॥
व्यतिहारो विशीषतीति ब्रह्मसूत्रात्॥ अत एव वाल्मी
के स्तत्फलदमभूत्॥ ८५॥ मोक्षपदवीं प्रस्थितवतां
पुरस्थिता भगवद्गुणरहिता वाणी न कल्याणी नत
द्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित्॥
तद्ध्वायसं तीर्थमुशंति मानसा न यत्र हंसा निरमंत्युशि
क्षया॥ १॥ इति शुको क्तिरित्याह॥ अपीति॥ यथा ललि
तसुकृदामग्रथित वेणी॥ अलंकृता॥ उत्तमांगकांति
रपि रमणी लघुनातिलकेन विहीना यथा ग्रामांतर
प्रस्थितानां न कल्याणी॥ पुरस्थिता तथा उत्तमा प्रासा
दादिकाव्यगुणानां प्रवाहो यस्यां उपमाद्यलंकारवती॥
वर्णरचनापि मधुरा यस्या॥ तादृश्यपि वाणी रघुतिलकेन

रामेणहीनाचेन्नकल्याणी॥१४६॥ ननुवाक् शुद्धिर्वैय्याकरणीया सह मंतरेण नघटतइति॥ किंहरेरूपासनेने तिचेन्न॥ हरेर्वैय्याकरूणरूपत्वादित्याह॥ भावप्रधानमिति॥ यस्यव्याख्यातं कीर्तनं भावप्रधानं॥ भक्तिप्रधानं॥ आख्यातेति ऊर्लंच॥ भावप्रधानं देवदत्तोगच्छतीत्यत्र देवदत्तकर्तृकं गमनमितिबोधः॥ ननुतार्किकवत्॥ गमनानुकूलव्यापारवान् देवदत्तइति॥ यस्यप्रत्ययः प्रतीतिः प्रकृतेर्बुध्यादिभ्यः परःयोबुद्धेः परतस्तस्कतइति॥ प्रत्ययः स्फ पूर्तिर्ह्रदि॥ प्रकृतेः नामधात्वादिभ्यः परः प्रत्ययः॥ परश्चेतिसूत्रात्॥ शेषगिरिः व्यंकटाचलः॥ शेषावतारस्यपतंजलेर्गिरिवाग्मि॥ उत्तरोत्तरं मुनीनांप्रामाण्यात्॥१४७॥

॥३०॥

॥ किंच भगवान् श्रीरामो वैय्याकरणादपि विशिष्यत इति [illegible]
[illegible] तावा श्रयणीयइत्याह ॥ नोजात इति ॥ हरेः प्रत्ययः स
कृज्जातो न लुप्यते ॥ इयं ज्ञानकलावंतः सकृज्जातापि व
र्द्धत इति वसिष्ठो क्तेः ॥ तस्य तु राजन् कृ इत्यत्र प्रकृतेः प
रोजातोपि कृरूपोपि प्रत्ययः लुप्यते ॥ हल्ङ्याब्भ्यादि सूत्रात् ॥
किंच यस्य हरेरादेशः क्वचिन्न विकल्प्यते ॥ भीषास्माद्वातः
पवत इत्यादि श्रुतेः अस्य तु हरएहि हरयेहि इति लोपः शा
कल्यस्येति लोपरूप आदेशः विकल्प्यते यस्य भगवतः वृद्धिः
परकीयगुणं न बाधे किंतु परगुणरसिकैवाभूत् ॥ यद्वा
यस्य वृद्धिः परिस्फूर्तिः तथा तथा गुणस्य मैत्र्यादिकस्या
पि वृद्धिरेव न बाध इति ॥ अस्य तु वृद्धिरेचीति वृद्धिः ॥
आद्गुणं बाधते ॥ गंगौघ इत्यादौ ॥ ७२ ॥ हे वाणिय येवं ।

मन्यसे॥ किमिति॥ अग्निर्मेवा विश्रित इत्यादिश्रुतेः॥ उत्प
न्नैवाहं अग्निनाधिष्ठितेति कथमन्यं भजेयेति चे न्नैवं तदाश्र
यो नस्वार्थहेतुरित्याह॥ त्वदधिपतिरिति॥ आश्रयाशः आश्र
यस्य आशा यस्येति॥ स्वातंत्र्याभावः॥ आश्रयं अश्नातीति च
॥ हरिस्तु सर्वाश्रयप्रदः॥ अग्निस्तापं जनयति॥ हरिस्तु अ
नेकतापहा॥ नानात्वहंता च॥ १४९॥ तस्मात्सुखहेतुः गुणवा
न् श्रीमानेव आश्रयणीय इत्याह॥ शोभंतइति॥ अग्निः प
तिरस्तीति दुस्तर्कं मा कृथाः॥ यत्सर्वस्त्रीसाधारणमिदं॥ त
था च श्रुतिः॥ सोमः प्रथमो विविदे गंधर्वो विविद उत्तरः॥ तृ
तीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्य इति॥ एवं चाग्निपति
रिति कृत्वान काभिरपि तुरीयो वृतः॥ अपितु प्रियतएव॥ त

॥३१॥

स्मात्वंतुरीयं मनुष्यजं वृणु ॥ सच श्रीकृष्ण एव ॥ नान्यः ॥ यद्य
ग्निनातव विवाहो भविष्यत्तर्हीदं वक्तुं सांप्रतमभविष्यत् ॥
स तव विवाहोऽस्ति ॥ अविनामेषेण वाहितश्च ॥ कृष्णस्य विवा
हितोऽस्ति परं त्वं मुग्धत्वान्नजानीषे ॥ विना गरुडेन वाहितः ॥
तस्माद्विवाहितं स्वतः सिद्धं कांतं ककारांतत्वात् ॥ श्रीनायकं
परित्यज्याविवाहितेन रमणं मुख्यानां स्त्रीणां दूषणायेत्याह ॥
न स्वप्नेपि ॥ मुखे भवा मुख्या ॥ १५० ॥ एवं भगवत्स्तुतिं कर्तव्यां
विधाय नरस्तुतेर्दूरतरोत्सारणं कार्यमिति साधयति ॥ अंगे
ष्विति ॥ अंगेषु अवयवेषु मुख्या मुखे भवा असि ॥ हंतमध्य
वर्तिनि ॥ शब्दानुसंधानपरा ॥ अंधसि अन्नेऽस्थिरप्रेमरसोय
स्यां ॥ कर्णपक्षे ॥ अंगदेशेषु मुख्यः अधिपतिः ॥ द्विजमध्ये
विप्रमध्ये संस्थितिर्यस्य ॥ याचके वैश्वित इति यावत् ॥ यद्वा

द्विजाः क्षत्रियाः तत्रसंस्था प्रतिष्ठा यस्य ॥ ननु केवलं पुनरस्य कु
थं क्षत्रेषु संस्था ॥ यद्यं बाणानुसंधानपरः महाधानुष्कः ॥ अंधे
धृतराष्ट्रे स्थिरप्रेमरसो यस्य ॥ तदीयसंततिहितनिरतः ॥ नरः
अर्जुनः ॥ प्राकृतजनश्च ॥ १५१ ॥ जिह्वे इति ॥ मुखे भवो मुख्यो यो
रसः उत्तमरसश्च ॥ द्विजा इंता ब्राह्मणाश्च ॥ अयं भावः ॥ रसज्ञ
मुखे नहि हरिगुणोल्लसनं परमरमणीयमिति तां त्वयि ज्ञात्वा भग
वत्कथा त्वाभार्यमेते द्विजास्त्वां परितआसन् ॥ त्वं नप्रौढेति कु
त्वा ॥ तादृश्यां त्वयि पुनरागमिष्याम इति एकदा निर्गतास्ततः
त्वां प्रौढं ज्ञात्वा पुनरागमस्य स्थिताः त्वत्परितोषायापि त्वद्ल
न्याये इक्ष्वादीनां रसास्ते पितुभ्यं इलवंतः ॥ तथापि त्वयि राम
कथा तात पि नास्तीति निर्विण्णा रुष्टाः संतो निर्गंतुमारब्धाः
संति ॥ अधुनापि तर्हि अनभ्यस्तेन कीर्तनेनालं ॥ केवलं रामे

॥३२॥

स्यपिबदेति॥१५२॥ इदानीं श्रीशुकं नैमेव परिशीलित
मितितद्ध्कमित्याह॥ यक्कमिति॥ स्वपंजरगत:॥ स्व:
आत्मा स एव पंजर: स्वकीयपंजरश्च॥ अन्यपंजरे
स्थापितश्चेत्तत्रत्येन सहवासाभ्यासम्यक् ब्रवीतीति
च हरे स्तत्वं॥ हरितत्वं हरिद्वर्णत्वं च॥ पक्षपातं आग्रहं
॥पक्षै: पातं गमनं च॥ व्यक्तं यदक्षरं ब्रह्म सगुणं रामकृष्णा
दि॥ स्पष्टाक्षरं च॥ यथा स्यात्तथा शुकाख्य: कीर: योगी
द्र: श्च द्विजेंद्र: पक्षिश्रेष्ठ: द्विजश्रेष्ठश्च॥ राजेंद्रं परी
क्षितं राजश्रेष्ठं च॥५३॥ कीर्तनप्रसंगेन तालिकावादनं
स्तौति॥ तालिको ति॥ तालिका प्रसिद्धा॥ उद्घाटन
यंत्रं च॥ किल्लीति भाषा॥ अस्या द्घोटनयंत्रं तु तात्यपि

प्रतिताव्यापीति हैमः॥ नामादेशः॥ नामसंकीर्तनं नाम्ना
आदेशः॥ निदेशः॥ मुद्रितकपाटोद्घाटनेनांतस्थवस्तु
दर्शनाय राजानो द्युतीं गतिं आचरंति॥ अमुकोयमागत
एवं प्रतिकपाटमुद्घाटय अंतर्वस्तु दर्शितव्यमित्येवंरू
पः संदेशः॥ भृत्यद्वारा लेख्यद्वारावा॥ अन्यानालिका
दानं॥ एतद्द्वयमंतरेण मुद्रितकपाटोद्घाटनं न संभवति
॥१५४॥ पिष्टातैभक्तिःस्थूलत्वं वर्णयति॥ संतइति॥ पि
ष्टाताः॥ सुगंधिचूर्णानि बुका इति प्रसिद्धः॥ कीर्तनमध्ये
यदेतद्दाचरंति॥ तस्यायमभिप्रायः॥ वक्तृश्रोतृणां भाले
श्रवणाया [illegible] जन्ममरणानां परंपराल्लिखितासा सर्वे
षां कीर्तनजनितहरिप्रसादेन मार्जितैवेति॥ रूपकं अनु

करणं ॥१५५॥ निद्रेतिस्पष्टं ॥५६॥ अथ स्मरण भक्तिमाह ॥
अच्युतमिति ॥ भगवत्पदं ॥ ब्रह्मपदं च ॥५७॥ स्मरणस्य
मनोधर्मत्वात् प्रार्थ्यते ॥ चेत इति ॥ फले कर्मणां फले
वृक्षफलेषु ॥ सुमनसः साधवः पुष्पाणि च ॥ खले दुर्वृत्ते
अणके कुत्सिते प्रेमाणं धत्से ॥ चाणके चणकानां भूमि इंत
त्र ॥ खले प्रसिद्धे विटपान् । वृक्षविस्तारान् रोजौश्रे
ष्ठांश्च ॥ वलं वसे ॥ अवाप्योरुपसर्गयोरित्यनेन वकारलोपः
॥५८॥ रेरेमित्रेति ॥ पंचत्वोत्तरं मनोभृंद्र मखिलयोभ स
वति इति श्रुतिसिद्धमर्थं मनसि कृत्वाह ॥ ममअमृत
करे लयः स्यादिति किं तेन जन्ममरण निस्तारो भवति ने
त्याह ॥ भवः शिवः सिंधुः समुद्रः भवसिंधुश्च ॥ दोषा
करोंतजलि इति गले ॥ रात्रिंचराः राक्षसाः चापलता

भानुवल्ली चांचल्यं च ॥ चापलश्चपल इति द्विरूपः ॥ अमृतं
मोक्षं ददाति ॥ चंद्रस्तु अमृतं करैः कृत्वा प्रद्योतयति भानु
र्ददाति ॥ १५९ ॥ गतार्थः पूर्वश्लोकेन ॥ ६० ॥ सांतेन सांताश्रय
ददाति ॥ सांतं अंतसहितं सकारां
तेकृते किं स्यादित्याह ॥ मन इति ॥ नाशरहितं भगवंतं ॥ ननु ममाधिपतिश्चंद्रो
तेन च ॥ अनंतं नाशरहितं भगवंतं ॥ ननु ममाधिपतिश्चंद्रो
स्तीति तं विहाय कथमन्यं भजामि चेन्नैवं तदाश्रय स्या
त्किंचित्करत्वात् ॥ यतः स हि चंद्रमाः स्वयं सांत इति कृत्वा
अनंतपदं विष्णुपदं आकाशपदं च ॥ ६१ ॥ ररे चित्तेति ॥
द्वैतं भेदं द्वयोस्तकारयोः समाहारः द्वितं तदेव द्वैतं ॥
द्वितकारात्मतां त्यज ॥ तत्वश्चित्तु इत्यर्थं विरतं ॥ एकत्वं अ
भेदं एकः ॥ तू ॥ यस्य एक तू तस्य भावः एकत्वं ॥ एक
हलरूप तकारं भज ॥ ततश्चित्तु भवति इति ॥ ६२ ॥ अयी
ति ॥ उत्कृशयते बाधते उपस्थितवमनमिव करोति ॥

॥ २४ ॥

68

सम्यक् असिता कृष्णा रुचिर्यस्य सचासौ राज्यसंभृतः ॥ राज्यभावापन्नत्वं ॥ समान्यूनाधिक्यप्रमाणरहिता ॥ सिताशर्करा यस्मिन्तच्च तद्रुचिराज्यं सद्यस्कघृतं तेन संभृतं च ॥ महागदं महतीगुडाय स्यतं ॥ कृष्णं कण्ठं च ॥ ॥ १६३ ॥ अधेति ॥ पूर्णं द्रव्यं वित्तं यस्य पूर्णवित्ता श्रद्धा संपन्नता च ॥ ६४ ॥ अथ यत्र [illegible]हादः स्मरणं प्राधान्येन चकार तद्धनमित्याह ॥ पित्रेति ॥ पित्रा हिरण्यकशिपुना पितृव्येण हिरण्याक्षेण नामशेषतां लोपं ॥ श्रुतिः श्रवणं वेदश्च ॥ धर्मः भगवत्सेवारूपो जीवनिर्वाहः नित्यनैमित्तिकरूपश्च ॥ स्मृतिः स्मरणं मन्वादिधर्मशास्त्रं च ॥ धर्मानुष्ठाने प्रत्यक्षश्रुत्यभावे स्मृतिरेव प्रमाणमावहति ॥ इति ॥ ६५ ॥ पादसेवनभक्ति

माह॥ प्राज्ञानुभूत इति॥ यः प्राज्ञैर्ब्रह्मादिभिरनुभूतः

स्व प्रत्ययः॥ आत्मज्ञानं यतो भवितो॥ सश्री मनोहरैः प्र

सादः पादाधारं विना किं सिध्येत॥ तस्मात्सोपेक्षितः य

था प्रज्ञ एव प्राज्ञ इति प्राज्ञेनानुभूतः स्व प्रत्ययः स्वार्थ

प्रत्ययः अण् प्रज्ञादिभ्यो अण्॥ इति सूत्रात्॥ सर्वस्मा

द्भविता स आत्मस्य प्रसादः नाम प्रसादः प्रसादशब्दा

दिनिष्ठ ते प्रसादो भवति सद्दृढं पादाधारं विना न स्यात्

तथा॥ पादो नाम पाषाणादिभिः प्रासादान्तलभूमिगर्भे

ज्ञ द्व्यधिं पूरणं॥ १६६॥ अपीति॥ सकामतयापि वैकुंठो

विष्णुः लोक विशेषश्च॥ ६७॥ नेति॥ सर्वदा विष्णुपद

सेवनं कुरुत॥ तत्फलं नरस्य सर्वथा कृत कृत्यता॥ तत्रा

यमेव दृष्टांतः॥ यथा नरस्य पापस्य एवं सामान्यतः

कृतकृत्यतामुक्त्वा विशेषाकारेणाह ॥ द्विजाधीश्वरः

ब्राह्मणः सदाचरणतत्परः अमृतकरः अमृतं मोक्षः

मोक्षश्च करे यस्य ॥ जीवन्मुक्त इत्यर्थः ॥ परं ततः प्रार

ब्धसंक्षये ॥ अमायां सर्वथा मायाया अभावं गतः सन्

परं धाम्नि कर्मसाक्षिणि ब्रह्मणि विशति ॥ विदेहकैव

ल्यमाप्नोतीत्यर्थः ॥ अत्र दृष्टान्तोयमेव ॥ यथा द्विजा

धीश्वरश्चन्द्रः ॥ सदाचरणतत्परः विष्णुपदस्थितः

आकाशस्थितः ॥ अमृतकरः सुधाकरः स च अमायां

अमावास्यायां गतः परमधाम्नि कर्मसाक्षिणि सूर्ये

विशति ॥ विदेहमाप्नोति तद्वत् ॥ नन्वेतेन ॥ स्वधर्मे नि

धनं श्रेय इति साक्षाद्भगवता कर्तव्यत्वेन प्रतिपादितस्य

स्वधर्मस्य त्यागः अंगीकृतो प्रतिपद्यते इति चेन्न ॥ सर्वतः संप्लुतो

दृक् स्थानीये भगवच्चरण सेवने स्वंधर्मा स्यापि संपद्यमा
नत्वात् ॥ तथाहि ॥ यो द्विजः सद्वाचरण तत्परः स सद्वा
चरणे विहिताचरणे तत्परो नेतिन ॥ तथा योमृतकरः स
यज्ञशेष हस्तो नेतिन ॥ तस्य श्रौत स्मार्तो भयमपि तत्रै
वचसंपद्यत इति अथ द्विजाधीश्वरः क्षत्रियः येषामु
पनयनं ते सर्वे द्विजा इति ॥ क्षत्रियवैश्ययोरपि द्विज
त्वात् ॥ चंद्र इष्टांत सहितः प्राथमिकोर्थः पूर्ववत् ॥ त
स्य धर्म्याद्धि युद्धाछ्रेयोन्य क्षत्रियस्य न विद्यते ॥ इ
ति धर्म संपादनं तु यथा ॥ यःक्षत्रियः सद्वाचरण तत्प
रः ॥ सः सद्वाच ॥ रणे युद्धे तत्परो नेतिन ॥ तथा योमृ
तकरः सः अमृताः जीवंतः कराः करभारा यस्य
स नेतिन ॥ अथ द्विजाधीश्वराः वैश्याः प्राथमिकोर्थः

॥ ३६ ॥

सदृष्टांत: पूर्ववत्॥ तस्य कृषिवाणिज्यगोरक्ष मित्तिधर्मसं
पादनंतु यथा॥ वैश्य: सदाचरणतत्पर: ससदाचरणे इतस्ततः
संचरणे वाणिज्ये अथवा अंतर्भावितण्यर्थेन चारणे गवादी
नां तत्परो नेतिन॥ तथा अमृतकर: दुग्धकर: अमृताजीवंति
कलामूलधनवृद्धि: यस्य॥ रलयोरैक्यात्॥ कलास्या मूल
रैवृद्धाविति मेदिनी॥ अथ शूद्रा:॥ द्विजा: त्रैवर्ण्यं अभी
श्वरा यस्येति प्राथमिकोर्थ: पूर्ववत्॥ परिचर्यात्मकं कर्मशू
द्रस्यापि स्वभावजमिति त्रैवर्णिकचरणसेवनरूपधर्मसंपा
दनं॥ यथा य:॥ सदाचरण तत्पर: सतादृशपरिचर्यावान्
वर्तितएव मृतं यावितं॥ अन्नादि करे यस्य॥ अथवा ब्राह्म
णभोजनस्यापि यज्ञत्वं॥ त्रय:॥ पाकयज्ञा हुता अग्नौ हुय
माना अनग्नौ प्रहुता ब्राह्मणभोजने ब्रह्मणि हुता इति सूत्रात्॥
ततश्चामृतं द्विजभुक्तशेषं करे यस्येति॥ ९६९॥ सर्वमङ्गलि

योगेन मद्भक्तो लभतेंजसा ॥ इति भागवतं ॥ सर्वोपरि वरीवर्ति
सदारामपदाश्रयः ॥ गणिकासंगिनोप्यस्मिन्नतिमुक्ताः सहस्र
सहस्रशः ॥ ६९ ॥ सदा रामपदस्य आश्रयः सन् आरामः स ए
व परं तस्य आश्रयः ॥ गणिका वेश्या यूथिका च ॥ अतीव मुक्ता
पुंड्रकाश्च ॥ ६९ ॥ किंच लक्ष्म्या व्यवहारदर्शनेनापि भगवत्पद
पद्मे अस्ति कोपि अनिर्वचनीयो विशेष इति गम्यत इत्याह ॥
विष्णोरिति ॥ ७० ॥ श्रीति ॥ तस्य पादस्य प्रतिमाभूतं सरोजं
कमलं ॥ ७१ ॥ वत्से इति ॥ विष्णुपदी भागीरथी सा च समुद्रकां
ता ततश्च रमाया जननीय द्वारमा समुद्रान्निर्गन्तुमारब्धव
ती तदा तया शिक्षिता ॥ किमिति ॥ विष्णुपदे स्फुरन्मधिकं ॥
किंच जगत्त्रयपूज्यत्वं च ॥ एतदुभयं तत्र त्वया मयानुभूतं ॥
अतस्त्वं तदेवाश्रयेति ॥ तेन सा सर्वदा तन्निष्ठा भवति इति
तात्पर्यं ॥ ७२ ॥ विरक्ता इति ॥ शिशुभावं विनां गुच्छे रसिते

जगत्युपहासः स्यादिति शिशुरभूत् ॥ शैशवमपि कृतक
मपि संशयानः सर्वभूतोपरमे ॥ यत्पुनर्जलमवशिष्टं तत्तु
जडं ज्ञानशून्यं नकिमपि ज्ञातुं समर्थं ॥ तत्रापि वटदलेलीनः
सन् ॥ महतामनुचिताचरणस्य परमदुष्करत्वात् ॥ एतेनापि
व्यवहारेण पूर्वो क्रोधः ॥ स्कसाध्य एवेति ॥ ७३ ॥ प्रासंगिकत
या लक्ष्मीकर्तृकपादसेवनमुत्प्रेक्षते द्वाभ्यां ॥ तत्त्वेति ॥ तीर्थं
भागीरथी पादे यस्य ॥ सा तु समुद्रपुत्र्या लक्ष्म्या माता भवति
॥ ७४ ॥ नेत्रारुण्यमिति ॥ लक्ष्म्या समुद्रमथनात्पूर्वं धन्वंतरि
णा सह एकत्रावस्थानात्तत्सकाशात् हृदयमधीतं ॥ किं तत् ॥ ने
त्रारुण्यं क्रोधेनापि भवति ॥ नेत्रप्रसादस्तु ॥ स्नेहैर्घृतादिभिः
पादोपचारेणैवेति ॥ ततश्च ॥ ममशीलं ॥ चंचलं ॥ भगवांस्तु स्थि
रात्मा ॥ स स्वस्मै कुपितस्तु स्यादिति आशंकया स्नेहसांद्रा
सती मुहुः पादोपचारं कुरुते ॥ कृतेस्मिन्सर्वदाक्षिप्रसादः ॥

आरूण्यापगमेन॥आरूण्यं नास्तिचेत्कोपो नास्ति॥ इति मुग्ध
भावरमणीयं॥१७५॥ पद्मसेवनप्रसंगात्पद्मस्य सौभाग्यमाहध
रामइति॥अमृतवृत्ति॥अयाचितवृत्ति॥अमृतेजलेवर्तत
इत्यमृतवृत्ति॥आत्मनोगुणाधानाय अधोवक्त्रमपि सत्॥
इति नाम नामिनोरभेदाध्यवसायेनयथावस्थितत्वं अधोवक्त्र
मपि नलिनमेव न तत्र कोपि विशेषः लीन॥७६॥ इति कस्य
चिद्द्रुगवज्जनस्य वचनमयथार्थ तदसहमानमिव तदेवपुनः
कर्तुं प्रवृत्तं तस्य कः परिणाम इत्याह॥ तोय इति॥अधोवक्त्र
मपिभूत्वा तपस्तप्तवत्॥तत्पुण्यवशेन श्रीसहिता प्राप्ता त
श्रिय आवासस्तत्रासीत्॥नपद्मभावः॥अधो वक्त्रभावेन सर
मताजाता॥यात्तु सरमतासौवास श्रीकृता रमया सहितस्य
भावः सरमता॥ ७७॥ ननु माभूत्पद्मसायुज्यं॥मुख्यलक्ष्म्या
निवासत्वात्॥पद्मे नलिनोपम्यं तर्हिस्यान्मेत्याह॥नलिनमिति॥

॥३८॥

मुख्या मामा या: लक्ष्म्या अंभासोयत्र॥ मुखे आद्यवर्णे म
कारस्य भासोयत्र च॥ आद्य: नकार: तत्र मकारादेशे नलिनं
मलिनं भवति॥७८॥ श्रीरामस्येति॥ चंद्र: पंचदश्यां पूर्ण
कल: सन् आत्मानं अतिरूपं मन्यमान: श्रीराममुखं जे
तुं गत:॥ गतमात्र एव तत्प्रभयाहतप्रभो भूत्॥ अथात्मनि
असूयां करोति॥ नखेत्यादि॥ तदा हि क्षीण: कुलगुरु: सूर्य मे
तत्पुत्रस्य दुर्दशतां कथयितुं तत्सामगत: सूर्येण तत्स वंशे
त्वा कोयमिति मूर्खशिशु: परमेतस्य रूपमपि सांत्वनं तुक
र्तव्यं॥ खलु॥ इतिविचार्योक्तं॥ रे आयुष्मान् अधुना रामवं
द्र इति शिक्षा: रामे त्वामुपमानं कल्पयति॥ उपमेयादुपमा
नगुणाधिक्यमिति सर्वजनितं॥ तत्कुलो ग्लायसि॥ हंहो कि
मेवं खलु इति स्वस्थ: स पुनर्वर्धते॥ जलध्यात्मजत्वात्
पुन: पुनराक्रम्यमेतद्देवेति जलधि: समुद्र: जडधीश्च॥७९॥

था

॥अथार्चनं॥ क्रमप्राप्तमर्चनमाह॥ गो इति॥ यो गवामंगेषु स्थितः अमृतरसः तासां तुष्टये पुष्टये न च भवति॥ तं ताभ्यो दुग्धभाजनगतं कृत्वा ताभ्यः पायितश्चेत्तुष्टिपुष्टिदो भवति॥ तथा अमृतरसः ब्रह्मरसः गोंतः मनआदिषु इंद्रियेषु अभिव्यज्यमानोस्त्येव परमसौ न तुष्टये पुष्टये न भवति॥ तर्हि सभाज्यते पूज्यते अस्मिन्निति सभाजनं पूजाधिकरणं प्रतिमादि तत्राबाह्य सेवितश्चेत्तुष्टिपुष्टिद इति॥ १८०॥ भगवत्पूजां विहाय द्रव्यार्थं प्रयतमानान्निंदति॥ नैरंतर्येणेति॥ अखंडतया स्वलाभः॥ आत्मलाभः द्रव्यलाभश्च॥ कथं नैरंतर्येणात्र द्रव्यलाभ इति चेत्॥ श्रीरामाराधनमिति॥ एवं च धनमयमपि श्रीरामाराधनं विहाय धनार्थं ये नराः सेव्यंते तेतु न राद्रव्यं न भवंति॥ अधन्याश्च॥ सत्कृतेषां धन्यता नास्ति॥ धन्याधनहेतवश्च न भवंति॥ आराधनमपि तेषां मतिदुष्करं॥ १८१॥

॥२९॥

नारायणेति॥ दक्षेण चतुरेण शिल्पिना निर्मितां॥ सतां विदुषां मतां॥ यथोक्तलक्षणसंपन्नत्वात्॥ वरेण धर्मेण प्रतिष्ठितं
विधिना संस्कृतां मूर्तिं प्रतिमां श्रयेत्॥ अर्चनं कुर्यादिति
यावत्॥ यथा दक्षेण प्रजापतिना॥ उत्पादितां मूर्तिं नामकन्यां वरः पतिः यः धर्मः एतन्नामा ऋषिः तेन संस्कृतां
विधिवत्पाणिगृहीतां आश्रित्य नरस्य नारायणेन सह वस्थानं तथा॥ धर्मस्य दक्षदुहितरि मूर्तौ नरनारायणौ यमलौ जाताविति भागवतार्थे॥ १८२॥ किंच सर्वस्यापि द्रव्येत
स्य फलं भगवत्पूजनमेवेत्याह॥ स्रग्गंधेति॥ श्रीफलं लक्ष्मीफलं बिल्वं च॥ ८३॥ प्रसंगात्पूजासाधनेषु प्राधान्यतया तुलसीं वर्णयति द्वाभ्यां॥ कुंदादिति॥ तुलसी कुंदारिभ्यो ऽधिगंधाय द्यपि न भवति॥ तथापि मुकुंदस्य किं यन्नाम
प्रेयसी॥ यस्याः पत्रमात्रेण दलमात्रेण लेख्यमात्रेण न

स्वात्मभावं कृष्णः समर्पकाय प्रयच्छति॥ एतावत्प्रेष्ठं कु
लं इति चेत्॥ पुरा हि कृष्णस्य वृंदावने गोपीभिर्विहारः
परमेष्टोऽभूत्॥ युगांते तु भगवान् गोप्यश्च गताः॥ यदि
पुनर्भगवंतं प्रति वृंदावने विहारेच्छा स्यात्॥ तदा तत्र तं र
मयितुं कापि नास्तीति कृत्वा यत्र यत्र वृंदावननाममात्रं त
त्र स्करसा सती अद्यापि निवसती अं भगवदुपरि तस्या म
हानुपकारभारः तेन यस्याः पत्रमात्रेणोपत्रापि कृ सुधार पि
ति॥ स्करसा सश्रृंगाररसा॥ तुलसी च॥ वृंदावनं प्रसिद्धं
क्वां इन्द्रादिना निर्मितं तुलसीनिवासस्थानं च॥१८४॥ किंच॥
तुलसीति॥ अस्या दासस्तुलसीदासः॥ तन्नामकश्चिद्वा
राणसीस्थो महाभगवद्भक्तश्च॥ भगवान् रामभद्रः साक्षा
द्येन सह शारिकाक्रीडनं कुर्वन्नभूदिति आविद्वालं प्र द
सिद्धं॥१८५॥ प्रसंगान्नृहरिप्रियं अपामार्गं वर्णयति॥

॥४०॥

॥यस्त्विति॥ यः अपामार्गमपोह्यास्ते॥ तेनात्र शेखरं धृ
त्वा वर्तितव्यं॥ निःशंकयेति यावत्॥ सोत्यंतं साधीयानिति
॥पद्यस्य पत्रंदलं लिखितं च॥ हरिर्मूर्ध्नाभिनंदति॥
अपोहितः अपामार्गो येन सोपामार्गः॥१८६॥ किंच भ
गवदग्रे नृत्यगीतादिकमपि कार्यमित्याह॥ रामाग्रत इति
॥रामाग्रतः रघुपतेरग्रतः॥ भक्तैः सह संभूय॥ नृत्यगी
तं च कृत्वा नित्यमुपनतं उत्पन्नं॥ प्रद्वेषं प्रकृष्टद्वेषं नयेत्
॥ दूरीकुर्यात्॥ इति शिक्षयन् भगवान्भवः रामाग्रतो
गोयागतो नृत्यं कुर्वन्नित्यं उपनतं आगतं प्रद्वेषं नयेत्॥
दूरीकुर्यात्॥ कालविशेषं नयति क्रमयति॥ रामा स्त्री
हरेः पुजनेनैव करस्य निरपराधत्व
रामचंद्रस्य॥१८७॥ हरेः पुजनेनैव करस्य निरपराधत्व
मित्याह॥ दानोदकाद्रीइति॥ दानार्थमुदकेनार्द्रः हरौ

तत्र

महांतं आदरं दधानः करकस्य करभूषणस्य शोभया युवः सः
न॥ आगः अपराधे स्थितः दानोदकेन मदधारया हरेः सिं
हात् महांतं दरं भयं करटौ एव कटकौ करटौ तच्छोभया युवः
करः शुंडादंडः नागस्थितः गजस्थितः हरिपूजनमंतरे
ण शावौ करौ नो कुरुतः सपर्या हरेर्लसत्कांचनकंकणौ वे
ति श्लेषेण गर्हितत्वात्॥ १-९८॥ पुष्पं वर्णयति॥ भगवतीति
॥ सुमनसः पुष्पाणि साधवश्च॥ ९९॥ भगवद्यात्रोत्सवलिं
ग निरीक्षणादेरपि आराधनहेतुत्वात्तदुपयुक्तावयवादु
द्दिश्य ॥ भगवद्यात्रार्थं यौ पादौ पुण्यक्षेत्राणि न गग
च्छतो निंदन्नाह॥ धन्यानीति॥ कुजन्मिपादाः वृक्षमूला
नि क्षेत्रं काश्यादि केदारं च घनरसा पूर्वं तीर्थस्नानं
जलार्द्रीभावं च॥ सुकुसुमनः सुमनस्त्वेन सहितः सुमनस्कः
तद्भावस्तत्ता तया सुमनोभिः पुष्पैः सहिताश्च॥ सफल
यंति सफलतां प्रापयंति अतापी कुर्वंति॥ फलसहितान् कुर्वंतिच॥ हरिभू

त

ता हरितरूपाश्च ॥१९०॥ सत्तारकमिति ॥ हेनयन ॥ त्वं सतीतारका यस्य तत् ॥ हरिरपि सत्तारकः ॥ त्वं नादि नकार आदिर्यस्य ॥ सः आदिरहितश्च ॥ त्वं नांतं नकारांतं सः अंतरहितश्च ॥ यस्य यकारस्य अंतर्मध्ये स्थितिरस्ति त्वयि यस्य हरेरंतर्यामित्वेन स्थितिः समानशीलकत्वे सख्यं भवति ॥ त्वमेकदा भगवद्विग्रहं पश्यतत स्तवते न विना न क्रम्यते इति तात्पर्यं ॥१९१॥ यत्पृथुराजा प्राधान्येन पूजां कृतवान् तत्कर्ममेवेत्याह ॥ पृथुरिति ॥ यश्च पृथुः पीवरतनुः तेनोच्चैःपदैरपि दुरारोहे पदे सहसा गंतुं कथं शक्यते विना देहस्य कार्श्यं तदर्थं सः पृथुरिति कृत्वा उद्धारः सन् सतां आत्मकः हरिः तस्य अपचिति पूजां व्यधात् ॥ उद्धार इत्येनेन शरीर कृशीकरणे उत्साहोऽभिधीयते ॥ सभ्यं वन्मंदिर संमा

ग

ने

र्जनसेचनोपलेपनजलाहरणपुष्पगंधादिसंपादनं स्वय
मेव राजा सन् चक्रे ॥ अथच कार्श्यमापादितवान् ॥ मध्व
ने वृंदावनं तत्र स आसीदिति कूर्मपुराणे प्रसिद्धं ॥ अ
न्यच्च मधु क्षौद्रं वनं उदकं च तस्य सेवनात् सततः
वर्तमानस्य ॥ अपचितिः अपचयः भवति ॥ तथा वैद्याः
॥ शिशिरांबु पिबेत् मध्वप्रयुक्तं गणनाथो पि भवेत् कि
लौं स्वपि शेषः ॥१९२॥ अथ वंदनं वर्णयति ॥ सर्वांगे ष्विति ॥
वरांगं मूर्धगुह्ययोरित्यमरः ॥ ९३ ॥ भूषणो त्तमेति ॥ स
र्वेषु अवयवेषु ममेव किरीटमिति गर्वं मा वह किंतु ह
रिचरणं प्रतिनम ॥ यन्निसृष्टा किरीट्यपि अर्जुनो नम
तिस्म ॥ ९४ ॥ अक्रूरो हरिं प्रणाम तया वंदनभक्तिमेव च
कार तदुक्तमेवेत्याह ॥ अक्रूरो हमिति ॥ भाता भासतेस्म

क्ष
॥ अपराधैर्मा प नहिय था इढ पादपी उने न भवति तथा
नान्योपाये नेति ॥ १९५ ॥ अथ द्वास्य ॥ ज्ञाने नेति ॥ नि
त्यं यद्वा सत्वं तन्नित्यद्वासत्वं ॥ तन्मध्ये नित्यद्वा सर्व
द्वासत्वं नास्तीति न ॥ तस्माद्भगव द्वास्यैनैव स्वग मामुक्ति
॥ १९६ ॥ रिति ॥ ज्ञानादेवेति ॥ ज्ञानादेवं तु कैवल्यं ॥ श्रद्धावान्ल
भते ज्ञानमिति प्रमाण द्वय मुक्तं सत्वे श्रद्धा इति ॥ अत्रप्र
माण मलिप्रसिद्धमित्याह ॥ लल नाइति ॥ सत्वे गर्भे स
त्येव श्रद्धा दोहदं ॥ दोहदं दोहलं श्रद्धा ॥ इतियादव: ॥ स
द्वासत्वोदय: ॥ द्वासत्वस्य द्वास्यस्य उदय: तेन सहित:
॥ सद्वा सत्वोदय: ॥ तत्र सद्वा सर्वद्वा सत्वोदयो रूदये
वेति ॥ १९७ ॥ सोहसोहमिति ॥ खगगामिन: गरुडगा
मिन: द्वासोहमिति स्मरणाभ्यासे दृढे सति विनागम्य

तीति विगः गरूड्गामी तेनसह तद्दाकारो भवसमुद्रेगंभा
बुवत् विगतः दारोकौयस्मा द्दितिच॥ एवंचद्दासोहमिति
स्मरणात् दारीकोगतश्चेत्सोहमित्येवावतिष्ठते इतिय
त्वाभीष्टं तद्द्यात्सिध्यतीति॥९८॥ स्वानंदेति॥ अंज
नाया एतनाम्न्यामातुरानंदस्थानं॥ अंजनेन विषयसं
बंधेनानंदः तत्परंच॥९९॥ धनार्थोपि श्रीरामदास्येना
तिरस्कृतभ इत्याह॥ कुलइति॥ त्वंश्रियेयतसे श्रीस्त्वां
प्रति पराङ्मुखी॥ रामदासस्तु श्रियंप्रति पराङ्मुखो
भवति॥ श्रीस्तु अनपायिनी तंप्रति संमुखी उपतिष्ठ
ते॥ यथा श्रीरामदा इति पराङ्मुखे चेत् सदामरा
श्रीरित्यक्षराण्युपतिष्ठंते॥ सदा अमरा अनपायि
नी श्रीरित्यर्थः सबिंदुका बिंदुकयोः सविसर्गावि

स

ध

॥४३॥

86

सर्गयोरिति ऐक्यात् पक्षे सविसर्गाविसर्गत्वमेव
व्यं ॥ २००॥ अहेतुकं दास्यमेव भगवतेती वरोचतइत्या
ह॥ निष्कारणमिति॥ विनापं॥ सतां तापं हरति॥ किं
चअपहरति॥ अव्ययो नाशरहितः॥ वपुरश्व॥ २०१॥
हनूमान् प्राधान्येन दास्यमेवचकार तत्पुत्रमित्याह॥
श्रीरामेति॥ सुकंठः सुग्रीवः॥ वेहलनं अवहेलनं॥ अ
नादरं॥ २०२॥ असेषेति॥ आशु[illegible] गोबाणः वपुश्व॥
तं बिभर्ति धारयति॥ पोषयति पालयति॥ ३०॥ दासश्चे
ति॥ अमृतस्थितिं॥ मोक्षस्थितिं जलाशयेस्थितिं न॥
धीवरा हि सर्वदा जलाशय एवतिष्ठंति॥ ४॥ न स्वामि
न्निति॥ विपरीतभावोपक्रमक्तौ कदापिनोत्पद्यते तत्त
थाहं भजे [illegible] पं॥ यो हि स दा दासोहमिति ब्रवीति स कदा
पि स्वामिभावं नापद्यते॥ कदाचिदुत्पन्नेपि सोनर्थका
री न भवति॥ अनर्थकारी स्वार्थहानिकरः॥ उभयत्र

87

समानं॥ दासरूपोऽर्थः॥ शब्दाभिधेयं॥ तादृशा भक्तिस्तु
दास्यमेव॥ न यजनादि॥ तथाहि॥ स दासः॥ यः तस्मिन्वि दा
परीतभावे कदाचित्कृत उत्पन्नोऽपि सोऽनर्थकारी न भवति
॥ स दादास एतत्पदं वैपरीत्येन पठतिमपि सदा दासरूप
मेवार्थं वक्ति॥ कनकवत्॥ यजनरूपायां तु भक्तौ वैपरी
त्यं चेन्नजयरूपार्थांतरमनर्थापादकं भवति॥ वर्षं वन्याः नु
ज्ञानशून्याः॥ अतः सर्वतो मुख्यस्वार्थमेव भक्तौ अभिप्रे
तव्यमिति दास एवाभवदिति तात्पर्यं॥ ५॥ अपसख्य
माह॥ क्षमेति॥ क्षमादयो हि गुणा भगवति विलसंति
अतः कतिपयतादृशागुणवत्तामंतरेण सख्यं कथं स्यात्
॥ ६॥ अर्जुनो मुख्यत्वेन सख्यं कृतवान् तद्युक्तमित्याह॥
मैत्रीचेदिति॥ पूर्वावतारे श्रीरामावतारे॥ तावन्नूशाको वाली
रूपांशेनासीत्॥ कृष्णावतारे पार्थोरूपांशेन॥ तत्रार्जु
नो विचारितात् आत्मप्रियावाप्तिरपेक्ष्य सैन्तु स्वस्त्रीला चे
भोऽभूत्॥

तदुपहारकृद्वालिघातेन ॥ इदं सर्वं मया पूर्वावतारेऽनुभूत

मतः सेवकतद्यैतिनिश्चित्य तामेवकृतवान् ॥ ७ ॥ आत्म

निवेदनमाह ॥ अथ इति ॥ वैराग्यदशानादनिष्ठायाः सर्वाः

शोभास्तास्त्वधिष्ठापयपाभाव्यमिति इच्छाचेद्भगवतेआ

त्मनिवेदनं कुरु ॥ तत्प्रकारमाह ॥ अहमित्यादि ॥ एवमा

त्मनिवेदने कृते तत्र तवकामः सिद्ध एव ॥ अहं श्रीशातस्मि

॥ इतिवचने ॥ श्रीलांशानं तत्र अहमस्मीति अर्थान्तरमुप

लभ्यत एवेति ॥ ८ ॥ यद्बलिनाआत्मार्पणं कृतं भगवतेन

धुकृमित्याह ॥ धनायेति ॥ भगवताअल्यात्मत्वाद्वामन

त्वात् ॥ विपुलाशा महतीआशा ॥ पृथ्व्याआशाच ॥ धना

पोहिअल्यो भवति ॥ सबल्हाशांकरोतीतिपुत्रं ॥ तामहं स

फलितवान् ॥ अधुनामहाभूतेन तेन तदनुरूपात्त्वाशा

अल्याशादेहस्यममआशाच कृता ॥ तामहं किं विहन्या

मिति आत्मार्पणं कृतवान् ॥ ९ ॥ सर्वथाहेयान्याहनेति ॥

89

भवेपिशंस्कः खंभवेत् ॥१०॥ आशेति ॥ नसंतिआशायस्यसः ॥
अनाशः ॥ नास्तिनाशोयस्य ॥ सोपिचसएवेति ॥११॥ आशेति ॥
अपगताआशायस्यसः अपाशः ॥ नसंतिपाशायस्य सोप्यपाशः
॥ यश्चपाशरहितः ॥ सद्गुरुरेव ॥१२॥ याचनायामिति ॥ याच
नाकामेति मनस्यानीलंचेतृष्णा लनैवउपलिछते ॥ याचनाश
ब्दे चचकारस्थाने लकारः कृत लयालनैवेति ॥१३॥ आशे
ति ॥ तांतोग्लानिमापन्नः तस्यग्लानो आशासहितइति श
ब्दः लकारांतः निराशइतिशब्दस्यशांतः ॥१४॥ नतथास्यभ
वेत्क्लेशोबंधश्चान्यप्रसंगतः योषित्संगाद्यथा पुंसोतथानत्संगी
संगतः इतिभागवतोक्तेः स्त्रीणांचहेयत्वमाह ॥ स्त्रीति ॥ अस्त्र
मास्तियस्यसः अस्त्री ॥ अस्यागावौनेत्रेताभ्यांलक्षिताः यस्य
गावः बाणाः लेलक्षीकृताः ॥ गोरतद्धितलुकीतिगोशब्दांतच्
॥१५॥ यदधरलुग्गप्रसंगादिति ॥ स्वबंसघः प्रज्ञाहरीतुंडीसघः

॥४५॥

प्रस्ताकरीवचेति ॥१६॥ स्त्रीणामंगं परमंमंगलमित्याह ॥ यच्चेहै
वेति ॥ जघन्यकर्म नीचकर्म ॥ मैथुनं च ॥ अधःपातो नरकप्राप्तिः
॥ रतिप्रयोगार्थं अधः ॥ पतनं च ॥ संगः सहवासः ॥ समागमश्च ॥
तेजः माहात्म्यं ॥ रेतश्च ॥ इह केनचिन्निंद्यकर्मफलं चेत्स्याधः
पातरूपफलं प्रभवति ॥ अस्य तु अत्रैव महद्भिः असज्जनसह
वासः कृतश्चेत्क्रियता कालेन सत्तेजश्च लयं भवति इदं तु सद्य
एवेति ॥२७॥ स्त्रियः केवलं नरकरूपा इत्याह ॥ सुखेनेति ॥
रम्याः रमणीयाः यद्वा सुखेन कारेण ॥ रम्याः स्वापेक्षित
सुखविषयेपि यानकारमेव प्रयुंजते ॥ रेफं कुत्सितं अंतरं
मनो यासां ॥ बहिः साध्वीभावं दर्शयंत्योपि अंतः केनापि पु
रुषविशेषेण संगता इति भावः ॥ तादृशाः कांता नरकाएव
शद्बतोपि ॥ या सुखे आदौ नकारेण रम्याः रेफः रवर्णः अं
तरे मध्ये यासां याः कांताः ककारांताः ॥ एवं च नरक इति

सिध्यति ॥२१८॥ हा हंतेति ॥ संहारं सम्यक् हारयुक्तं ॥ संहार नामा नरक विशेषः ॥ रुरोः कृष्णसारस्यायं रौरवः ॥ एतन्नामा नरक विशेषश्च ॥ महारौरवरौरवाः ॥ संहारः कालसूत्रं चेत्यमरः ॥ चकारात्काल सूत्रं ॥ कंठं ॥२१९॥ कांता संगजन्यं स्फ खंक्षणिकं सत् अंते अतीव क्लेश द इत्याह ॥ एकांत इति ॥ इयं रामा एकांते अंकगता समीपगता उत्सवं गता वा स्वस्या विभ्रमः विलासः सस्मितनयनचमत्कारादि स्तमाद्दौ दर्शयति ॥ ततोंकुरितकामेन कांतेन स्तनपीडनचुंबनादिबाह्यस्फ रत आरब्धे सीत्कारं तनोति ततो बाह्यस्फरतेनानुरागं गतास ति मध्यवत्साध्यमादकं च यद्रतं तत्रायं आवेशः तेन कांतं रमयंती स तीक्षणमानंदं जनयति नतु चिरं परंतते परम संतापकारिणी भवेदिति चिंत[illegible]य ॥ कथं यथा पामा सापि अंकेगता प्रायेणास्ते तत्कंडूयनं तज्जा वशाज्जन समक्षं न भवति स्वयमेकांते यदा एकएवोवतिष्ठते ॥ तदा सा स्वविभ्रमकं डूतिशयं दर्शयति त तो नखैर्लेखने खर्जने आरब्धे सीत्कारो भवति ॥ ततः व्यक्तं स्फ यस्याः सा किंचिद्र्क्तो गमे जाते मध्यरता पुनः पुनः खर्जने

त्प

॥४६॥

विषयिकरुचिः ॥ लयाय: आवेशः उत्साहः तेन क्षणं सुखं स्या
त् परमनंतरं भगभगाइतः संतापो भवति तथा ॥२०॥ स्त्रीणां
प्रसंगेन न निमज्जंतीति युक्तमित्याह ॥ नूनमिति ॥ उन्नतं स्तनमंड

रस

लं सोऽद्रिः शृंगारस्य कारणं भवति ततो जडानां मूर्खानां आशये
तेन पूर्णता मता तत्र विप्लुतता व्यसनिता तया निमग्नो भव
ति यथा उन्नतो मेघोदयो बहुजलस्य कारणं ॥ तेन जलाश
यानां पूर्णता ॥ तत्र विगतं प्लुतं प्लवनं जलतरण पाटवं यस्मा
त्तया निमज्जनं युक्तमेव प्लुङ् गताविति यस्मात् धातोः उ
डुपं तु प्लवः कोल इत्यादौ जलतरणे रूपार्थदर्शनात् भाषो
क्तः ॥ प्लुतो व्यसनविह्वल इति हेमचंद्रः ॥२१॥ यो राम भजन इति ॥
रामात् भक्तिरित्युक्ते रामे अभक्तिः प्रतीयते ॥२२॥ उद्गाह इति ॥
आकल्पाभूषाः पुरुषार्थः जन्ममरणातीत भवनं पुरुषं चंद्र
व्यंच ॥२३॥ प्रसंगाद् उत्तमस्त्रीलक्षणं तदुपादेयत्वं चाह ॥ लोकेति ॥

प्रथमता श्रैष्ठ्यं ॥ यालोकेन साध्वीपमिरूच्यते ॥ रसोहितं च भर्तृ
विषयके अंतरे यासां तादृश्यः मदालसाचूडालाप्रभृतयः संसा
रसागरे तारका भवंति ॥ याभिः स्वकांता ब्रह्मभावमापिताः तार
कस्योत्सर्गतः पुंधर्मतया पुंस्त्वनिर्देशः शब्दतोपि याः प्रथममा
दौ तां ताकारं भजंति रेणरेफेन सहितं अंतरं यासां याः कांताश्च
ककारांताः एवं च आदौ ता मध्ये रः अंते कः इति तारकपदं
निष्पद्यते ॥ २२४ ॥ परमैवेति ॥ या स्वभावतः परमा सा अपका
रं प्रापितापि भर्तृदैन्यापादनका न भवति ॥ उत्तमत्वात् ॥ परमा
हि अपकारं पकाराभावं प्रापितापि रमैव भवति ॥ या रमा सा किं
दैन्यापादनकरी ॥ २५ ॥ पुत्रदारादिसंबंध इति ॥ अमृतं स्रुधांध्यो
तति तत् ॥ तत्रातीव आसक्तिश्चेतापाय ॥ यथा सेहुंडः वृक्षवि
शेषः शेर इति भाषा तत्संबंधः अमृतं क्षीरं स्रवति तत्रात्यं
तं प्रसंगश्चेतापाय ॥ २६ ॥ मोदिष्यस इति ॥ दामोदरस्य यः स
द्रवः उत्तमशब्दः वेदरूपः रामकृष्णादिनामरूपो वा तेन स

हितं यन्मनः तत्सदामोदरसस्यद्रवो यत्रेति॥ हृदये दाराः का
च लिस्वरं यस्यसः हृदयदारकाः आनिस्वरा यस्येति॥२२७॥
स्यात्पुंसामिति॥ योषिदादिषु यथा यथा अधिकमधिकं उल्ले
खः परिचयः तथा तथा तत्र माध्करी रूचिरूत्पद्यते॥ ततोनं
तरं अनुरक्ता भवति॥ सा च कीदृशी यत्र संलापयुक्तमपिजी
वनं प्रेक्षं भवति यदीयभरणेन संतापेपि मा भूदितः परमलिनि
र्वेदो न भवति यथा पामा या मुल्लेखः उल्लेखनं चततः माध्क
री स्फरवा स्वादः ततोनुरक्ता अनुगतरूधिरता तत्र संताप
उष्णम पि युक्तमपिजीवनं जलं प्रेक्षं भवति॥२२८॥ पुरूष स पदृति॥ अ
कूपारः समुद्रः जालं आनायः जालके पतितमत्स्यानां मध्ये
कश्चिद्दूलेन बहिर्निरेति॥ बालिशः अपत्यं बलिशस्यायं
बालिशः उत्तयो रैक्यं कदाचित्प्रियामपि स्त्रियं त्यक्त्वा क
श्चिद्रक्षेत्॥ परं बालिशं त्यक्तुं न शक्नुयात्॥ यथा मत्स्या

जालाद्दलेन निरीयात्परं बडिशेन विध्दः म्रियेतैवेति ॥२२९॥
द्रव्यं हेयमित्याह ॥ वित्तमिति ॥ जिज्ञासो वित्तं मा संग्रहीः तत्संग्र
हं मा कुरु यद्दि तस्य तस्य त्यागे दाने वित् ज्ञानमुत्पद्यते ॥ धनं तु
धर्मैकफलमिति भागवतात् ॥ वित्तसंबंधिनः तत्कारस्य त्यागे
वित् इत्येवावतिष्ठते इति ॥२३०॥ स्पष्टं ॥३१॥ मधुप इति ॥ मधु
पः मद्यपः भृंगश्च कुजन्मिनः नीचाः दृक्षाश्च स्वर्णगंधं स्वर्ण
लेशं स्वर्णं चंपकगंधश्च अन्यगंधाः पराभूताः गृहीतगंधाश्च
सुमनोगणाः साधवः पुष्पाणि च ॥३२॥ धनमपि न्यायोपार्जि
तं उगममित्याह ॥ अविवादिधनमिति अस्ति विवादो यत्र तत्
विवादि अविवादि तद्धनं विवाधनं न भवति यत्तु निष्कारे
ण शाठ्येन मिलितं तन्निधनं मरणहेतुः शद्दतश्च ॥ अवि
वा इत्यानुपूर्वी आदिर्यस्य तत् अविवाधनं बवयोरभेदात्
अविवाधनं निराकारेण यत्संगतं तत् धनं निधनं ॥३३॥
उत्कर्षी धनयोरासन्नया त्वं निंद्यो माभूरित्याह ॥ रइति ॥
+५ न तत् अविवादि+

अनेकस्त्री मुखसंबधिमुधुनि लक्ष्म्याकोशेषु चलं पटो भूत्वा
भ्रमर इव द्विरेफः द्वाभ्यां कारणाभ्यां रेफः कुत्सितो माभूः
॥नरः सन् नानाये आरामाः तत्संबधिमध्कनिपुष्परसे पे
य्यानां इमे पाय्याः लेचते कोशाः कोरकानि तेषु लंपटः सन्
भ्रमरो द्विरेफो भवतीतियुक्तं॥ यतोभ्रमतीति भ्रमरः भ्रसो
नीति यिक्तात्॥ रेफद्वयविशिष्टश्च। तं तु नरः ज्ञानवान्
रवर्णरहितश्च॥२३४॥ स्त्रष्टेति॥ विश्वकर्ता इदं जगत् स्वतइव
संसरणाय कल्पतामिति वस्तद्वयं निर्मितवान्॥ एकं शस्त्री॥
अन्यत् निधनं शस्यते हिंस्यते अनया शस्त्री तरवारिः नि
हन्यतेऽनेन निधनं एतयो रुभयोराकलनया स्वतएवनाशो
भविष्यतीति॥ अथ शंकितः एते द्वारूणे को ना त्वांगी
कुर्यादिति ततः सः तत्प्रज्ञानभंगाय आदिमं वर्णं अपहृत
वान् ततः अवशिष्टं स्त्रीधनमिति तत्रापि आपातमाधूर्य

रूपेण रागेण रंजितवान्॥ येन सर्वथा तत्स्वभावो माविरभूदिति त
त इमे सर्वे चतुरा अपि तन्माधुर्येण मोहं गताः सन्तो भवंति परं को
पि निपुणं एतयोः वास्तवयातुकं पूर्व स्वभावं न वेत्ति स च अवशि
ष्टरूपेण कदापि न ज्ञातुं शक्येत्॥ माधुर्यरंजितत्वात्॥ अतः तज्जि
ज्ञासा चेत् तयोर्यौ वर्णौ अपहृत्य निहतौ तत्र रंजना नास्तीति तत्र
एतयोर्वास्तवस्वभावज्ञानं स्यात्॥ अतस्तद्वल्लोकष्य सत्त्वशनिः स
च दृष्टो संगतः सर्वस्वहान्यै भवतीति सर्वजनीनं तद्देते अपीति
ज्ञात्वा तत्र प्रसंगं माकार्षीरिति तात्पर्यं॥२३५॥ ॥३६॥ सृष्ट्वेति॥
परमेश्वरो हि नानाविधान् प्राणिनः सृष्ट्वापि नातुष्यत्॥ ततः उचि
तं स्वनिरीक्षणयोग्यं अंतरं बुद्धिर्यस्य तं पुरुषं सृष्ट्वा तुष्टो भ
वत् सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या इति भागवते
यदि स पुरुषः स्त्रीयं उचितांतरस्वरूपं निजलिंगं हित्वा ई समे
तांतरः स्यात्॥ ई कामः ई श्रीः ताभ्यां समेतांतरः तर्हि पर
ममोदार इमोल्लासिनः आनंदरूपस्य तस्य तुष्टये किं स्यात्

॥५१॥

यदर्थमनेन उत्पादितस्तदकर्तव्यमिति शद्धतोपि पुरूषो हि

उचितोत्तरः उना उकारेण चितं अंतरं मध्यमं यस्य पुरूष इति अ

त्र मध्यमवर्णो रेफ उकारसंगतोस्ति तदुचितां तत्वं विहाय ईका

रेण सहितः स्याच्चेत् पुरूष इत्यस्य पुरीष इति जायते॥ तच्च पु

रीषं तत्परमामोदैरुत्कृष्टस्कगंधैः समाहितस्य तुष्टेकथं स्या

त्॥ स तन्मनसा न स्मरति॥ न च पश्यति न शृणोतीति॥ ३८॥

इंद्रियवशे मा भूरित्याह॥ सजेति॥ अक्षाणि इंद्रियाणि अक्षाः

पाशाश्च यया अक्षवशतया द्यूतं कृत्वा सर्वस्वं हारितवंत इति

॥ ३८॥ जगत्यामत्रेति॥ काजनता मरणोन्मुखी ममता उत्तरं

कामरणोन्मुखी वेश्याभिः स्मरतोत्सवः जनता जनसमूहः

॥ ३९॥ वृथैवेति जहि शत्रुं महाबालो कामरूपं दुरासदं इति गीता

स्मृ॥ आक्षिपति निषेधति वृथैव रे कामरतोसि महाराष्ट्र भाषानु

सरणमिदं॥ ४०॥ राग इति॥ द्विजनिनात्रैवर्णेन रागः कामः

तिरस्क्रियतां॥ यस्माद्दोषस्थिते दीपकः सः तदेवाह॥ यस्य

र

९९

क्षणं प्रसंगेन सन्मार्गवर्ती त्रय्यात्मा वैरिकोपि मधुपानां गणैः चुंबितामपि पद्मिनी उत्तम वेश्यां वशयितुं तत्कोशगृहे स्वसंपत्तिं अर्पयेत्॥ जनैरस्य पापिनः मुखमपि नावलोक्य मेतादृक् भवति॥ यथा सन्मार्गः आकाशः तद्वर्ती त्रय्यात्मा सूर्यः मधुपाः भृंगाः पद्मिनी कमलिनी कोशः कोरकः श्रीः शोभा अप्रेक्ष्यतां नेक्षेदुद्यंतमादित्यमिति स्मृतेः एतत्केनोक्तिचेत् क्षणं रागप्रसंगेन सचद्विजकुलाः निनादाः यत्र तस्या उपस्थितेः प्रातःकालवस्थितेर्लिपिकः॥२४१॥

काम इति॥ कामः स्मरतावसाने पंगुलः क्रोधः कामप्रतिरोधिनाशे पंगुलः लोभस्तु तत्लाभेपि पंगुलो न भवति॥ किंतु परचतुष्टयं अग्रत एव यथा लाभः १ लोभः २ लूभं ३ लोभं ४ लोभः लोभोपरितस्य मात्रेपि बोध्यं॥४२॥ देहदारकदाराद्यविति॥ दारका अपत्यानि मोहेन आकुलः मायाः

संपत्ते विपर्यये ऊहास्तर्कास्तेराकुलस्थ॥२४३॥ नरकोप
स्थितिमिति॥ नरे मनुजे या कोपस्य स्थितिः [illegible] अवस्था
नं सैव नरकोपस्थितिः॥४४॥ बिंदुमात्रेणेति॥ अंतरे
मनसि बिंदुमात्रेण समदः मदसहितः समंद एव
अंतरे मध्यम वर्णे बिंदुना युक्तत्वात्॥४५॥ मत्सर इति॥
यागादौ मत्सरः उपादेयो भवति॥ अमुना पशुनेष्टं म
या ज्योतिष्टोमेनेज्येतेति॥ पापकृन्न भवति॥ पण
नं व्यवहारः॥ तं प्राप्य कृतश्चेत्॥ अनिष्टहेतुः॥ यथा
मत्सरः॥ सोमवल्लीयोगे उपादेयः॥ तस्य पणं विक्र
यः कृतश्चेदनिष्टकृत्॥ सोमविक्रे[illegible]ता हंतव्यः॥ ब
हिष्कार्यो वेति श्रौतसूत्रे प्रसिद्धं॥४६॥ अथ उपा
देयमाह॥ अनेकेति॥ अनेकप्रकारेण यत् श्रेष्ठक
ल्याणं साधककर्म तत्संगृहाण॥ न हि कल्याणकृत्

कश्चिद्दुर्गतिं तात गच्छतीति गीतोक्तेः ॥ अनेके बुधा
सुपुश्रेष्ठं ॥ कल्याणं सुवर्णे ॥ दुर्गतिं दारिद्र्यं ॥ निरयं
च ॥ २५७ ॥ सामान्यत उक्तं विशेषेणाह ॥ यस्त्विति
॥ शामं आपन्नः शामापन्नः ॥ शं आपन्नश्च ॥ शं सुखं
॥ ५८ ॥ शामस्येति ॥ अरे त्वं शामलं पापं अलंकुरुमा
कार्षीः ॥ तेन शनैः शनैः शमः स्यात् ॥ शामलं अलं ॥
लकाररहितं कृतं चेत् शाम इति भवति ॥ ५९ ॥
शमीक इति ॥ शामी शामयुक्तः ॥ क इति प्रश्ने ॥ इह
मेवोत्तरं शमीकः ॥ एतन्नामा मुनिः ॥ यस्य कृते
समाधेः कंठे परीक्षिता मृतसर्पकलेवरं प्रतियु
क्तं ॥ निर्भर्त्सयामास ॥ तपोध्ययोस्माकं धर्मः ॥
किंतु शांतिरेवेति ॥ त्वया मूढेन तस्मै शापो दत्तः

तद्दसां प्रतं मिति ॥ २५० ॥ दममाह ॥ नूनमिति ॥
देहोहमिति मदः ॥ अविद्यैव ॥ विजया मदद्रव्यं भां
ग इति लोके ॥ तज्जनितः तस्य प्रतिकूलः मद एव ॥
बाह्येंद्रियनिग्रहः स च परंपरया ज्ञानद्वारा तन्ना
दम इति — शको भवति ॥ मदस्य प्रतिकूल एवेति ॥ ५१ ॥ यइति
॥ हरेः प्रसादो येन तस्या त्वा दशं साधनं कुरु ॥ तच्च रामपद
सेवनं ॥ तत्र कृते दमः सहजः ॥ संश्रित रामपादो
हि दांत एव ॥ तदकृत्वा केवलं हठेन रुद्धक्रोधः कृ
तो तेन सः क्लांत एव स्यात् ॥ न दांत रुद्धक्र इति पाठे
दमोन — क्रांतः सर्पे राक्रांतः ॥ दांतः दकारांतः क्रांतः क्रका
रांतः कृकारांतश्च ॥ ५२ ॥ स्याच्चेदिति ॥ उपरमः
इंद्रियाणां भगवद्विषयव्यतिरिक्तविषयेषु निर्वेदः ॥

उप समीपे रमा यस्य स इति च ॥२५३॥ एषामिति ॥
सदा समाधानेन सहित: ॥ दासीवासौ मात्र दासमा ॥
तस्या आधानं स्थिति: तत्सहित: ॥ हरेरावासं विना
श्रिय आवासो न संभवतीति ॥ ५४॥ यस्यामिति ॥
श्रद्धा विश्वास: ॥ दोहलं च ॥ तच्च सत्वं विना न भवति ॥
तस्मात्सा सत्वभाविता ॥ सत्वं गर्भ: सत्वगुणश्च ॥५५॥
आढ्यो यमिति ॥ बहुला क्षमा यस्य स: ॥ क्षांतिमानि
त्यर्थ: ॥ बहुलक्षम पाणा ॥ मा धनसंपत्तिर्यस्य स इत्या
ढ्य पक्षे ॥ ननु किं धनसंपत्त्या यदि संतानास्ति ॥ ब
हुला क्षमा भूमिर्यस्येति नृप पक्षे ॥ ननु किमपत्नीय
स्या सत्त्वया ॥ बहुलक्षं चित्तावस्थितिर्यस्या: सा तादृ
शीमा रमा यस्मिन्स इति श्रीपतिपक्षे ॥ ५६॥ शौनमाह ॥

॥५२॥

पइ ति॥ शुचिः शुद्धः अग्निश्च। वैश्वानरः अग्निः॥ यः
अशुचिः स नरः श्वा शुनकः॥ वैनिश्चपातू॥५७॥ वेदोक्त
मेव कुर्यादित्याह॥ नूनमिति॥ ब्रह्मभवो ब्राह्मणः॥ शिव
श्च॥ स हि ब्रह्मणो ललाटादुत्पन्न इति प्रसिद्धं॥ एतं उपन
यनं व्रतबंधः॥ तनीपनेत्रं॥ दोषाकरश्चंद्रः॥ दोषसमूह
श्च॥५८॥ यथार्थं चिदिति॥ वर्णानां वेदाक्षराणां गुरुमु
खात् सम्यग्ग्रहणेन वर्णसंग्रहः॥ दौर्ब्राह्मण्यं गतं भविष्यति॥
परं यद्वेदपठनेन सामर्थ्यं तदर्थलाभं विना न स्यात्॥ वर्णाः
अक्षराणि॥ ब्राह्मणादयश्च॥ सामर्थ्यं शक्तिः संभावना
र्थत्वं च॥ [illegible]॥ परमार्थस्येति॥ योर्थ [illegible] सकलं भद्रमश्नु
ते इति श्रुतेः॥५९॥ परमार्थस्येति॥ परमार्थो मोक्षः॥
परमः निर्बाधः योर्थः वेदार्थः॥ अर्थकृते धनार्थं ता
श्रुति मातरं महह प्रतिगृहं नर्तयंति मूढाः॥२६०॥

स

वेदानधीसेलि॥ व्यर्थः विगताः अज्ञाताः अर्था येन
स व्यर्थ एव॥ अकृतार्थ एवेत्यर्थः॥ यः समर्थः सं
प्राप्ता अर्था यस्य स एवेत्यर्थः॥ २६१॥ वेदार्थस इति
॥ वेदार्थज्ञः॥ नानरः कस्य पृष्ठमारोक्ष्यति इति पृष्टे
नाकस्य पृष्ठमित्युत्तरं॥ नाकः स्वर्गः॥ २६२॥ विनेति॥
अथ शास्त्रीयं तद्धर्मे॥ तद्विनाशस्य जस्त्रमेव॥ तस्माच्छा
स्त्रं प्रमाणं ते कार्याकार्यव्यवस्थिताविति गीतोक्तेः॥
माधवेन रहितो यः पंथाः स अमाधवः॥ अमा अ
मावास्या॥ तस्या धवः पतिः॥ अमा तमस्विनी तत्प
तिरर्थात् महातामसः॥ २६३॥ धिगस्तिति॥ काव्यं का
दंबर्यादि तच्च अस्कुरसंप्रदः रजस्तमोमय्याः मूलं
शृंगारादिपरत्वात्॥ काव्यः शुक्रः तन्मूलकैर्वा

॥५३॥

क्षरसंपत्॥ भागवं तं तु सत्वापादकं सत्वं सत्व
गुणः सत्वं साधकत्वं देवत्वं च॥ शुद्धसत्वस्य भयवेग
तस्तत्र वर्ण्यमानत्वात्॥२६४॥ काव्येनेति॥ काव्ये
न काइंबर्यादिना शुक्रेण च॥ अक्षरसंपत्तिः ईश्वरोह
महमहं भोगीत्यादिरूपा नाटके प्राकृतक्रमः
बालभावप्रचारः प्राकृतजनप्रकारश्च॥ अलंका
रशास्त्राभ्यासेन॥ अलंकारित्येसंपादिते रामत्वं
नास्ति लंकायाः अरिः शत्रुः तत्वे सति रामत्वं अतः
भगवतः इयं भागवती सा चासौ स्थितिश्चेति विग्रहे
स्त्रियाः पुंवदिति पुंवद्भावः सा च साधारणी न किंतु
भागवतः महाभाग्यवतस्तत्र स्थितिः न त्वल्पभाग्यस्य
॥२६५॥ बालकानामिति॥ बालकाः शिशवः अज्ञाश्च॥

यामाता अमेध्यं मूत्रपुरीषादि [illegible] हरति॥ स्वयं निष्कासय
ति तस्य हृदये तस्य भक्त नैभवं यद्दमृतं दुग्धं तत्प्राशयि
त्री अमेध्यं शोषणात्तं स्वस्य आत्मनः हरेः यत्हृद्यं
प्रियं अमृतं मोक्षं भक्तिं वा ददाति॥२६६॥ नैष्ठिकं ब्रह्म
चारिणं वर्णयति॥ गृहं गेहं भार्यां वा॥ स्मरतं मैथुनं स्मर
ताद्देवत्वंच॥६७॥ गृहस्थं वर्णयति॥ विश्राणनं दानं क
लत्रेण सहितः सकलान्त्रायते इतिच॥६८॥ योनित्यमि
ति॥ मार्गणं याचकं अतिथिं बाणंच सद्देही वरश्रेष्ठः सवै
देही सीता तस्यावरः रामः बिभर्ति धारयति पोषयति ६९॥
संन्यासं वर्णयति॥ विप्रा इति॥ श्रीमता भगवता केनचिद्दा
दत्तेन च॥ प्र योग्या इति कृत्वा अध्याश्रमं गृहेषु आश्रमेषुच
सन्यासः चतुर्थाश्रमः सम्यक्न्यासः द्रव्य निधिः स्थापि
तः क्षत्रवैश्ययोस्तयोरनधिकारात्॥ सयस्य विधिवशात्

॥५४॥

लब्ध: लब्धे आचारविचारं च करोति तस्य द्रव्यलाभ: स्व
रूपलाभश्च कदापि न हीयते सम्यगाचारविचाराभावे तु
निषेधीतत्वात् सन्यासस्य भ्रष्टत्वात् स्वलाभात् हीनो भ
वतीति॥ २७०॥ सन्यासं प्रस्तौति॥ सूत्रमिति॥ सन्यास
वेषमात्रमपि फलदं किं पुन: सत्यतया यथा अर्जुनेनदं भ
सन्यासे क्रियमाणे पि भगवता साहाय्यं कृत्वा सुभद्रावाप्ति:
कारिता॥ अन्यत्र नर: मानव: सुभद्रं कल्याणं लद्दवगम
श्च॥ ७१॥ कर्ममार्ग इति॥ एकं काश्यपमेव गोत्रं येषां तथा
एकं गोत्रं भगवन्नामैव साधनं नान्यत्॥ ७२॥ उत्कृष्टा
नभक्ति वैराग्याणां सत्संग एव मूलकारणमिति तं प्रस्तौ
ति॥ आद्याविति॥ सत्पदं ब्रह्मपदं साधुचरणं च॥ कुणीवा
घ विशेष:॥ ७३॥ द्रोणोद्रेकभव इति॥ इदं पद्यं पूर्वव्याख्या
तं हंस: परमहंस: साधु: सूर्यश्च॥ ७४॥ शुचिमानसावग
मइति॥

२

द्विजेंद्राणां विप्राणां पक्षिणां च शुचिमानसं शुद्धांतःकरणं ता
शुचिः शुद्धं यन्मानससरोवरं हंसः परमहंसः प्रसिद्धश्च
अमृतं जलं स्वरूपलाभश्च कुवलये कमलखंडे पृथ्वीवल
ये च॥ द्विजानां सत्समागमेनांतःकरणशुद्धिद्वारा ज्ञानसंप्रा
प्तिर्भवति॥ ततो जीवन्मुक्तत्वेन सुखं चरंति यथा इतर
पक्षिणां मानसप्राप्तिस्तु दुर्लभः तत्रत्यकमलव
नविहारश्चेत्येषां वांछा चेत् हंससमागममंतरेण न सफ
लं स्यात्॥२७५॥ स्वर्गं धाक्षपभोगेष्विति॥ यथा नलस्य
हंससमागमेनैव दमयंती स्त्रीलाभः तथा नरस्य रामस्य
भगवतः प्राप्तिर्हंससमागमादेव॥२७६॥ सृष्टिमिति॥
लेखा एव लेखका देवास्तेषां पतिः ईश्वरः वर्णाः द्विजादयः
तत्प्रधानां सृष्टिं कृत्वा पश्यत् तावतेनद्रष्टुं अत्रस्थमेव
एकाक्षरं सद्ब्रह्म स्थितं असमावेशेन सृष्टिर्हि परब्रह्म
णि एकदेशे विवर्तरूपा तत्रानुपहितमित्युच्यते वर्णा

॥५५॥

नां तत्प्राप्तिस्तत्वमस्यादिवाक्येन लक्ष्यांशेन नास्तिचेद्व
र्णा अनर्थसंसारादिरूपं गताः स्युः तस्मात्कृत्स्नैः साधुपदं
निर्मितं ततश्च तत्वमस्यादिवाक्योपदेशेन अनुपहितेन सहै
क्येवर्णाः मुक्ताः स्युरिति यथा कश्चिल्लेखकानां पतिः वर्ण
मयीं अक्षरमयीं सृष्टिं पुस्तकं लिखित्वा पश्यति अहो यल्लि
खितं श्लोकादि तस्यैकमक्षरं अशमावेशतः कलितपङ्क्त्य
पेक्षायां बाह्यलिखितं तज्ज्ञानं लिखितवर्णानां सर्वेषां बोध्या
र्थेन संगतो भवेदिति तज्ज्ञानार्थं हंसपदं अलक्तकेन निर्मा
ति तेन बाह्यस्थितस्याक्षरस्य प्राप्तिर्भवति ॥ २७७ ॥ प्रमा
दादिति ॥ गतार्थमिदमुक्तश्लोकार्थेन ॥ ७८ ॥ सत्यपीति ॥ तथा
तीक्ष्णेऽपि सूर्यतेजसि सलिपाकसिद्धिर्न किंतु मध्ये सूर्यकांते
कृते तत्र अन्येन तेजसा तथा ब्रह्मणि सर्वत्रास्तु, तेऽपि पाकः
ब्रह्मत्वाकारेण परिपाको न भवति मध्ये सतां मणयः श्रेष्ठा
स्तेषु कृतात्श्चेत्परिपाको भवति ॥ ७९ ॥ कौटिल्यमिति ॥ कुचे

३

कोटिः अग्रिः तदाकारः चुचुकः तं लाति कोटिलः तद्भावः कौटि
ल्यं कचवक्रता तत्कौटिल्यं स्वगतं स्वबंधकं कुचयोः कंचुकेन बं
धः कुचानां मुक्तादामादिना धम्मिल्लकरणं उभयोर्बंधयोर्मुक्ति
कारणं तु स्मरः तस्य आविर्भावकर्तुः पुरुषोत्तमस्य रतिकलाको
विदस्य संगः तथा स्वगतदुर्वासनाभिर्बद्धस्य मुक्तभावः स्मर नरस्य
तादेवत्वं तच्छिष्यस्यात्मनि आविर्भावयति ॥२८०॥ स्तोतुमिति
॥सुमनसां साधूनां पुष्पाणां च भगप्रसंगः स्त्रीश्रीलौल्यंभ
गः एतदास्य देवता तदुपलक्षितः फाल्गुनमासः उत्तराफाल्गु
नीनां भगो देवतेति ज्योतिषे प्रसिद्धं तन्नक्षत्रस्य तत्पद
शकत्वात् भगेत्यनेन स विवक्षितः चैत्रसंबंधीयो विलासः
चित्राणां लेख्यानां अयं चैत्रः स चासौ विलासश्च माधवः हरिः
वैशाखश्च यथायो वसंतमाश्रितस्तेन फाल्गुनः पश्चात्सा
रितएव वसंतेपि चैत्रविलासंमक्तवंतः वैशाखः समीपए
व तथा सततामाचारं अनुतिष्ठता श्रीस्त्रीलौल्यमपसारि
तं स्यात् ॥ ततः सर्वत्रजगति चित्रतुल्यतां पश्यतः माधवः
॥२८१॥ स्वामोदेति॥ स्वामोदः निजानंदः सुष्ठुगंधश्च तस्य ॥५६॥
हेतुः यः सुमनसां साधूनां समयः आचारः पुष्पसमयो वसंतश्च ×

× मधुसमितेनागमरसं माधवमंच

112

तथागग
समीपएव यथा मृन्मये गजभानेपि मृतबुद्धिः अपत्रपा
ज्ञानेपि चैतन्यबुद्धिर्यस्येति चित्रविलासत्वं ॥२८२॥ अपत्रपा
इति ॥ कुजन्मिनो वृक्षाः पत्ररक्षणमकुर्वंतः वसंतो पवनतो पूर्व
पत्राणि पतंतीति स्फमनः समयं वसंतं प्राप्ताश्चे द्धरितभावं च
हंतो विराजंते तथापापयो नयोपि निर्लज्जा अपि साधूनामा
चारमनुतिष्ठंतो हरिरूपा भवंतीति ॥२८३॥ यइति ॥ द्विजेंद्रः
विप्रा दिश्चंद्रश्च कुटिलः दुर्वृत्तः वक्रश्च सद्वृत्तः सुशीलः वर्तु
लश्च ॥२८४॥ पुण्यक्रियादाविति ॥ अत्र पुंसि पुण्यं फलं बोधो
भक्तिः मोक्षः इति क्रमेण दृश्यंते सएव पुमान्नान्यः पुमानिति
स्फुटे पुः पवर्गः विद्यते यस्य पुमान् शब्दतो प्ययमर्थो भाति
सच उक्तं पंचवर्णा ख्यक्षरैर्घटित एवेति बोधोत्तरं भक्तियोगः ह्या
नीच भरतर्षभेति भगवदुक्तेः ॥२८५॥ यदृच्छालाभसंतुष्टा इति
॥ केचिदित्यनेन चटकादयः नकुक्कुटादयः चटकादयः केचि
द्युग्मत्वेनो त्पद्यंते मिथुनीभावश्च तयोरेव नायं कुक्कुटादौ

मि

योगमिति

नियमः विष्णुपदं आकाशः हरिचरणं च ॥ २ टीं ॥ योगमिति

॥ यः हरेः योगं कुर्वन्नपि महांतं भोगं वांछेत् स शेष एव न तु

मुच्येत प्र[illegible] तत्र भोगलिं याता ॥ किंच ॥ आकल्पं विपु

लोयः आधिभारः दुःखजालं तदेव गहनं कष्टं तत्रस्थाता

॥ यथा हरेर्योगं शयनसंबंधिनं प्रथयन् ॥ महांतं भोगं सर्प

देहं वांछति स शेष एव ॥ अधोगतिं पातालमूलं गतः क

ल्पपर्यंतं च विपुलायाः पृथ्व्या अधिको यो भारः तदेव

गहनं तत्रस्थितश्च ॥ अथ हरेर्योयोगं भक्तियोगं प्रथय

न् ॥ न भोगः नास्ति भागो यस्य विषयपराङ्मुखः स द्वि

जनायकः स्फुव्यक्तं शुक एव मुक्तिभाक् ॥ अव्यक्तं मौनी वाक्

॥ यद्वा ॥ अः वासुदेवः व्यक्तः शात्रे यस्य कीर्तनपर इ

सर्पः ॥ यथा हरेर्हरिहूणस्य योगं प्रथयन् न भोगः

आकाशगामी द्विजनायकः पक्षींद्रः शुकः कीर

॥ ५७४

एव ॥ स चमुक्तिभाक् स्वच्छंदचारी अव्यक्तपाकृत ॥

रोमांचइति ॥ यस्य हृदये सीताया उल्लासस्थानं

॥ ८७ ॥ रोमांचइति ॥ यस्य हृदये सीतायाउल्लासस्थानं तस्य एतानि चि

रामचंद्र: ॥ तपोयोगमासाद्यावतीर्ण: ॥ तस्य एतानि चि

न्हानि भवंति ॥ तदेक एव ॥ यत: तपोयोग: मायायोग:

तमासाद्य यश्चंद्र: ससीतोल्लासाधिवास: अत्यंतं सी

तं वषीति ॥ सशायो रैव्यात् ॥ अतएव रोमांच: कंप: वच

ना पटुत्वं च संपद्यते ॥ तमह अज्ञानं नामि स्त्रेव ॥ ८८ ॥

श्रीरामेति ॥ यत्र पुंसि रामस्या विर्भाव: स्फूर्ति: ॥ सम

हान् अनेकेषांच तारको भवति ॥ पुन: पुन: वेस्क इव्यंय

स्मिन् समहत्व इत्यर्थ: ॥ यथा सत्र नक्षत्रे रामावतार:

तत् महत्वेन दृश्यते तत्पुनर्वसुनक्षत्रं हि तारकमि

ति ॥ ८९ ॥ जातु चिदिति ॥ कुसंग: दु:संग: ॥ विच्छति: भूसंगश्च

शाठ्यादि: प्रदृयश्च ॥ सरामोदं सर्वदानंदं उत्तमगंधंच ॥

115

आमोदं कुसुमभवंम्रदे
सुमनसां साधूनां पुष्पाणां च ॥ आमोदं कुसुमभवंम्रदे
वधत्ते ॥२९०॥ प्रसिद्ध इति ॥ शिरः आद्याक्षरं ॥ तस्य
च्छेदेपि सिद्धः ॥ इति कृत्वा न सत्वं गतं यथा कुसुमं
स्वाशिरः च्छेदेपि सुमं ॥ तथापि नसत्वापगमः ॥ कुसुमं
सुममित्यमरः ॥१९१॥ द्विजिव्हेति ॥ द्विजिव्हाः सर्पाः ख
लाश्च ॥ गुरवो महांतो जनाः ॥ अगुरवः गुरवोवयमिति न
मन्यमानः अगुरवश्चंदनाश्च ॥ अगुरु अगरु इति उभ
यमपि कोशप्रसिद्धं ॥१९२॥ लाभे ष्विति ॥ कुलाभः भूमि
लाभः कु इति वर्णलाभश्च तस्या पहारे कृतेपि कुली
नाः [illegible] उत्सृंखला नभवंति लीना एव सुस्थः ॥ कुसुम
स्यापि च्छपहारे सुमवत् ॥१९३॥ उपसर्गेति ॥ वरस्य स
मीपे उपसर्गः उपद्रवः न्यक्काराद्विः तस्य प्रकारे नि
र्मितेपि न स्वंभावं मुंचति ॥ वरस्य संमुखे पुरस्तात् उप

॥५९॥

तस्य आसंजनेपि प्रवरो भवति ॥ पू
सर्गीयः प्रकारः अधिको भवति ॥२९४॥ गतइति ॥
वविस्थितितोपि अधिको भवति ॥२९४॥ गतइति ॥
वविस्थितितोपि श्रेष्ठः श्चंद्रश्च ॥ क्षयं आपत्तिं क
द्विजराजः विप्रादिश्रेष्ठः श्चंद्रश्च ॥ क्षयं आपत्तिं क
लाक्षयंच वृद्धिं संपत्तिं कलावृद्धिंच विष्णुपदं भग
वच्चरणं आकाशंच अमृतं मोक्षः करे यस्येति च ॥ अमृ
तरूपाः कराः यस्य ॥१९५॥ हृदयेति ॥ यः कृष्णध्यानप
रः तद्गुणश्रवणकीर्तनादिपरायणः ॥ स्ववपुश्चंद्रनवत्
क्षपयन् विदुषः प्रीणयति स एव द्विजश्रेष्ठाः ॥ यथा चंद्रः ॥
कृष्णं कालिमानं मंडले दृश्यमानं यं अंकमिति वदंति
॥ आकाशे नक्षत्रजने कर्यैः कृष्णपक्षे मंडलं क्षपय
न् अमृतेन देवान् पुष्णाति ॥ अतएव द्विजेंद्रः ॥ पथ्यापि
यपीतस्य स्करैर्हिमांशोः कलाक्षयः श्लाघ्यतरोहि

वृद्धेरितिकालीदासः ॥९६॥ शूरइति ॥

॥कलेति॥ पर्यस्तिकापरिकरः॥ गलं मूलं चिज्जउयोगः
जलदुग्धयोगश्च॥ शुचिः पवित्रः शुभ्रश्च द्विजः विप्रा
दिः पक्षीच॥ हंसः परमहंसः प्रसिद्धश्च॥२९-टी॥ यद्विन्ने
ति॥ यथामुखेभवाः द्विजाः हंताः तएव मुख्याः॥ के॥
येभिन्नाः चर्विताः येकठिनविषयाः॥ खर्जरीक्षरूपाः
तज्ज्ञरसं रसज्ञा जिव्हा दधते बिभर्ति॥ दध धारणे इत्य
स्यरूपं॥ किंच विशदः शुभ्रः यः स्वभावः तेनस्कभगाः
तथायेभिन्नाः स्पष्टतां नीताः येकठिनादुरवगाः विष
याः॥ शास्त्रसिद्धांताः तज्ज्ञरसं रसज्ञाः रसिकाः दध
ते दधति॥ धा धातोरिदं रूपं बहुवचनांतं विशदः शुद्धः
॥९९॥

हा:

॥५९॥

118

निजेति॥ शुको हि श्रेष्ठः पक्षी काकाद्यपेक्षया॥ सहंसतां
गतः॥ हंसः सन्नपि तस्य गर्वं न भजते॥ शुकः व्यासपुत्रः
परमहंसोपि॥ अहंसः सोहं सोहमिति मनुते नहंसोहं
इति॥ ९९॥ यासाध्वसंगतायुक्तमिति॥ या जनता जनसं
हतिः साध्वसु असंगता सा साध्वसं भयं प्राप्तैवेति युक्तं
॥ परंतु यासाध्वसंगता साध्वसंगतेति चित्रं॥ सोसाध्व अ
संगता सन्मार्गलग्नेति विरोधपरिहारः॥ २००॥ उत्त
ममूर्धन्य इति॥ पुरुषो हि परमेश्वरेण यः सृष्टः स उत्त
ममूर्धन्य इति सृष्टः कस्मात्पश्य॥ उत्तमः अंत्यः मूर्धन्यः
॥ षकारो यस्य॥ तस्यान्यदपि सृष्टं॥ किं॥ मुखं॥ उपका
र एव कार्य इति॥ कस्मात्पश्य॥ मुखं आद्यमक्षरं उका
र युक्तं पकारयुक्तं चास्ति॥ ननु अस्य रूपेणैव मुख्यताभ

वतुनैवं ॥ तच्च द्वारदनंतरं ननु मुख्यं कुतः ॥ पश्य पु इत्यक्ष
राद्नंतरमेव रूणा स्ववर्णेन उपयुक्तं दृश्यते तस्माद्युक्त
मनवद्यं ॥३०१॥ संप्रार्थित इति ॥ यो हि भव्यः उत्तमः जनः
अर्थाय प्रार्थितः तस्य कालवशात्पूर्वभावस्थितिः पूर्वो
वत् संपद्भूता यद्यपि नास्ति तथापि यत्र क्वापि स्वयं
भ्राम्यन् किंचित्संपाद्य अल्पमपि स्पर्शनं दानं ददत्
॥ तोषं कुर्यादेवेति ॥ एतच्च युक्तमेव ॥ यो हि भव्यजनः त
स्य पूर्वभावस्थितिः पूर्वोयो भकारस्तत्र वस्थानंनचे
तू व्यजनो जातः यश्च व्यजनः स्वयं भ्राम्यन् अल्पशः
स्पर्शनं वायुं ददत् तोषयत्येव ॥ व्यंजनस्य पुंस्त्वं च कोशां
तरे दृष्टं ॥३०२॥ नूनमिति ॥ यद्दंत भगिवानाविर्भूतः त
स्य बहव ऊहाः तर्काः नसंति ॥ बहुलोहानां जातं ॥ बहुलं
चत लोहजालं च तालकं कुलुप इति लोके शृंखलकडीति ॥३॥

॥६०॥

120

परमात्मज्ञानपूर्वकं सति ब्रह्मणि लग्ना
॥ज्ञानद्धिरिति॥ परमात्मज्ञानपूर्वकं सति ब्रह्मणि लग्ना
धिषणा एषां ॥ ब्रह्मनिष्ठा अपि उत्तमं योगं अष्टांगं॥ कृ
रणं वर्णाश्रम कर्माणि। उत्तमा तिथिपूजनं न त्यजंति॥
पूर्वानुवृत्त्याचरंत्येव न तु निषिद्धानि यथा देवज्ञागमना
दिमुहूर्तदाने लग्नमेव प्रबलं मन्यंते तत्र सति संभवे
नक्षत्रयोगकरणतिथीनां उत्तमानामादरं न कुर्वंतीति
च ॥२०४॥ ज्ञानं तीति॥ कीर्त्या वत्यः स्त्रियः तन्नामग्र
थश्च॥ व्यासः वेदव्यासः वृत्तादीनां विस्तारश्च॥ एतेषाम
स्तु तमानां साक्षात्सहवासस्तु पवित्र एव॥ परमेषां स्त्री
णां सहवासोऽपि ज्ञानफलायेति कृत्वा तत्र व्यासो वसिष्ठ
तो भवति॥५॥ ज्ञात इति॥ अपामार्गशेखरः अपामा
र्गाः सन्मार्गस्था: तेषां मध्ये शेखर इव॥ यः ज्ञातस्वात्म

परीपाकः अप्रत्पक्व प्रवणात्मनां विषयिजनानां रंज
नायन स्यात् ॥ परिपक्का अपामार्गमंजरी ॥ प्रतिलोमं
आस्फालय तायुधेति ॥ ३०॥ सभापेति ॥ सतां नाथाः
साधुश्रेष्ठाः तेषां मंडले निविष्टाः संतः अमृतं मोक्षं भ
जंते ॥ यद्दिच विषयाणां माननेस्थिता दुरंतमस्फमिस्फ
भयमपियुक्तं ॥ सतां नक्षत्राणां नाथश्चंद्रः ॥ अमृतं सु
धां ॥ विषं गरलं यमश्च ॥ तयो राननेमुखेस्थिताः ॥ ७ ॥
निलय इति ॥ निलयः गृहं रलयोरैक्यात् ॥ निरयः
नरकः वनिता वनमस्यास्ति वनी भतस्तद्भावः वनिता ॥
वनवासः सा वनिता स्त्री ॥ स्वस्य आत्मनः लौल्यं
आत्मज्ञानोत्कंठा तत्स्वलौल्यं ॥ द्रव्यलोलुपता ॥ दी
बहुलतरेति ॥ कर्मभूमित्वात् देवा अपि अत्रैयां वंतइति जन्म
॥ ६१ ॥

122

अत्यंतलरंहितकारके रसालतले तपस्वितपोविषये सुमनसः सा
धवः बहवः उत्तिष्ठते उदोऽनूर्ध्वकर्मणीति आत्मनेपदं उ
त्थिताभवंति परंतत्रअंतरायभूतं कांताः स्त्रियः राःद्वेषं
जनाः अनुबंधिन इतरे च॥ तद्विषयकं वेगं संसक्तिरूपं
विषह्य सद्रसः ब्रह्मरसः फलं एषां तादृशाः विरलाः त
थाचगीतासु मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये॥
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः इति अयमे
वदृष्टांतः यथा बहु[illegible] इति भिन्नं पदं लरहिते लकाररहि
ते रसालतले लकारापहारे सति रसातल इति जातं तत्रैतपस्वि आम्रे
माघमासे सुमनसः पुष्पाणि बहु यथास्युः तथा उत्तिष्ठंते॥
परं कांतारं वनं तत्संबंधि यत् [illegible]जनं वातादिनाकंपनं तस्य
वेगं विषह्य सत् उत्तमो रसो येषु तानि फलानि येषां तादृश
रूपेण अल्पा एवा वर्तिष्ठंत इति॥३०९॥ पं कोद्भूती रजोभिरिति॥

पापयोनिरपि रजोगुणव्याकलितो फलसाम्यापि चेत्सूरिभ्यो
ज्ञानिभ्यः सकाशात् प्रसादः अनुग्रहो लब्धः तर्हि भ्रमेण रहि
तः सद्दामोदेन हर्षेण पूर्णः स्यात् वासुदेवो यतं करे धत्ते कथं
पद्मवत् तदपि कर्दमोत्पन्नपराग पूर्णकंटकैः शुकैः संगतं द
क्षिणापथे हि सरसीषु महापद्मं दंडेषु कंटका दृश्यंते दंडेचु
बतिपद्मिन्याः सहकर्कशकंटक इति दंडिप्रयोगाच्च तत्रैत्सू
यातु आत्मप्रसादः फुल्लतायेन भ्रमरेभ्यो हिताः सन् आमो
दः गंधः तेनपूर्णो भवति ततस्तं पद्मं हरिर्हस्ते करोति अथ
किं वाच्यं तत्रपुरुषे मोक्षलक्षणा लक्ष्मीर्निवसेदिति यथा
तादृशपद्ममेव तस्या आलयः तथायमपीति ॥ २४ ॥ सामा
न्येनसा पूर्वं वर्णयित्वा विशेषाकारेण स्तौति तत्र नारदं ॥ यइति
॥ कलिः युगं कलहश्च सः ब्रह्मरूपः नारदश्च महती प्रतिष्ठा
महतीनाम्न्या वीणा वीणायाः प्रतिष्ठा स्थितिश्च ॥ ११ ॥ वीणा
याइति ॥ महत्या वीणया गुणान् तंत्रीः कन्वानाः महत्याः

॥ ६२ ॥

बृहत्याः त्रिभुवनश्रियः भगवद्रूपायाः गुणान्कथयमानः
महत्या मायाया गुणान्हेयोपादेयविषयरूपान् आजि
हानः त्यजन् ॥१२॥ प्रह्लादेति ॥ पर्वतो नाम नारदसह
चारी कश्चिद्गायनः पर्वतः सन् हरिगुणान् गायन्व्रजति
किं पुनः सचेतनाः प्रह्लादध्रुवप्रभृतयः इति तस्माद्दूर्णयितुं वा
कृनप्रसरतीति ॥१३॥ व्यासं वर्णयति ॥ त्रिभिः हीनजाति
रिति स्पष्टं ॥१४॥ कृष्णद्वैपायनमिति ॥ कृष्णं व्यासं हरिं
च द्वीपे अंतर्जलतटे ᵛयनं यस्य तस्य पराशरपुत्रं द्वीपस्य
जेगस्य इदं द्वैपं तच्च तदयनं गजेंद्रगतिं महाभारतेन
मोदते महान्यो भारः स एव तमः तस्य तमसः दिनं दि
वसरूपं पुराणवक्तारं पुरुषं अनादिं च ॥ नरे मनुष्ये पार्थे च
ब्रह्मविद्यां ब्रह्मसूत्ररूपां गीतारूपां च ॥१५॥ यद्ब्रह्मेति ॥
य[?]प्रणीतब्रह्मसूत्राणि अथातो ब्रह्मजिज्ञासा इत्यादी
नी यज्ञोपवीतानि च ब्राह्मणत्वं ब्रह्मत्वं च वेदविभाजकं ॥

वेदमध्यापयंतं ॥ पुराणाचार्यं पुराणवक्तारं ॥ ३१६ ॥ शुकं वर्णय
ति त्रिभिः ॥ आशाः दिशः वसानाः दिगंबराः आशाकुलं च ॥
निजगुह्यं आत्मतत्वं गुह्यदेशं च शुकस्तु आशानामवसा
नं यस्य तादृशः ॥ १७ ॥ द्विजेष्विति ॥ मुनीनां ऋषीणां अ
गस्तिवृक्षाणां च ॥ शुक्लांतः करणगतं अमलरसं च ॥ १८ ॥ *पुष्पगत
रसं *
द्राक्षेति ॥ फणिजं क्षुपमरीचं मिर्चीति लोके कमपी
हरसविशेषं न वेत्ति ॥ १९ ॥ शबरीं वर्णयति त्रिभिः ॥ सदु
पासनेति ॥ उपासनं उपास्तिः शराभ्यासश्च ॥ अरिः का
मादिः खरदूषणादिश्च अबला स्त्री बलानि बला न
बला अबला च शबरी बकाररहिता चेत् शरी भवति स च
रामएवेति ॥ २० ॥ शबरीति ॥ शबरी कोलवितरणादपि
भवजलधेर्महोर्मिघोरस्य पारं परं गतवती येन स
लाघवसमाश्रयो जयति ॥ २१ ॥ ॥ कोलं बदरीफ
लं तद्वितरणं दानं लाघवं लघुत्वं राघवश्च महतो भवजल

॥ ६३ ॥

धेः पारं कालेन चर्मावन स्व वंशा विदल निर्मित भांडेन टोक
रत्वेन गंतुमशक्यं तथापि गता अहेतुः लाघव समाश्र
यः यो हि अतीव लघुः तुलप्रायः तेन साध्यते वगंतुं गुरू एव
भूतेन पारमशक्यं ॥२१॥ आत्यंतिकमिति ॥ सेवा परिचर्या
मुष्टिप्रमाणं बदरं सेवमित्यभिधीयते इति भोजनकुतूह
ले वचनात् सेवानि बदराणि ॥३२२॥ महाकपिरिति ॥
विलोपितः अंतकोयेन सः महाकपिः हनूमान् महाकपि
र्वैरूप्यः विना विकारेण लोपितः अंतः अंत्यवर्णः पिका
रो यस्य स ताहश एव भवति ॥२३॥ सत्वमिति ॥ स्मृति
र्भगवतो गीतारूपा सत्वं सुखे संजयति रजः कर्मणि भा
रतेति नित्यं च हा सत्वं हास्य तन्नित्यहासत्वं नित्यहास
त्वमंगीकृतं चेत्तत्र नित्यहा सत्वमस्येव नित्य हा हा हि
सत्वे अतिशं सुखं यतः सत्वं सुखे संजयति इति भगवाने
वाहेति ॥२४॥

१२ एव

बिभीषणं स्तौति॥ बिभीषणा इति॥ दीपकत्वं साधयति सभाजने दा

षु उद्दामो यो दशास्यो रावणः तं दूषयति रामो हि साक्षाद्दिना

रायणस्तेन सह विरोधं माकार्षीरिति सभायां येन रावणं प्रति

बोधः कृतः सभाजनं पात्रं तेन सह या उद्दामदशा महती व

र्तिस्तस्याः आस्यमुखं दूषयति सर्वेभिमो रामः तत्रयः स्ने

हः तस्य भरेण परिपूर्ण इति सर्वोत्कृष्टः यः स्नेहः तैलं च

अतएव निरंजनः विषयवासनाशून्यः कज्जलरहितश्च

निकृष्टतैलेन च कज्जलबाहुल्यं॥३२५॥ द्वाभ्यां कबीरा

॥अहो इति॥ ख्यं भगवद्रूपं वर्णयति॥ सन् आरामः उद्यानं तत्पदं स

द्वारामस्य चरणं च कुजन्मनः वृक्षस्य नीचयोनेर्यवनस्य

च सत्ता उत्तमेन रसेन जलेन च ब्रह्मानंदेन च सत्यः स्फु

मनसः पुष्पाणि यस्य तस्य भावस्तत्ता उत्तमसाधुता

च॥२६॥ यो हीति॥ यः कबीरः आदिमो यो वर्णः ब्राह्मणः

तस्य योग्यः य उभररसः उत्कृष्टरसः ब्रह्मरसः तं प्राप्तः

सः साधुसहस्रश्रेष्ठः कथं न स्यात्॥ अपि तु स्यादेवेति॥ कयो हि क
बीरः कुजन्मी वृक्षः आदिमवर्णः ककारः तदुत्तरं रेण रेफेण सं
गतः करवीरो भवति बवयोरैक्यात् यश्च करवीरः सः पुष्पसह
स्रमध्ये श्रेष्ठः एकतोन्यानि सहस्रं पुष्पाणि एकतः करवीर
मिति पारिजातादौ द्रष्टव्यं बकुलः पुष्पसहस्रान्नंद्यावर्तं वि
शिष्यते नंद्यावर्तसहस्राधिककरवीरं विशिष्यतेति नृसिंहपु
राणे॥३२७॥ कमाढ्यं स्तौति॥ नृणामिति॥ कमाला इयं समाख्या
नामद्वयमेव अयं नृमूर्धन्य इतीममर्थं कथयति केमस्तकेमा
ला पुष्पस्रक् कमाला या कमाला मुंडमाला सा कमूर्धन्येवेति
॥३२८॥ तुलसीदासं द्वाभ्यां॥ आत्मारामेति॥ आत्मारामनामा
कश्चित्कान्यकुब्जो विप्रः तुलसीदासस्य पिता॥ आत्मारामात्
समुद्भूतिर्यस्य आमोदस्य संतोषस्य मंदिरं एतादृशः तुलसी
दासनामा साधुः रामस्य अन्येभ्यः कोटिसाधुभ्यः प्रीतये भ
वति इति युक्तं आमोदस्य गृहं तुलसी हि अनेकपुष्पा

३

व

पेक्ष्यारामायरोचते तथाच तत्वसागरसंहितायां योगिनां निर्वृतौ
यांध्या कामिनांच यथा रतौ पुष्पेष्वपि च सर्वेषु तुलस्यां तु तथा हरेरि
ति सा चेत्परोद्यानसंभूता किंचिद्गुणहीना इयं तु आत्मारामसमु
द्भूतिः ॥३२९॥ लोकोयमिति ॥ अत्रेयमाख्यायिका तुलसीदासो हि
राजपुरुष आसीत् स राजकार्यार्थं क्वचिद्गत्वा कियता कालेन गेह
मागतस्तां समतानाम्नी तस्य भार्या मातृगृहं गताभूत् तदा काम
मोहितः सन् रात्रौ श्वशुरगृहं प्रतिगंतुं निर्गतः तदा मध्ये महानदी
उपस्थिता तत्र दृष्टं तावत्कश्चित्प्रेतस्तटे लग्नोभूत् तदा मन्य
तेस्म किमहो वाच्यं मम प्रियया नौकेयं मदागमनार्थं प्रेषितेति
ततस्तदुपर्यारूह्य पारं गतः श्वशुरगृहं गतस्तावत् प्रिया निद्रा
गेहगवाक्षात्कृष्णभुजंगो महान् लंबमानोभूत् तद मन्यतेस्म
किमहो मत्प्रियया मदारोहणार्थं महारज्जुर्मुक्त इति तेन आरु
ह्यांतर्गतः निद्रितां ममतां बोधितवान् सा विस्मिताब्रवीत् ॥
किमिदं कथमत्रैते श्रीमच्चरणा गतवंतः सः आह किं मम आ
नर्माचरसि त्वयैव नद्यां नौका स्थापिता गवाक्षे रज्जुश्च मुक्तः

× इति श्रुतातया, ×

हं पश्यामि गरं कोसौ रज्जुरिति दीपं गृहीत्वा दष्टं तावन्म
हाकालसर्पः दृष्टः शिव शिव कोयं साहसिकता हं हो कीदृग
यं दुरंतवीर्यः कामः ततश्च तयोक्तं एवं सो हृदं भगवदर्पितं
तं स्याच्चेत् किंनाम दुर्लभं स्यात् तदा धन्यतदा त्वमेव विरक्त
स्तां नमस्कृत्य त्वमेव मम गुरुरिति वनं गतः ततश्च तत्र राम
दर्शनं जातमिति ममतामपत्वं केचिद्व्याघ्रं प्रेतमधिष्ठाय
मंत्रं जपंति जांगलिका भुजंगानाकलयंति ॥२०॥ रामदासं वर्ण
यति ॥ अकिंचनेति ॥ दासः स्वामी समर्थः इति तस्य समाख्या ॥२१॥
योहीति ॥ रामदासोहि परे ब्रह्मणि लीनः परस्यास्तन्नामक दुर्ग
स्य इनः स्वामी परलीनः ॥२२॥ यो रामदास इति ॥ यो रामदासः
स्यात्तस्य गृहे सदा कल्याणं तं दुर्गायाः पार्वत्याः ईशः शिवः सदा
सभाजयति पूजयति अथ भागवतायूयं प्रियास्य भगवान् यथे
ति भागवतोक्तेः अथ रामदासस्य गृहे कल्याण स्वामी दुर्गाणां प
र्वतिकोटराणां वर्ईश्वरःपति शिवः शिवाजीनाम राजा तं जयति ॥२३॥ पू
रामदासेति ॥ स्पर्शमणिः कुशी अयस्यः शंकुः तांतांति कल्या
णाय ॥

131

स्फुवर्णीय अन्यत्स्पष्टं ॥२४॥ गंगाधरः रामदासस्यज्येष्ठभ्राता श्रेष्ठ इति रामीरामदास इति ख्यातः शिवश्च सूर्यः रामदासस्य पिता सूर्याजीपंत इति रविश्च खरस्य खलस्य शोभनेन लक्षणे न चिन्हेन अबुदाख्येनच ॥ भाळी अथाव्रूअसे ॥२५॥ हनुमतासहाभेदं स्तौति ॥ ध्वस्तमहाशोकवनमिति ॥ अथ हनूमानशोकवनं रावणस्य अक्षएतन्नामा रावणस्य सुतः सती रुक्रुविःश्रीलिः यथा फलेषु आवासो वासनायस्य सीतासंदेशेन कल्याणस्य य च्छिवं कल्याणं तादृशं रामपदं मंगलानां च मंगलमित्युक्तेः तत्र सोल्लासं अन्यत्र महाशोकस्थलदेववनं अक्षाणि इंद्रियाणि संतः उत्तमाः द्रुमा यत्र तादृश श्वाफलाख्यो ग्रामः तत्र वसति कल्याणः शिवश्च तयोः शिष्ययोः पदे रक्षणे ॥२६॥ श्रीराम इति ॥ नास्ति क्रोध समो रिपुरिति लक्ष्मणं प्रति राम आह तस्मात्को पयुक्तेन न भवितव्यमिचे द्रामदासोभवतेन तथा स्याः यो हि रामदासः सः अकोपयुक्त एव अक्कानाम्नी काचिच्छिष्य भावं गता तया उपसमीपे युक्त इति प्रसिद्धं ॥२७॥ श्रीराम इति ॥ यथा

ति

माता बालकं प्रति भावाभावरूपेण लालयति रेवत्स एतत्तुभ्यं
दत्तं परंन्धो नास्ति परस्त्वो दातास्मीति अकानाम्न्याः पिता
रूद्र नामा देशलेखक आसीत् रामेण कानने जाता रावणवधा
द्विरूपा लीलातया रूद्रः शिवः अभिरमितः कलौ तु अकानन
जातया रूद्रं रमयितुं प्रवृत्त इव आकायाः आनंदसुखं तस्मा
ज्जातया अभंग पद्यरूपया ॥३३८॥ आकामतेति ॥ निष्काम
ता परमश्रेष्ठेति कृत्वा वांछसि चेत् श्रीरामदासोयः शरणं रक्षि
तातं प्रति व्रज तत्र अकामता वर्तते श्रीरामदासस्य शरणं
मठं व्रज तत्र आका॥मता॥मान्यास्ति ॥३९॥ आपूर्येति ॥ पुरा
भगवता वेणुं करे कृत्वा मुखेन कर्णविवरं अंत्यच्छिद्रं आपूर्यत
ज्जन्य मंजुरवेण साध्कः यः व्रजः गोकुलं तस्य मोह उत्पादितः
दासेन तु हस्ते वेणुं धृत्वा तत्कर्णं स्वमुखेन आपूर्य मंत्रोपदेशं कृ
त्वा तदुत्थेन रामायणादि प्राकृतग्रंथ स्व ~~स्वम~~ साध्क समूहस्य
मोहो ध्वंसित इति वेणू नाम्नी काचित्स्त्री शिष्यत्वमागताभूत्
तत्कृत रामायणमतीव रामणीयकशालि ॥४०॥ श्रीरामदास

जुरवेण

स्य मरणो त्साहं वर्णयति ॥ रामेति ॥ रामपद्मयं: आकाशं शून्यं नृपाः
षोडश एवं च अंकानां वामतो गतिरिति शालीवाहनशकः ख्युत्तर
षोडशशती संख्या तत्र दासपदं हित्वा स्वात्मनाशिष्टः राम एवाभ
वाभवदिति सज्जनेषु श्रेष्ठः सज्जननाम दुर्गस्य भूषणं परळी
दुर्गस्य सज्जन इति नामांतरं ॥ ३४१ ॥ उक्तसंख्य शक एव कुतः
प्रयाणमित्यत्र हेतुमाह ॥ यस्त्यक्त्वेति ॥ यः श्रीस्त्रीत्यागपूर्व

श्री

कं रामदासो भूत् तस्य षोडश कलाः पंचज्ञानेंद्रियाणि पंचकर्मे
द्रियाणि पंचप्राणाः चित्तचतुष्टयमेकमिति एतच्च लिंगमि
त्युच्यते तच्छून्यपूर्वकतया तद्भंगपूर्वकं रामे ब्रह्मणि लयः
स्यात् इति रामपदेनासौ परं ब्रह्माभिधीयत इति तापनीय
श्रुतेः तथा च षोडशांकः लिंगबोधकः तदुपरि शून्यं क
ला न्यकाभिहिते रामे लयः एवं सूचयन्निव स्वयं निर्दैना

र्श

याभवत् ॥ ४२ ॥ माघे प्रयाणे हेतु माह ॥ यः पुंसेति ॥ ये
न यस्तपो योग आस्थितः तेन तत्रैवावसानं कार्यं न तु तं
परित्यज्य आरूढपतितत्वदोषस्मरणात् अतस्तपस्येव
त

॥ ६७ ॥

अवसानमकरोत् तपामाघेथफाल्गुनेतिकोशात्तपःश
ब्दो माघवाचकः ॥३४३॥ दुर्मतिसंवत्सरकृष्णोऽभिप्रायमाह पक्षा
॥आद्राविति॥ आद्रौ दुर्मतीनां विषयिणां संग एव निंद्यः भ
वतु नाम सः यथाकथंचन परयामः परंतत्र भगप्रसंगः
स्मरतप्रसंग उपनमेच्चेत्तदा देहावसानमेव वरं नत्ववस्था
नं न तथास्य भवेत्क्लेशो बंधश्चान्यप्रसंगतः योषित्संगा
द्यथा पुंसो यथा तत्संगिसंगतः पदापि भिक्षुर्न स्पृशे युवती
द्दारवीमपि इति भागवतात् ॥ यथा मम दुर्मतिं ॥ एतन्ना
म संवत्सरसंगोऽभूत् ॥ पुनः तत्र भगप्रसंगः फाल्गुनप्र
संगः समीप उपनतः अतो मया देहस्त्यक्तः इति निदर्श
नं लोकसंग्रहार्थं कालिकादिपुसंयोगे कालिकादिद्वयं
द्वयं ॥ अंत्योपांत्यौ पंचमश्च त्रिभं मासत्रयं स्मृतमिति सूर्य
सिद्धांतोक्तेन नक्षत्राणां मासव्यपदेशत्वात् ॥ भगः
पूर्वाफाल्गुनी तद्युक्तो मासः

वा

॥फाल्गुनः लक्ष्मणा अशी आद्यच॥३४४॥ मंदवार प्रयाणे
(वार) हेतुमाह॥अस्मिन्निति॥ मंदेंगमने पुनरावृत्तिर्नैतिद्धवि
त्॥क ज्योतिःशास्त्रं मनसि कृत्वैतत् यो रामदासः परं
परे जेतुं गतः॥ स तत्रचिरं तिष्ठतु॥ न पुनरागच्छेत् इति
सूचयितुं मंददिने शांतो भवत्॥४५॥ पुनश्च कृष्णपक्षा
वसानहेतुमाह॥स्नातानामिति॥ गुरूकरूपितराणां
संस्थास्थितिः॥शुक्लपक्षे अस्करभावे न स्यात् किंतु
(ष्ण) कृपक्षे॥ दैवभावे॥ गुरुः देशिकः बृहस्पतिश्च॥ शुक्रः
दैत्यगुरुः॥ पूर्वपक्षश्च॥ रलयोरभेदात् कृष्णः विष्णुः
वधश्च॥ नत्व बंधः संस्थास्थितिः मरणं च॥४६॥ नव
म्यां प्रयाणे हेतुमाह॥पुण्याहाविति॥ चैत्र शुक्ल नवमी
राम.जन्मोत्सवेनाभूत् पुनः अस्य दास्य[स] जन्मनापि

॥६६॥

436

रामदासस्य जन्मापि अस्यामेव तिथाविति वदंति॥ तेन कारणेनातीव महत्त्वमभूत्॥ ततश्च सा जात्यात् यावत्त्यः शुक्लपक्षस्यानवम्यस्ताः सर्वा गच्छकृष्णपक्षीयानवमीर्जहस्कः नभवत्त्यः अस्मादेश इति॥ ततश्च ताः सर्वा एनं शरणागता इवाभवन्॥ अनेनोक्तं पुण्यैर्विनानहि भवंति समीहितार्था इति॥ तपस्तप्यतामिति॥ तत्र काचित्तपोयोगं कृतवती॥ तामयमवदत्॥ त्वां प्रति गन्मोत्सवेन कृतार्थयितव्यं॥ परं मम पुनर्जन्माभावः अतः प्रयाणोत्सवेन भवतां संभाव्यतां पुण्यां करिष्यामीति तदैव तां पुण्यतिथिं कृतवानिति॥ ५७॥ मध्यंदिने हेतुमाह॥ पूर्वान्ह इति॥ पूर्वान्हो वै देवानामपरान्हः पितॄणां मध्यंदिने मनुष्याणामिति तैत्तैः स्वस्वकाले पुण्यत्वात्पाभ्यर्पितः सन् सर्वेषा

137

मपि प्रियाय मध्यंदिनमंगीचकार तत्र त्रयाणामपि संबंधोस्तीति ॥ अवभृथः मरणं ॥ यन्मरणं तदवभृथ इति श्रुतेः ॥ ३४८ ॥ श्रीरामदासो हनुमदवतारत्वात् स एवेत्याह ॥ किं युत्म्येति ॥ अस्य अभिधानाम रामदास इति सैव हनुमानयमिति बोधयति ॥ तदर्थ मुक्तिप्रपंच क्लेशोन कार्य इति ॥ ॥ ४९ ॥ गद्यं ॥ गद्येन तं नमति ॥ दुस्तरेति ॥ गौरवंपुष्णाति तस्य सिंहसंहननः स्वंगः यथोक्तलक्षणावयव इत्यर्थः ॥ तमस्तोमः अंधकारः अज्ञानश्च ॥ श्लाघं श्लाघं श्लाघयित्वेति णमुलंतं विष्कंभः विशालाः ॥ अर्घदं अवाव इति लोके ॥ श्रुत्यंतदृशीं वेदांतावलोचकः रामः प्रेमारक्तिमा च ॥ अस्माकं दास्य तुलसीदासस्य उपकंठं समीपे कंठसन्निधौ च ॥ राघवरामः लघुत्वं चरतयो रभेदः श्रुत्यंतं वेदांतं कर्णसामीप्यं च स्वसाम्राज्यं ब्रह्मसाम्राज्यं राज्यं च ॥

॥ ६९ ॥

स

138

रामावतारे कुब्जा मंथरानाम्नी॥ कृष्णावतारे कंसदासी कुब्जानाम्नी॥ कुब्जा यष्टिविशेषः कुबडीति अक्षमाला स्मरणी इंद्रियमाला च॥ सकोपीनः सः कौ पृथिव्यां पीनः समर्थः समृद्धः आचार्यः शंकराचार्यः धर्मप्रवक्तारश्च॥ स्वामी ऐश्वर्यवान् समर्थः शक्तश्च॥ एतस्य लोके स्वामी समर्थ इति संज्ञा प्रसिद्धा॥ आचार्योक्तधर्मः राज्ञा प्रवर्तितश्चेत् प्रचरति नान्यथेति अर्थः कल्पवृक्षो हि ज्ञानवर्जं सर्वं भोगजातं ददाति॥ तादृक्कौशली ज्ञानप्रदानकौशलं अहो कल्पवृक्ष भवता एवं तपसा वपुः संशास्य रामदासपदयुगं समाश्रितं तर्हि तत्र किमस्ति चेत्पृच्छतो महाराष्ट्रजनाः तदीयभाषया चटचट इति उत्तरयन्ते वेति चटाई इति महाराष्ट्रे प्रसिद्धं॥ चटचटेति पादुकाशब्दानुकरणं च॥ सर्वांगीणां सर्वांगव्यापिनी॥ शीतार्तिः जानकी

दुःखं शीतपीडा च ॥ अनीलपाटलां दुर्मुजीति लोके ॥ २५० ॥ व्हायेति ॥ मनुजजनि नृजन्म रामदासता रामदासत्वं याजनिका ॥ ॥ अस्य जन्मनः फलावगमः साफल्यं ॥ याजनि ॥ अत्रजने चाफलावगमः चाफळनामग्रामप्राप्तिः ॥ ७१ ॥ तत्कृतदासबोधाख्यग्रंथं वकुमाह ॥ बोधस्येति ॥ बोधः ज्ञानं [illegible]दासस्य पृष्ठेन त्यजति ॥ दासस्य यद्यप्यौदासीन्यं तत्र तथाप्येतत्पृष्ठलग्न एव दासबोध इति ॥ शब्दे दासस्य पश्चाल्लग्नो बोधः स्पष्ट एव दृश्यत इति ॥ ५२ ॥ इति रामदासवर्णनं समाप्तं ॥ रंगनाथनामानं भक्तं वर्णयति ॥ शूरेति ॥ स च सर्वदा कंचुकोष्णीषखड्गधनुर्बाणादिशूरवेषेण वर्तते स्म ॥ रंगनाथः कृष्णः अयं च ॥ शूरकुलं यादवकुलं तस्य भूषणं शूरकुलयोग्यभूषणयुक्तश्च ॥ विबुधैः देवैराराधितं पदं यस्य अत्यानामभ्राता तत्र लेनराधितं च निगडमस्यास्तीति निगडी ॥ निगडी स्थलं संस्थानं मरणं येन ॥ निगडीनामग्रामस्तत्र संस्थानं यस्य ॥ कः बुला

॥ ७० ॥

वि: गरुड: तयोर्नाथ: कवीनां ज्ञानिनां नाथश्च॥ ३५३॥ यस्येति॥
मनोहरनामा श्यामल: हरि: यस्य स: हय: जितकामादिरिपो:
तस्य दलं सद्भक्ति: तस्यादिति भयकोविदं कुर्यात्॥ नकोपीति॥
यस्य रंगनाथस्य मनोहरसंज्ञक: नील: हरि: अश्व: सहाय
आसीत्॥ तेन भाग्यनगरात् यामचतुष्टयेन वटग्रामं आगच्छ
त: मध्ये चौर्यै निरुद्धस्तान् जित्वा शीघ्रमागच्छदिति॥ रंगना
थ: निगडीग्रामान्निर्गत्य केशवस्वामिनो दर्शनार्थं भाग्यनग
रं गच्छतु मध्ये वटग्रामे वसतिं चकार॥ तत्र जयरामस्वामिनाभ्य
र्थितं भावं तत्स्थ हूरंगद्धंति श्रीगुरुचरणं॥ पुण्यतिथौ कीर्त
नार्थं आगमनं भवितव्यं॥ तदवश्यमिति संगीकृत्वागत: तत्र तु
कीर्तनिसमारंभवशात् पुण्यतिथिदिनस्मरणं नासीत्॥ तत्र दिने
यदा संध्योपासने देशकालं संकीर्तनं कृतं तदा स्मरणं जातं॥ अथ
तदा त्वरेव निर्गत्य यामचतुष्टयेन वटग्राममागत इति॥ आख्या
यिकामाचक्षते॥ ५४॥ सा जो. श्रीरंगनाथस्या पतनं चरणे हे .

॥ गंगेति ॥ यत्फलहरिकीर्तनेन ब्रह्मराक्षसा गतिमाप्नुवंति स्मेति
प्रसिद्धं ॥ ३५५ ॥ साधोरिति ॥ यस्य समाख्या ख्यायतना द्भागीरथी
स्रवतीति कथयंति ॥ तत्फलं ॥ एतस्य हरेः पदए वायतनं ॥ तत्र
सास्त्येवेति ॥ यदाचार्यं शिवाजीराजेनाहूतो मार्गे अश्वेन आग
च्छन् अभूत्तदा निगडीग्रामे स्वपरं वाहाजले निमग्नं ॥ तत्फशा
यातां डितो पि नो धृतवान् ॥ तदाचार्य मारुत्याह ॥ अत्रैवास्मा
कमायतनमिति ततः परं उद्धृतं ॥ इति हरेरश्वस्य पदे ॥ ५६ ॥
आनंदमूर्तिं वर्णयति ॥ आनंदमिति ॥ रघुनाथपादयुगले आनंदो
मूर्तिमानास्ते इति नालंबनं इतरप्रेमा मानपेक्षे स्वतः प्रमाण
मित्यर्थः ॥ ब्रह्मदेवे दैः नद्धिं दर्शयति ॥ आनंदमूर्ते गुरवो रघुनाथ
चरणाः तत्सांनिधिमासाद्य ॥ मूर्तिमानानंदः आनंदमूर्तिरि
त्यर्थः ॥ आस्ते इति वनरूपं नतु निवासरूपं ब्रह्मनाल नाल
नाम ग्रामः कथयति ॥ ब्रह्मनालवने रघुनाथाय तत्र समीपे
त आनंदमूर्त्याश्रयेन प्रसिद्धं ॥ ५७ ॥ केशवस्वामिनं वर्णयति ॥
भाग्येति ॥ अत्रेयमाख्यायिका ॥ केशवो हि पूर्वं यवनकार्यपुरुष

आसीत्॥ अथ केनचित्कारणेन विरक्तोऽभूत्॥ तस्य कदाचित्
भाग्यनगरे देवदर्शनार्थं गच्छतः केनचिद्यवनेन पूर्वपरि
चितेन नर्मणा पश्चादेत्य तूष्णीं शिखां धृत्वास्थितं॥ यावत्
स्वामी अग्रतो जगाम तावत्तीं शिखां धृत्वा तदद्भुतं दृष्ट्वा
यवनेऽपराधः क्षमापित इति स्वान्वर्थभावः केशवभावः
प्रशस्ताः केशाः यस्य स केशवः॥ केशाद्वोऽन्यतरस्यामिति
व्याकरणसूत्रं॥ २५८॥ कृष्णापानामानं जयरस्वामिगुरुं

वर्णयति॥ जलाशयमिति॥ अत्रेयमाख्यायिका॥ महादेवगिरि
शिखरे शांतो नाम जंगमः सिद्धो आसीत्॥ तच्छिष्यः कृष्णापा
शांतेन देहावसानसमये उक्तं मया काश्यां ऋणं कृतमस्ति तदिदानीं
निर्याप्य मयि जीवति मम ऋणपत्रं मानेतव्यमिति तदानीं कृष्णा
पा महाप्रसाद इत्युक्त्वा तत्रत्य जलाशये द्रविणं गृहीत्वा निमज्य
काश्यां कमणिकर्णिका घट्टे उन्मनः अथ ऋणं निर्यातितं कृत्वा
पत्रं गृहीत्वा तदा त्व एव पुनस्तेनैव पथा आगत इति संहार

कृत्शिवः सचकृष्णः कृष्ण ये वायथा कृष्णेजलाशयंसमुद्रं प्रवे
श्य संहारकर्तुर्यमस्य पत्तनं गत्वा गुरोः सांदीपिनेः अभीष्टं मृतपुत्रा
नयन रूपं चकारेति ॥३५९॥ पुरा श्रीकृष्णे रामादिभिः सहवृंदावने
भांडीरवटाधः क्रीडन्भूत् तदा प्रलंबासुरः शिशुरूपेण तत्रप्रवि
श्य क्रीडायां रामं स्वपृष्ठमारूढं जिघांसया दूरमनैषीत् तत्ज्ञा
त्वा बलेऽमंदं सहतः तच्छ्रमश्रांतं रामं श्रीकृष्णः परिचचार तद्
लरामो न समीचीनमिति मत्वा कश्चिदपि स्वयमेवं चिरं कृष्णपरि
चर्यइति तत्कलौ कृष्णरूपेणावतरन् रामः परिचचारेव जय
नशापदग्धेन त्रेताद्वापरयो रावणशिशुपालरूपेण हरिद्वेषएव
कृतः तेनानिष्टं प्रसज्येतेति स्वमंडलस्थं तंजयं पुरस्कृत्सप
रिचचारेव वटग्रामः बहुशिफासंकुलत्वेन एकोपि सन्ननेक
वटप्रायत्वेनासीदिति ग्रामव्यपदेशः अन्यत्र वडगांव इति
अदूरे गोपुंजोस्य अन्यत्र गोपुंजनामग्रामः यत्समीपेस्ति
भांडीरकेति उपनाम्नः आश्रयभूतं भांडीरकमिति उपनामस्य

को

८७

॥७२॥

प

तत्कुलस्य आश्रयभूतां वटग्रामे एलदुपनामकं एकं कुलं चिरयासिवर्तते प्रलंबस्य आस्फुरसंपत्यातुकूलकौशल्यं प्रलंबा महती अस्फुरसंपत्तिश्च विथमनं नाशः जयंपुरस्कृत्य वर्तमानः रामो जयरामो भवतीति ॥ ३६० ॥

अमृतरा गारवं वर्णयति ॥ त्रिलोकीसाम्राज्यमिति ॥

अमृतसंबंधाद्धि बुधाः देवाः स्वर्गसाम्राज्यमनुभवंति किंच तदमृतं मादकं अत एव तुच्छं अयंतु अमृराजः यत्संबंधाद्धि बुधाः संतः सत्परं ब्रह्मपदमनुभवंति यदग्रे त्रिलोकीराज्यं तृणवद्भाति किंच यत्र मदलवोऽपि नास्तीति अमीत्वममगुरोः परात्परगुरू गुरवः ॥ ६१ ॥

यन्न्यूनमिति ॥ अहं सारस्वतात् सामुद्रात् रसात् आलादुत्पन्नं तन्मामेव विबुधा आद्रियंते न तु ममजनकमित्यत्यं मितिमत्वा इतःपरं पुनर्

सारस्वतं रसमेव यथा मद्धिकं श्लाघ्यं तां तथा कुर्यामिति किमत्रावतीर्णमिति यस्य सारस्वतः वाङ्मयो रसः कवितारूपः अमृतादपि अति स्वादुरिति तात्पर्यं ॥ ६२ ॥ शिद्धराजं वर्णयति ॥ शिरस्थिता

मृतकरइति ॥

श्चंद्रो

शिरसि स्थित अमृतकरो यस्य आनंदः दयाच तद्दास्यं समर्पित: शिवायोः उमामहेश्वरयो रानंदःयो येन सिद्धराज: गणेशः अन्यत्र अमृतराजेन यस्य शिरसि हस्तः कृतस्तच्छिष्य इति अमृतराजेनैवं बहुशिक्षयित्वा स्वगुरूणां ज्ञानानंदाख्यानां निकटे काश्यां प्रेषितः तत्र तेभ्यो विद्यासंपादिता भवत् शिवाख्यः करवीराधिपो राजा यत्रीभूतस्तस्मै आनंदः ॥ श्रीरामचंद्रपंडितं स्तौति ॥ शिवे एते च मम गुरोः परात्परगुरवः ॥ ६३ ॥ शिवाख्येन राज्ञा शिरसा वंद्यः नेति ॥ चंद्रपक्षे स्पष्टं ॥ गुरुपुत्रत्वाद्यः शिवाख्येन राज्ञा शिरसा वंद्यः चतुःषष्टीकलानिपुण: किमेतावदेव न तमसः अज्ञानस्य नाशकः ज्ञानदातेत्यर्थः ॥ ६४ ॥ द्विकलितत्वमिति ॥ कृष्णयजुरूपवेदद्वयघनां तां ध्यानवान् ज्ञानं शास्त्रीयं विज्ञानमनुभव इति दृढहृदयवान् ॥ एकरसं ब्रह्मरसमनुभवंति सदा शाद्वापरस्रोनिष्णात इत्यर्थः ॥ चंद्रविलक्षणत्वमेवाह ॥ चंद्रस्य आदौ अन्यत् स्पष्टं ॥ ६५ ॥ पुरैवेति ॥ अयं तु पूर्वमेव चंद्रो शापोद्धतः पश्चात्सिद्धेन गणेशेनानुगृहीतः अयं तु घनेन अष्टविकृतिमध्ये चरमो विकारः हि घनपॅलेन हतप्रभः ॥ अयं तु घनेन अष्टविकृतिमध्ये चरमो विकारः एतत्कृतलेन प्रकाशमानः चंद्रस्य ज्योत्स्ना यानेत्रगतं तमो नश्यति

क्षत्लान

८

ज्योत्स्नया एतन्नामकेन प्रातिशाख्य सूचक जातीय संदर्भरूपग्रंथे
न कृतिपध्धतिस्थं वेदपाठविषयकं आंध्यं कृणपध्धतिस्थं च एते च
मम परमगुरवः एतैः श्रीचरणैः स्वप्ने आगत्य ममगुरुचरणाः श्रीरामो
पासना बीजदानेन कृतार्थीकृता इति ॥ ३६६ ॥ बलरामं वर्णयति ॥ रोषइति ॥
रामेण चिंतितं अयं शेषोप्यशेषात्मना मां सेवते स्म तस्य ऋणापाक
रणे नान्य उपायः तादृशाकरणमंतरेणेति कृष्णावतारे तं रामं कृत्वा
स्वयमनुजो भूत्वा तं सेवते स्मेति ॥ ३६७ ॥ राधां वर्णयति ॥ ध्यानेनेति ॥
स्वर्गभाविकं स्त्रीत्वं ध्यानदार्ढ्येन बाह्यं लज्जादिकं वैराग्येण गतं स्त्री
त्वे गते राध इति जातश्च राधः समाधव एवेति तयोर्भेदो न वैशाखो
माधवो राध इति उभयोरेकार्थत्वेनाभेदात् ॥ ३६८ ॥ वक्रमिति
स्त्र्याकारदाप् ॥ ३६९ ॥ सारंगेति ॥ सा राधा रंगे स्फुरत् रंगे अमायं नि
ष्कपटं मनो यस्याः ननु अनतिलावण्य गुणा उत्तमनायकलाभे

त तादृशी भवेदेवेति चेत् ॥ न ॥ स्त्रीशं विधा स्त्रीणां शं वत् विद्या प्रकाशो यस्याः त

न एकतः स्त्रीशतं एकं इयमपि लावण्य गुणाधिका इयं प्रतीपा प्रतिकूला
चेत् मम अनर्थाय स्यात् एतस्या वैपरीत्ये धाविता शस्त्री धारा नाम

धारा

यमागारं सा इतिजायते तत्र धाविता सद्यः शाणोल्लीढया शस्त्री
खड्गः तस्य नाम कं यमस्य अगारं गृहं सा मरणाय स्यादितिभावः
स्वयं तां प्रति विपरीतश्चेत् वशकै भवति नामवशा एव वशाकः अनर्था

इति

यन भवतीति प्रत्युत हितायैवेति ॥ ७० ॥ उ एवं वर्णयति ॥ श्रीकं ठादिति ॥
सत्वात्मकस्य हरेः सत्वशीलता प्रिया शिवेन तामसत्वं ब्रह्मणि राजस
त्वं श्रियां चपलत्वाद्राजसत्वं बलेउभय विधत्वं आत्मनोपि सत्वात्मता
क्वचित् व्यभिचारत्येव ॥ परं यस्य क्वचिदपि न व्यभिचरितेति प्रियत्वे
हेतुः ॥ ७१ ॥ यस्योपसर्ग इति ॥ उपसर्गः उपद्रवः उद्धवः इत्यस्य
उपसर्गः उत् नास्ति चेत् धव इति जातं सः समाकारतया माका
रयुक्तश्चेन्माधव एव भवति ॥ ७२ ॥ अर्जुनं वर्णयति ॥ अर्जुनेनेति ॥
अर्जुनः पार्थः तृणंच भूभृतः राजानः पर्वताश्च ॥ ७३ ॥ देवाधीन
मिति ॥ देवः कृष्णः पर्जन्यश्च अर्जुनः पार्थः तृणंच ॥ ७४ ॥ समय
इति ॥ शराः बाणाः उदकानि च श्रीदेवः कृष्णः पर्जन्यश्च हरित
त्वं भगवतस्तत्वं गीताभिरुपदिष्टं हरितवर्णत्वंच अर्जुनः पार्थः
तृणंच ॥ ७५ ॥ स्वयमिति ॥ धनंजयः पार्थः अग्निश्च स्फुरंतो हेतयः

॥ ७४ ॥

४२॥ द्रौपदीं वर्णयति॥

आयुधानि ज्वालाश्च यस्य अहिप्रियः शेषशायी कृष्णः सर्पप्रियो वायुश्च॥७६॥ सर्वेति [illegible]कार स्वाप्॥७७॥ भीष्मं वर्णयति॥ ॥स्वधर्मेति॥ नरः अर्जुनः मानवश्च सुदर्शनं चक्रं सुष्ठु दर्शनं च यद्यपि भगवता समरसीम्नि पतितं रथचक्रं धृतं न सुदर्शनं तथापि तदपि तत्प्रायमेवेति॥७८॥ अनेकेति॥ अनेधाश्रेष्ठस्य गांगेयस्य भीष्मस्य मृत्युः धनंजयस्य पार्थस्य प्रसंगेन दिव्यभावः व सुता उत्तरा यत्र अनेकेषु धातुषु श्रेष्ठं गांगेयं हेम तस्य लयः विलीनता अग्निप्रसंगेन दिव्यभावः निर्मलता उत्तरा यत्र॥७९॥ विदुरं वर्णयति॥ यदीति॥ कृष्णेन वेदव्यासेन कृष्णेन अर्जुनेन कृष्णसखेन उद्धवेन मैत्रेयेण च सहितव्याससखः सतीर्थत्वात् भगवता निर्वाणसमये यस्य स्मरणं कृतं॥८०॥ नभंके इति॥ योन्नालाः यावनालाः॥८१॥ पुंडरीकं वर्णयति॥ लोकेष्विति॥ पुंडरीकः सितांभोजं च॥ तेन विचारः कृतः मम सहोदरं पद्मं श्रिय

लसो

स्त्र्या

ग

149

र्घ्य

आसनायबभूव श्रीस्तत्रास्ते ईर्ष्या श्रियः पतिःस्थानंग मितइव॥ ३-८२॥ भिन्नमिति॥ कापिश्रुतिर्जीवेशयोर्भेदमाह॥ कौशिकोपनिषद् इति॥ भिन्नो नित्यः परमो जीवसंघात् पूर्णः परो जीवसंघयो ह्यपूर्णः यतस्त्वसौ नित्यमुक्तो यच्च बद्धस्तस्मा न्मोक्षं त तएवाभिवांछे दित्यादिका अपराअभिन्नं ऐक्य माह तत्रैव स्वनिघ्नो सो हि परः स्वतंत्रस्तस्मादसौ मोच्यते नित्यमुक्तः स एव जीवो विद्यया बंधमेति तन्नाशे तु ब्रह्म संपद्यते तन्मिथ्या भेदो ब्रह्मभावस्तु सत्यस्तस्माद्विद्वान्न प्रमाद्येति सत्यादिति तत्राभेदं श्रीशंकराचार्या उचि तत्वेन मेनिरे श्रीमध्वाचार्यास्तु भेदं उचितत्वेन मेनि रे अत्र कारणं शंकराचार्यास्तु आकाशलिंगादुत्पन्नाः तैः सर्वत्र ईक्षिते भिन्निः क्वापि नास्ति इति दृष्टं मध्वा चार्यास्तु मध्यगेह नाम भट्टादुत्पन्नास्तैरां दो सर्वत्र ईक्षि

मा

तं तावत्परितो भिन्निरे वेति ॥ मध्यगेहस्यत्वात् शंकराचा
र्याणां पिता क्वचित्तीर्थयात्रां कर्तुं गतवान् पश्चात्तन्मात्रा
आकाशलिंगसेवा कृता कदाचित्तस्य महोत्सवे सर्वजनैः
पश्यत्सु आकालिंगा[illegible]त्तेजो निर्गत्य तस्या मुखे प्र
विष्टं तेन सा गर्भवती अभवत् अथ महाजनैः तद्दैव
कृत्यमिति मत्वा न जिगुप्सा कृता तेन शंकराचार्या इति
तत्संबंधेस्थितं ॥ २८३ ॥ मत्स्येंद्रनाथं वर्णयति ॥ नित्या
निमेषचक्षुरिति ॥ निमेषरहितज्ञानः अनिमेषनेत्रश्च
सत्पक्षः साधुपक्षः सत्पत्रतश्च ॥ मत्स्येंद्रः मीनश्रेष्ठश्च
वनं विपिनं जलं च भुवनं जगत् जलं च मत्स्यानां स्थित्या
जलं विमलं भवति ॥ २८४ ॥ लोकेति ॥ अतिशयितकरुणः
अनपायार्था अमोघा याभूतिर्भस्म तेन रचितः उत्पादितः

त

त

गोरक्षो येन येनकस्यैचित्पुत्रार्थिन्यै विभूतिर्दत्ता इमां भक्ष
यतव पुत्रः स्यादिति तया गृहीत्वानंतरं भीता सती तां उ
त्करे त्याज वर्षेषु गतेषु मत्स्येंद्रनाथ आगत्य पृष्टवान्
पुत्रः क्वास्ति तयोक्तं मया भस्म न भक्षितं तर्हि सक्तं क्व
उत्करे दर्शय दर्शितं तेनाहूतं तावद्बहिर्यातः पा..
पुत्रः तेन गोरक्षनाम्ना चकारेति समाख्यायिका समत्स्येंद्रः
विराटः लोके उत्तरे स्वपुत्रे कृपालुः पार्थरहिता अपार्था सा
न अनपार्था तद्गति संपत्तिः तया रचिता गवां रक्षा यस्य
स्वकीयः अक्षः पाशः तेन कर्कं धर्मराजं विगतरक्तं न करो
तिस्मेति किं ॥ ३९५ ॥ भुवनइति ॥ अथ मत्स्यावतारे हरिः
भुवने जले विचरन् शंखं जित्वा वेदं गोः वाण्याः र
क्षकाय ब्रह्मणे दत्तवान् तस्य च शृंगमभूत् तथायं भुव
ने जगति निगमं रवं जित्वा मपित्वा शंखं गोरक्षाया

॥७६॥

द्रात् यादनार्थं गृहीतं श्रृंगं येन ॥८६॥ नाथपथं वर्णय
ति ॥ अथेति ॥ नाथः आदिनाथः शिवः निवृत्तिः निवृत्तिना
थश्च ज्ञानदेवश्च मुक्तिः मुक्तिनाथाच ॥८७॥ निवृत्ति
नाथं वर्णयति ॥ यद्दीति ॥ निवृत्तिं वैराग्यं आश्रितस्य क्र
मेण ज्ञानमुक्ती भवतः निवृत्तिनाथस्याश्रये कृते तत्र
स्थाता मे वेति ॥८८॥ ज्ञानदेवं वर्णयति ॥ दीपः तमसः यद्दितासेति ॥
नाशाय अलं समर्थः अलंदी एतन्नाम्ना ग्रामं पाति सः
अलंदीपः ज्ञानदेवः तत्रहितद्दायतनं ॥८९॥ नामदेव
गुरुं विसोबा खेचरं वर्णयति ॥ सर्वथेति ॥ नामदेवो हि के
वलं ब्रह्मभावं गतः श्रीपांडुरंगं सिषेवे तद्दानेन खेचरा
नुसरणं कुरु इति संदिष्टः तं शरणं गतः तेन ज्ञानोपदे
शेन सर्वात्मभावं गमितः देवेंद्रं खचरो गुरुः बृहस्पतिः
खेचरो यं ज्ञानदेवशिष्य इति वदंति ॥९०॥ नामदेवं वर्णयति ॥

॥ सिंपीवि: रइति ॥ अत्रैव सेवकत्वं दृष्टं सेव्यतीति सेवकः सिंदो
लकः शिंपी इति लोके ॥ ९१ ॥ यस्येति ॥ यः सर्वत्र गीयते स
दामोदरं संगतो यद्वा स दामोदरसं ब्रह्मानंदरसं गतः दा
मा इति नामदेवस्य पिता तद्दुदरात् संगतश्च ॥ ९२ ॥ जनी
वर्णयति ॥ श्रीति ॥ यत्र जन्यां जन्मनि भगवति प्रेमा सा नाम
जनी अतिधन्या नाम्नः नामदेवस्य जनी नामिका दासी
च ॥ ९३ ॥ सावतारव्यं वर्णयति ॥ लौकिकजनेष्विति ॥ उत्तम
पुष्पयुक्तता जनेषु प्रत्यय देवेषु उत्तमदेवता साधुषु उत्तमसा
धुता ॥ ९४ ॥ माधवदासं वर्णयति ॥ नन्विति ॥ येन यो योर्थः
संपादितः स सर्वोपि भगवतेर्पितः येन गृहीतः तेनैवं सर्वं तस्य
कार्यं करणीयं ॥ अत एव हरिस्तस्य अतिसारे पटकान्धाव
यति स्म फलं चैतत् माधवदासपदयोरर्थः सर्वः परस्मि
न्नन्यपदार्थे अर्पितः न तत्पुरुषवदुत्तरपदे राजाश्ववत्

॥७७॥

नाव्ययीभाववत्पूर्वपदे उपकुंभादौ अन्यपदार्थेप्यप्रमा
णत्वाद्बहुव्रीहिरयं ॥ तेन माधवः दासो यस्येत्येवार्थः
ननु माधवस्य दास इति तत्पुरुषः दासभूतो माधवस्त
त्करोतीति युक्तमेव ॥३९५॥ विध्वस्तेति ॥ तमः अज्ञानं
तामिस्रं च द्विजराजः विप्रेंद्रः चंद्रश्च आत्रेयः अत्रिकुलो
त्पन्नः दत्तः चंद्रोपि तादृश एव वंशो द्विधा विद्यया जन्म
ना च यस्य विद्यावंशे जनार्दनः जनार्दनस्वामी सकथं ॥
श्रितः सज्जनः एकनाथः एतन्नाम्ना शिष्यः यस्य चंद्र
स्य [illegible] जन्मवंशे जनार्दनः कृष्णोऽभवत् श्रिताये
सज्जनास्तेषां एकनाथः ॥९६॥ एकनाथस्वामिनं वर्णय
ति ॥ भगवान् सद्भिः कृतं संकल्पं सर्वथा समर्पयितुं
जागर्त्ति यत् नाथं ज्ञानपात्रं दृष्ट्वा दत्तचरणैरूढं अस्य

२ × युक्तायुक्तयेति ॥ ×

जनार्दनः घनरसं यच्च तु तदा भगवता मनस्यानीतं मयाघन
रसो ब्रह्मरसो देयः उदकं च स्नानं कर्तव्यं न ह्येव दत्तवाक्यस्य
सर्वथा समर्पणं स्यात् नान्यथेति एकेन जनार्दनरूपेण ब्रह्म
रसं दत्त्वा अपरेणोदकं दातुं स्कंधे बिंबंधं बभारे विति ॥२९७॥
याच्यमिति ॥ यदि याच्यं तर्हि भगवद्भक्तायैव याच्यं यतस्ते अ
विनाशि इदं ते यतः एकनाथः गाऊब नाम्नः शिशोर्जि
ह्वायै इह वसन्नपि अल्पभागवतोऽपि सन् उत्तमपूरणं ददौ
अत्रैयमाख्यायिका प्रतिष्ठाननगरे काचित्पाकक्रियया
स्वनिर्वाहकर्त्री योषिदासीत् तस्याः कश्चिच्छिशुरुन्मत्त
इवाभवत् कदाचित्तया स्वेन साकं पाकार्थं यत्र गतवती त
त्रसनीतः तेन च तत्र पूरणं भक्षितं तदा प्रभृति स पूरणं विना
नैव भुंक्ते माता त्रस्तासती नाथसमीपे गत्वा प्रार्थितवती
महाराज अयं पूरणं विना नैव भुंक्ते मया प्रत्यहं पूरणं कुत आ
नेतव्यं ॥

॥७९॥

श्रीमद्भिर्हे श्रीहरिनैवेद्यार्थं प्रत्यहं तदस्तीति अयं भगवत्प्र
सादं भुंजानोऽवसत् नाथैरुक्तं तथेति तस्मै प्रत्यहं उत्त
मपूरणं दातव्यं सततं तु स्वामी सदा भगवद्गुंजारवं कुर्वन्ना
सीत् तेन तस्य गाऊबा नामाभवत् अथ नाथैर्देहावसा
नसमये शिष्यान् प्रत्युक्तं मया भावार्थरामायणं सुंदरकां
डांतं कृतं अवशिष्टं कः पूरयिष्यति शिष्यैरुक्तं नास्माकं
तादृशी शक्तिः अथ गाऊबामाह्वयत त्वमवशिष्टं रामा
यणं पूरयेति तेनोक्तं महाप्रसाद इति तथा चक्रे चेति॥ तथा
च जीवदृशायां उत्तमपूरणं दत्तं पश्चादपि उत्तमस्य राम
चरितस्य पूरणं दत्तमिति अविनश्वरं दानं भगवद्भक्तानां॥ ३९८॥
मुक्तेश्वरं वर्णयति॥ श्रीविश्वंभरेति॥ श्रीविश्वंभरस्य हरे
र्लीला संबंधः मुक्तेशस्य जीवन्मुक्तस्य भूतिं संपत्तिं शम
दमादिकां तनुते याविभूतिः प्राकृतान् जनान् महाभार

स्य संसाररूपस्य तरणप्रसंगे न सतृष्णान् करोति ॥ तद्विषयो
त्कण्ठं भवतीति यावत् ॥ यथा नाथस्य लीला नाम कन्या विश्वंभर
भट्टाय दत्तासीत् ताभ्यां मुक्तेश्वरनामा पुत्रोभूत् मूर्तिः जन्म
तेन तु भारतपर्वचतुष्टयी महाराष्ट्रभाषया व्याख्याकृता
प्राकृतग्रंथवाचकानां प्रीति तस्य मूर्तिः महाभारतरणस
मुद्यमे ॥ उद्योगपर्वणि सतृष्णायति पर्वचतुष्टयी यदिदं
व्याख्यातमाभविष्यत्तर्हि समीचीनमभविष्यदिति ॥३९९॥
मुक्तेश्वरस्य पर्वचतुष्टयी व्याख्यानरूपं काव्यमतिम
धुरमभूदित्यत्र हेतुमाह द्वाभ्यां ॥ भाषंत इति ॥ मुक्तेश्वरः
जातप्रभृति मूक आसीत् यथा च नाथप्रसादेनोक्तवान्
तदैव पर्वचतुष्टयं व्याख्यातं तन्मधुरतरमभूदिति
युक्तं बालभाषणं तावदमृतप्रायं तद्यस्य ईषदपि न
व्यंगमागतं अतस्त्विरं सचितत्वेन माधुर्यभारसंभृतं ॥४००

॥७९॥

॥याताथेनेति॥ कदाचिन्नाथचरणानां भगवत्पूजासमये
सूदंतं मुक्तेश्वरं कटौ गृहीत्वा श्रीकृष्णस्थितो भूत्॥नाथे
न भगवते खंडशर्करा नैवेद्यमुपहृत्य अमृतभावेन यानि
वेदितं भगवतानाचतं स्वीकृत्य स्वमुखामृतेन भावयि
त्वा प्रसादीकृत्वा अरे श्रीकृष्ण शिशुरयं रोदिति तस्मा
देनं चारयेति निवेदितं तां श्रीकृष्णः स्वेन अमृतपाणि
ना यन्मुखे न्यस्ये दशनं मधुरं ब्रूहीं वरमद्यास्यवा ति
कुमाख्यीति किं व्यक्तव्यं ॥४०१॥ मुक्तेश्वरेण पर्वचतुष्
यमेव कुतो व्याख्यातमित्यत्र हेतुमाह॥ मुक्तस्थितइति॥
मुक्तस्थितेः सलोकता सरूपता समीपता सायुज्येते
ति पर्वचतुष्कमेवोक्तं आर्षैस्तदन्यथा कथं कार्यमिति
मम स्थितेः पर्वचतुष्टयमेव विषयः यतः महदतिक्रमो
नयुक्त इति ॥४०२॥ दामाजीपंतं वर्णयति॥ पूर्वमिति॥

यः

स्ववर्णसहितोऽस्य रामा सएदामाता दृशः अवतीर्य यत्सकाशे त

दृतं ॥४०३॥ तुकारामं वर्णयति ॥ अभंगेति ॥ अभंगरूपाया ः की

र्तयः तस्यग्रामेण दशरथाः देहाः यस्य दशावतारः अजः

विष्णुः अजः दशरथश्च ॥ साधना तुका अपत्यरूपेण रामेण

अभंगाः याः कीर्तयः तद्ग्रामेण तुकू अपत्यं ॥४॥ शृण्वन्निति ॥

तुकारामस्य अभंगरूपाणि वचांसि हरयेऽतिप्रियाणीति

प्राकृतः युक्तं पिता जघन्येन चरमेण तुकाअपत्येन उक्तानि अन्य

त्कान्यपि शृण्वन् तुष्टो भवति तानि चेद्धास्त्र प्रमेयभरिता

नि निबंधानि च तर्हि तुष्येदिति किं वाच्यं ॥ अयं विश्वगुरोः

जघन्यं चतुर्थं शूद्ररूपमपत्यं सतां दृशं वदति तस्माद्देवो

युक्तः ॥५॥ रक्षेति ॥ अत्रेयमाख्यायिका ॥ कश्चित्क्षेत्री

वत्स्तुकाराममाह ॥ रे मे प्रवास उपस्थितः क्षेत्रं चपक्व

सस्यं तदिह त्वमत्र पक्षिणो रक्ष ममपुनरागम पर्यन्तमि

ति तथेत्यंगीचकार गते क्षेत्रस्वामिनि तुकारामस्तत्क्षेत्र

॥८०॥

मंडपिकायामुपविश्य भगवन्नामसंकीर्तनपरोऽभूत् ग्रा
तस्तावत्पक्षिणो मिलिताः तदानीमनेन विचारितं क्षेत्रेण
। इदं पक्षिणो रक्षेति यद्यहमेतान् दूरमुत्सारयामि तदेत
द्रक्षणं कथं स्यादिति तदेते कामं भक्षयंतु तैर्भक्षितु
मारब्धे अधिकाधिकाः पक्षिणः संभवंति स्मेति ॥ एवं क्षेत्रि
सर्वक्षेत्रं
ण आगमनपर्यंतं निःसस्यमभूत् स च तं दृष्ट्वा तुका
राममुवाच अरे मंद किमिदं कृतं अनेनोक्तं यत्त्वयोपदि
ष्टं पक्षिरक्षणं तन्मया कृतं ॥ हं हो अतिधूर्तोऽसि तच्चल
ग्रामाधीशसकाशमिति प्रसह्यनीतः ग्रामाधीशेन पृ
ष्टं अरे किमिदमाचरितं तुकारामेणोक्तं यथैतेन दिष्टं
तथाचरितं इति तयोर्वृत्तमालोच्यायं दंडनीय इत्याह सः
॥ तुका॰ अहो मया सस्यं नाशितमित्युच्यते आस्तां ना
मेदं यद्यहमेतादृक् नाकरिष्यं तर्हि कति धान्यम
भविष्यदिति ब्रूहि कृषी॰ एतावन्मम धान्यराशि

भवितव्यः तुकाः मदीयः तावत् यदि एतन्न्यूनस्तर्हि दंडमार्हा
मि अथ धान्यं मर्दितं तावत् उक्तमानात् द्विगुणो धान्यराशिर
भूत् तं दृष्ट्वा ग्रामाधीशो विस्मयमापन्नः अस्ति महानयं
सिद्ध इति कृत्वा तमुवाच अरे यावत्त्वयोक्तं तावत्धान्यं गृ
हीत्वा शेषमेतस्मै प्रयच्छ ततस्तत्धान्यं तुकारामाय दातुं प्र
वृत्तस्तदेति तेनोक्तं नानेन मम किंचित्कार्यं मया श्रीपांडु
रंगमंदिरमारब्धं तदेतद्धान्येन समापनीयमिति अथ ग्रा
माधीशेन हरेः प्रासादस्तत्धान्येन निर्मितोभूदिति द्विजाः
ब्राह्मणाः पक्षिणश्च यतः प्रसीदतु विहंगाः प्रकृत्यः प्र
सिद्धः आत्मप्रत्ययः स्वरूपसाक्षात्कारः भवेत् स हरेः
प्रसादः अनुग्रहः प्रज्ञादिशब्देभ्यः प्रकृत्यः आत्मप्रत्य
यः स्वार्थे प्रत्ययः अणुरूपः यतः प्रसादात् प्रासादोभ
वति प्रसाद एव प्रासाद इति प्रज्ञादिभ्योण् इति व्याकरणं
॥४०६॥ आनंदतनयं वर्णयति ॥ गोरसेति ॥ गोरसः वाणी

॥८१॥

रसः साधुव्रजः सतां संघः साधु गोकुलंच यशः दया
च ताभ्यां यशोदा नाम्न्या गोप्या च आकारतः हरिर्जन्म
यो विग्रहः अस्यतु पांचभौतिकः आकारेणच अयमानंदस्कतः
सतु नंदस्कतइति॥४०७॥अरणीति॥अरणि समुद्भूतः
अरणिस्तन्निवासग्रामः काष्ठमयश्रौतपात्रविशेषः येना
ग्निर्मथ्यते गोरसः वाग्रसः घृतंच कांतिः प्रभा कांत्याख्य काव्य
गुणश्च अयं नरः अग्निस्तु अनरः देवः अनलश्च॥८॥प्रक
टितेति॥ प्रकटिताः हरेश्चारवो गुणाः येन मंजु मधुर वचनं
स्पष्टं अरणी नामके ग्रामे संभूतं कृष्णो योलेखः देवः संप्र
ठेयस्य तन्नामजापी शुको व्यासपुत्रः तत्पक्षे अरणेः
संभूतं अग्निमंथन समये घृतोनरायणे व्यासस्य अप्स
रो दर्शनेनरेतः अरणौ पतितं तस्माज्जातः शुक इति भार
ते अन्यत्समानं कीरपक्षे हरिः हरित रूपोगुणः अरणीकृ
ते यो वृक्षः पिप्पलः तत्रजातः पिप्पलकोटरे संभूतः

कीरो हि सम्यक् वदतीति प्रसिद्धं ॥ कृष्णलेखांककंठो यस्य ॥ ९ ॥ तं
त्रीति ॥ तंत्री वीणागुणः तंत्रीवाद्ये निपुणः नाडीज्ञाने च उत्तमशा
स्त्रचरीकां तारम्यानि ष्ठिता भगवत्परायणा प्रज्ञा मतिर्यस्य कृ
कृतचरकनामके आयुर्वेदसंहिते निष्ठिता प्रज्ञा यस्य च नवा रसाः
शृंगारादयः रसायनानि च ॥ १० ॥ वामनस्वामिनं वर्णयति ॥ यइति ॥
पूर्वं वामनो रसायाभूमे राहणं कृत्वा काव्यं शुष्कं विरसं कृतवान्
सर्वदा नवानां मोदप्रदं स एव कवौ तत्रजातप्रसाद इव ॥ रसाधा
नेन काव्यमुल्लसयांचक्रे किं काव्यं सरसं कृतवानित्यर्थः सर्व
दा नवमोदप्रदं ॥ ११ ॥ स्वबोधेति ॥ गिरिः एतन्नाम्नी तज्जाया
गिरिः पर्वतश्च ॥ १२ ॥ वामनस्येति ॥ विष्णोः शिवस्य च परमात्म
तयाऽभेदोऽस्ति हरिरेव शिवः साक्षाच्छिव एव हरिः स्वयमित्याह
यो हि वामनः स गिरीशः गिरेः ईश एवेति ॥ १३ ॥ मयूरकविं
वर्णयति ॥ इहेति ॥ कलाभिः काव्यचातुर्यैः उपेतः कवीनां ना
यकः इति विचार्यमाणे मयूरेशः स्मृतिविषयः भवति कस्य
लोपइतः गतः कविनायकः विनायको भवति यश्च विना
यकः स मयूरेश इव कलोपेतः प्रथमत्यागे मानाभावाद्य

एवं विवक्षितः ॥ ४१४ ॥ आर्येति ॥ आर्याभिः आर्याधिकार स्थगीतीभिः अर्पितः आनंदेन आर्येभ्यः अर्पिते इति वा आर्यापार्वतीच सर्वलोके यत्कविता गीयते सर्वत्र पूज्यते च चतुरश्रेष्ठः भालचंद्रश्च मयूरेशः कविः गणेशश्च ॥ १५ ॥

अतिचित्रेति ॥ अति चित्राणि यस्मिन्सः समासान्तः कपूः स चासौ कपालः वाग्रसंचलेनाढ्यः बहुलरयमत्वात् सदा रामपदे स्थितिर्यस्य रामोपासकत्वात् बहुविस्तृत ग्रंथस्य सारं गृहीत्वा अल्पग्रंथेन रचनं कारिका तामिर्जनितः आनंदो येन भारतभागवतरामायणविस्तृतग्रंथा येन गीतिरूपेण अल्पग्रंथेन प्रणीता इति मयूरेशः कविः बर्हिणः पक्षे अतिचित्रो यो कलापः बर्हः सन् आरामः तत्पदा स्थितिर्यस्य कालिका मेघमाला तया जनित आनंदो यस्य गणेशपक्षे आश्विनपौर्णिमास्यां पूर्णश्चंद्रः ललश्चित्रामतिक्रांतः षड्राशि

भोगे जातेधो विशिष्यते सचासौ कलापश्चंद्रः तेन सहायः राम
परः शिवः तत्र स्थितिर्यस्य कालिका पार्वती तया जनितः
आनंदो यस्य ॥ १६ ॥ कालिदासं वर्णयति ॥ श्रीति ॥ काली
तस्याः दासः कालिदासः इमायोः संज्ञाछंदसो बहुलमि
ति ह्रस्वः अनेन दासेन सता काल्याः ईकारो गुरुरपि लघुतां श्रीइ
ह्रस्वत्वं प्रापिता यस्य श्रियोगे काल्याः श्री इत्येतिभावः ॥
शब्दलोपीदं कालीशब्दस्य ईकारः दीर्घोपि यत्संबंधेन ह्र
स्वो जातः कालिदास इति ॥ १७ ॥ कालीति ॥ कालिदासः का यः
ल्याः दासोपि सन् तत्प्रसादजन्यसामर्थ्येन चिरं निद्रितां
कवितां प्रबोध्य निजलीलाः कवितारूपाः प्रथयित्वा ताभिः
काल्याः लीलां ह्रस्वयामास काल्या यशसोप्यस्य यशः
प्रथितमित्यतिशयोक्तिः कथमिदमनुभूतारूढमिति चेत्
यः कालीशब्दगतं लीकारं ह्रस्वयति वा न वेति द्रष्टव्यं कालि
दास इति ॥ १८ ॥ श्रीकालिदासेति ॥ यतः यस्याः कदा सरस्वत्याः
कालिका भवति शुचिभावयोगेन निर्मलचित्तेन मुहुरनुग्रहः

॥ ८३ ॥

कुरुते ततः रसवाहिनीति किं वक्तव्यं ॥ शुचिः आषाढः तस्य
भावः तत्तद्योगेन कालिकाया मेघपंक्तेरनुग्रहश्चेद्रस
वाहित्वं युज्यत इति ॥ १९ ॥ भारवि कविं वर्णयति ॥ सूतः
सारथिश्च हरौ बद्धः यः मनोरथः तं पारयितुं सफलीक
र्तुं हरिभिरश्वैर्बद्धं मनोरथं शीघ्रगामिनं रथं पारयितुं ग
मयितुं ॥ २१ ॥ + नानाविधपदानामर्थानां च दर्शयित्री
रसं हरते आकर्षति तथा रवेर्भा यथा सापि पदार्थदर्शिका
रसं जलं हरति ग्रीष्मे इति प्रसिद्धं ॥ २० ॥ सूतपुराणवक्तारं वर्ण
यति ॥ कृत्स्नमिति ॥ + ज्यायस्तमैरिति ॥ अति वृद्धानां
प्रायः रोगशांत्यै कषायचूर्णादीनि नोपयुज्यंते किंतु रसाय
नमेव युज्यते तच्च पुराणवृत्ति जीर्णमपेक्षत इति ज्येष्ठतमै
स्तै [illegible]: पुराणवृत्तिः सूत एव वृत्तः सूतः पारदः अन्यः प्रसिद्धः
बहुदोषेभ्यो भवति य उपतापः रोगः तस्य शांतये बहुदोषो
यो भवः तस्येति च ॥ २२ ॥ पारमिति ॥ सूतः प्रसिद्धः पारदः
श्च ॥ २३ ॥ गृहे निमग्नत्वं स्त्रीणां युक्तं न पुंसामित्याह ॥ यतिरिति ॥

यद्भगवतः अपराधेस्थितं तत्प्रोक्त[illegible]रिकारित्वाभावात् किंच निंद्यकर्मरतं निषिद्धाचरणपरं अतएतादृशस्य निरयमग्नत्वं युक्तं रतयोरभेदात् निलयमग्नत्वं च भगवतूअपरस्य अधस्थितं जघन्यं कर्म मैथुनमाचरति एतादृशं फलं ॥४२५॥ सत्प्रशंसानंतरं प्रसंगादसतां चरितं वर्णयति ॥

बध्वेति ॥ विधिवत्पाणिगृहीतयाः भार्यायाः पुत्रोत्पादनात्पूर्वं त्यागो नयुक्त इति ॥ तयासह गृहधर्ममाचरतु बध्वाक्षिप्तत्वात् ॥ बवयोरैक्यात् ॥ बत्थो निक्षिप्तो निमज्जत्येव परं दैवालू न पोतं पुत्रं लब्धवान् तेनैमंतव्यं कुतः पोतस्य नौकायाः लाभात् तथाव्यवायः प्रजयानरत्या इति शुकोक्तेः ॥२४॥

परदाराऽरतिरिति ॥ प फ ब भ म इति पवर्गस्थमस्मरीयचरितं तेन अपवर्गरसस्य भाजनं कथं स्मः ॥२६॥ कांतमिति ॥ यतो जगत्पालकः अतः स्वस्य कांतः लघुतिलकः स्वाभाविकोयं नकृत्रिमः सर्वजगत्पालकरघुतिलकशब्दौ कांतावेव तं हित्वा नरं कृत्वा नुसरति नरो हि जीवकोट्यंतर्गतत्वेनाकांत

सतू

॥८४॥

स्वतंत्रत्वात् कोतोनास्तिच नरशब्दः ककारांतः तत्रकृत्रिमं
कांतत्वं कृत्वानुसरति॥ तत्रकृतेतु सनरक एवभवति॥ रामं
हित्वानुसरणं नरकानुसरणमेवेति भावः॥२७॥ कोयमिति॥
अर्पस्यं द्रव्यस्यार्थे परमार्थंत्यजतीति॥२८॥ द्यानमिति॥
अमृतधाममोक्षधाम पीयूषधामच सुरालयः स्वर्गः मद्य
गृहं च॥२९॥ दानं तपोमख इति॥ परमहंसानां ब्रह्मनिष्ठानां
राजहंसानांच गतिंपदवीं कौशिकः इंद्रः घूकश्च॥३०॥
दिव्यागमेति॥ दिव्यागमाः सच्छास्त्राणि तत्रोदितं दिव्यागमे
कल्पवृक्षे उदितं हरितत्वं योभिनंदति सपशुरित्यपिवक्तुं ना
लज्जोदेति॥ यतः पशुः तृणोदितमपि तृणेषु उदितं हरित
त्वं हरितवर्णत्वं आदरेणाभिनंदति॥ लुब्धोदितमपि सोभि
नंदति॥३१॥ विठ्ठल इति॥ विठ्ठलः पांडुरंगः निर्विकारः शुद्ध
ब्रह्म एवं सतितं योनार्यं तादृशः किंतु कस्यचित् जीनस्यवि
ग्रहोयमिति विपरीतमतिं करोति सकः इतिचेन्महाराष्ट्राः

कपयिष्यंतितान् पृच्छ विट्ठल इत्ययं निर्विकार: विकाररहित श्चेत् ठल इतिउर्वरितं तत्र विपरीत मतिर्य: सलट्ठ इति भवति महाराष्ट्राश्च येज्ञानशून्या: धृष्टाश्च तं प्रतिलट्ठ इति वदंति ॥ ३२ ॥ मत इति ॥ योहरिं भगवंतं द्वेष्टि हरिं अश्वं च योद्वेष्टि समहिष एव गो व्याघ्रं महिषा श्वमो ष्टुर वनक मितितयो र्नित्यवैरत्वात् महिषश्चेत्कालेनाधिष्ठित एवं महिषो हि कालवाहनं ॥ ३३ ॥ य इति ॥ स्वार्थ मेव यस्य तानं न परोप कारार्थं पाणिना हि स्वार्थे अल्पे कुत्सिते चार्थे क प्रत्ययो विहित: यथा नर एव नरक: अल्पो नर: कुत्सितो न र: नरक: ॥ ३४ ॥ स्फ वृत्तेति ॥ यथा खल: धान्य मर्दन स्थानं बाह्यत: स्फ वृत्तं वर्तुलं दृश्यते अभ्यंतरे तु कठिनं अन्यथा म र्दना संभवात् बहूनां धान्यानां उपमर्दार्थं खल: दुष्टो बाह्ये अ सहृत: क्रूर: बहुधा अन्येषा मुपमर्दाय ॥ ३५ ॥ अपकार स्येति ॥ ये पुरुषा: उपकारं विज्ञोप्य अपकारं जनयंति तदन्ये

॥ ८५ ॥

कठिनान किंतु तएव कठिना: पुरूष इत्यत्र उकार सहित पकार: पु: तस्य लोपे रूष इत्यवशिष्टं तत्र अकार युक्त पकार: प: तत्र जनिते पुरूष इति जायते य: पुरूष: स कठिन एव ॥ ४३६॥ परस्परेति ॥ द्वयो: स्त्रीपुंसयोरंतरं कर्तुं बालिश: शिशु: पंडित: उभयो: प्रेमभाक्त्वात् तथा स्नेहद्वयोरंतरं कर्तुं मूर्ख: पंडित: असत्यकल्पना हीना ॥ ३७॥ ✓ चंद्र: औषधीनां राजा अमलकरश्च परंदोषाकरत्वात् क्षयी तन्मन्यामहे पुण्य कर्म विना औषधं न रोगं प्रतिकरोति ॥ ३८॥ माखिद्य स्वेति ॥ गरलं अलंकृतं सत्कुलं लकार रहितं च कृतं गरमेवावशिष्यते ॥ यच्च गर तत् गरलमेव तथा खलोप्यलंकृत: ख इत्यवशिष्यते यच्च खं तच्छून्यमिति ॥ ३९॥ कौटिल्यमिति ॥ यथा बालिशजनस्य शिशुजनस्य प्रसंगस्तनयो: कौटिल्यं कोटीअग्रे लात: गृहीत: कौटिल्यं रहश्च चुंबकत्वं शिथिलत्वमतां स दूतत्वस्य हानिं पलित्वं च करोति तादृशायो दूषित

× औषधीशा इति ॥ ×

योः परिचयः परंपरासंबंधेनापि वस्त्रादिव्यवधानेनापि न
स्फुरदः प्रत्यक्षं तु नैव तथा मूर्खप्रसंगः कुटिलत्वं शैथिल्यं
दुर्दशापतितं च करोति तादृशस्य परिचयः परंपरासंबंधेना
पि न स्फुरदः कुतस्तरां प्रत्यक्षमिति॥४०॥ अथ कवितादि वर्णय
ति॥ सदसीति॥ सदसि सभायां चित्राः ये वर्णाः शब्दाः तेषां सं
धानेसंयोजने कोशान् अमरादीन् अर्थे अर्थालंकारविन्यासे
परः रसानां शृंगारादीनां ईश्वरः निबंधनिपुणाः राजपक्षे
तनूयः असिः खड्गः तस्य चमत्कारः हस्ते धृत्वा धूननं चित्रं
यद्वाणानां संधानं तत्र कोशं द्रव्यराशिः तदपि पुनरर्थसंपा
दनतत्परः रसायाः भूमेः ईश्वरः॥४१॥ मथ्नन्तीति॥ सारस्व
तं सरस्वत्याः संबंधिनं समुद्रस्य च मंदरो नाम यः अगः पर्व
तस्तेन मंदः यो रागः प्रेमा तेन च परमं अमृतं॥४२॥ सर
(रसः) स्वतीति रसः जलं प्रेमरसः रसः शृंगारादिः गूढः अदृश्यः
स्मितादिभावो ज्ञेयः भावानुभावैरन्नेयश्च॥४३॥

॥२६॥

दा

॥समलंकृतेति॥ सम्यगलंकारैः उपमादिभिः भूषिता कर्णिका कर्णपूर ग्रैवेयकादिभिः गुणैः प्रसादादिभिः काव्यशोभाकरैः रतिकोविदत्वादिभिः श्लेषं श्लेषालंकारं आश्लेषं आलिंगनं विना च॥ रसश्चमत्कारपूर्णत्वं प्रसन्नचित्तत्वं च॥४४॥ कवय इति॥ नाना अलंकारैः संकुलं सदपि यथा अनलंकारो [illegible] भवेत्तथा कुरूत अनलंकारः अलंभावाभावः॥४५॥ प्रायः कवयः उपमानदशायां चंद्रं गर्हयंति तत्कारणमुत्प्रेक्षते॥ न द्विष्म इति॥ कविनाशुक्राचार्येणेत्थं विचारितं एष चंद्रः दोषाकरोपि द्विजराट् ब्राह्मण इति कृत्वा सर्वैर्वयं एनं न द्विष्मः विधोर्नो रिपुरिति ज्योतिषं ग्रहस्वभावश्च पापीनामतिपीडकः॥ एवं सति अयं जडो बुधाय किं च महां कवये द्रुह्यति आस्तां नामेदमिदानीमिति रुष्टः भूमौ बहुरूपेणावतीर्य सत्कविः प्रतिपदं तन्यकं करोति॥ [illegible] अयं हि नलस्य राज्ञो श्वपादत्राणं अयं दमयंतीमुखनिर्माणाय ब्रह्मणा पात्रे लावण्यं गृहीतं तेन निर्मिते

न

चपुखेयद्वशिष्टं पात्रे किंचित्तेनायं निर्मित इति अस्यांद्रता
याः नखविवरे नार्थं ब्रह्मणा दिव्यहीरमणीनां रसं कृतं मु
षाकृता रसं कृत्वा नत्वा निनिर्मिता नि उपयोगाभावात्सुक्तो
सुषेयमिति ॥ ४६ ॥ भृशमिति ॥ दोषेषु अहर्षरात्रौ हर्षं च ॥
यमकादिविभावनावशात्त्रिंशं नभजति ॥ रति विह्वलत्वात् ॥
बालानां ध्वन्यंभिज्ञानां शब्दालंकारार्थालंकारैः बालानामु
ग्धानां तरुणीनां च अलंकारदानादिभिः प्रौढानां सहृदयानां
प्रौढावस्थापन्नानां व्यंगरसनिबंधेन न स्कुरश्चातूर्येण
बालतांबूलेनार्धे तरुणी भूरिभूषणैः स्कुप्रेम्णा रज्यते प्रेम्णा
वृद्धा स्वालोपगौरवेरिति ॥ ४७ ॥ अभ्युतिष्ठतीति ॥ यत्प्रसादा
त्सात्विक भावा भवंति सा कविता सामान्या भवतीति मान्यत्वे
हेतुरभ्युत्थानादिसत्कारः ॥ आनंदाश्रुपूर्णे नेत्रे पाद्यादिपू
जांकुरुत इत्यादि ॥ ४८ ॥ गुरुदेवताप्रसादमंतरेण कविता न
सर्वतोषिके त्याह ॥ महांतमिति ॥ अथ केन चित्स्वर्णकारेण

स्रुवर्णानामलंकारा निर्मिताः तत्रस्थकौशल्यमप्यतीव प्रकटि
तं तच्चकौशल्यं अद्भुतानंदकारकं परंतु तत्रप्रसादोपेक्षि
तः अंत्यसंस्कारः कषायलेपनपूर्वकस्निग्धनिर्माणरूपः
तेनविना नचमत्कारिता तथाउत्तमवर्णानामलंकारघटना
रुतापि प्रसादमपेक्षत इति ॥ ४९ ॥ योमूढइति ॥ गुणाः
प्रसादयः दोषाः सविध्यादयः स्वर्ण्संसानतुपेंगलस्य होतुरो द
धेन स्रुग्धुवर्णानां संग्रहः तत्र इसानुगुणान् शाद्यान् रसे
शृंगारादिरसं तत्रभद्दिभावानुभावव्यभिचारिभावैः व्यंगयं धी
अन्यत्र गुणाः दोषाः प्रसिद्धाः स्वेच्छया पूर्णं कांचनं ना
धीयीत बहूनप्यद्धान् भाचो वाग्विप्रलापनं हित हिति स
रसं ब्रह्मरसं ॥ ५० ॥ अनर्थेति ॥ मतिपक्षे अनर्थोभाव्यः
लानि साध्याः केशाकर्षणवस्त्रहरणादीनि स्थानानि तैः प्रमाति
पूरिता सन्नृत्तं चारित्वं तेनहीनामपियां सर्वे कौरवा

आनुमोदं ते गुरूणा द्रोणेन कविता पक्षे अर्थरहितानि यानि प
दानि तैः रुचिराणि श्राव्यानि यानि वृत्तानि पुष्पिताग्रादीनि तैः ि
यां कुत्सिताः रवाः शब्दाः तेषां समूहाः कौरवाः अतएव
गुरुभिः महाजनैः कर्णः राधेयः श्रवणं च ॥ ४५१ ॥ सर्वदेति ॥
सर्वदा नवा नूतना यां चिंता सर्वेषाणां दानवानां यां चिंता त
ता स्याः कवेः कविं कर्तुः शुक्रस्य च अंतर्गतं अभिप्रायं उदर
गतं यत्किंचित् गुरुपुत्रः गुरोः पुत्र इव पुत्रः शिष्यः उपासि
तगुरुकुलः कचश्च ॥ ५२ ॥ समलं करोतीति ॥ समलंकरो
ति सम्यक् अलंकार युक्तं मल सहितं च वर्धच्छेदनपूर्णयोः
वर्धयति पूरयति नाशयति ॥ ५३ ॥ समलं करोतीति ॥ सम
लंकरोति सम्यगलंकार युक्तं मल सहितं च अनलं अलं
भावाभावं अग्निं तदुपलक्षितं संतापं च ॥ ५४ ॥ काव्यस्य श्रो
तुः कवेरभावे श्रम एवेत्याह ॥ ५० ॥ कवीनां तापाः श्रोतृभिः

॥ ८८ ॥

रहिताश्चेत्केवलं कंठशोषणायैव यत्नं चेत्कविताग्रपाः कका
रेण रहिताश्चे द्विताग्रपाः भवंति येतुकविताग्रपाः ते नकंठ सत्कवि
शोषणाय । कवेः श्रोतुः सद्भावे गुणमाह कुत्सितं तपि
ताः कुलपिता असंबद्धवक्तापि सन् यदि तस्य संमुखे
श्रोतृत्वेन कविः स्थितः । कविकुलस्य गुरुर्भवति
श्रोता कवितस्य तात्पर्यवर्णनेन तं कविकुलगुरुं करोति न
युक्तमिदं यत्कुलपिता इति अस्य संमुखे कविः स्थितं
चेत्कविकुलपिता भवति ॥ ४५५ ॥ बहुवृत्तेति ॥ कवि
जनस्य कवनं भाषणं कवितारूपं कविभिः श्रोतृभिर्हीनं
नं न मनोज्ञं भवति कीदृशं तत् बहुभिर्वृत्तैः सहितं
अलंकारयुक्तं च विं गरूडं पाति विपः कृष्णः त
स्य कथया आढ्यं स्वमपि सम्यक् युक्तं चेत्तत् कवि

न

जनकवनं ककारद्वयेन विहीनं विजनं वनं भवति तत्किंम
नोज्ञं स्यात् तदपि रमणीयं स्यान्नेत्याह बहुवृत्तोपकलितं
कविहीनमिति सर्वत्र बहुवृत्तोपकलितं बहवः वृत्ताः वर्तु
ला ये उपलाः पाषाणास्ते संजाता यत्र तत् अलंकरणभू
षितं अलंमित्योरणः तदर्थे याभूः तया उषितं अल
मिति भिन्नंपदं वा निश्चयार्थकं विपथाख्यं विपथेन दुर
ध्वना युक्तं ॥ ५६ ॥ तरंगिणीति ॥ भूभृतः पर्वतान् रात
श्च रसिकं समुद्रं रसज्ञं च ॥ ५७ ॥ व्रजतीति ॥ अति
मुक्ता व्यासादयः तेषां कवनं कविता वितानं विस्तारं ग
च्छति सुमनसां साधूनां च महामोदं महानंदं च यतिः
युक्तं चैतत् अतिमुक्तानां पुड्रकाणां वनं विस्तृतं तत्
सुमनसां पुष्पाणां सुगंधं तनोति रसिकः स्थलं सज
लमालवालं चेत् ॥ ५८ ॥ सुसंगतिवशादिति ॥ श्लोकः

॥ ८१ ॥

सुसंगतिः सत्संगतिः निर्मत्सरश्रोतृसमागम इत्य
र्थः तद्दर्शनेन सुश्लोकः चमत्कारातिशयवान् भवति ॥
श्लोकस्य यदि सोः उपसर्गस्य संगतिश्चेत्सु श्लोक एव
श्लोकं मामामा इति निषेधं चिकीर्षोः अरसिकस्ये
त्यर्थः संसर्गात्सुश्लोकः लूनः छिन्नः स्यात् चमत्का
रभंग इत्यर्थः युक्तं चैतत् अलंकाररहितं चिकीर्षोः
समागमाल्लूनः लकारेण ऊनः स्यात् यथाचेत् शोक
एवोपतिष्ठत इति भावः ॥४५९॥ यस्मिन्निति ॥ यत्रका
व्ये असुरसंपदः शृंगाररसोपेता विटकथाः सर्वत्रसं
गताः तत्काव्यस्य तामसजनसमागम एव प्रकाशः न
तु सूरीणां साधूनां अवस्थितौ इत्येतद्युक्तं यत्रकाव्ये
शुक्रे दैत्यसंपदः संगताः तस्य काव्यस्य शुक्रस्य प्रकाशः

तमसः समागम एव नतु सूर्यस्य । वस्थितौ अवस्थितौ
अवाप्योरुपसर्गयोरिति अकारलोपः अथ तस्य काव्यस्य
व सूर्य वस्थितोऽपि शुक्रो दृश्यते चे ~~न्नल्प~~ कः प्रकाशः तत्रका
रणं तस्य कवेस्तीव्रतप एव यथा पूर्वेतपसि माघारंभे
इत्यर्थः पूर्व माघमासे सूर्य वस्थि तावपि शुक्रो दृश्य
ते तृतीयप्रहरादौ ॥ ४६ ॥ प्रायः कवयो दृरिशः तद्धेतुमा
ह ॥ कुटिलेति ॥ स्पष्टं ॥ ६१ ॥ विभातीति ॥ द्विजवरस्य चंद्र
स्य यथा चंद्रिकादि वितथा द्विजश्रेष्ठस्य विद्याभुवि यथा
चंद्रिकया जलराशिः समुद्रः प्रमोदते तथा जडानां
राशिः मंदा अपि कवितया मोदंते यथा चंद्रिकया तमो
नाशः एवं विद्ययापि अज्ञाननाशः यथा चंद्रिकया कुव
लयानां प्रकाशः विकास एव मनयापि कोः पृथिव्याः व
लये मंडले प्रकाशः कीर्तिरूपः एवं सर्व साम्ये सतियथा

॥ ६१ ॥

लो

चंद्रिकया कमलानां उदयः प्रकाशो न भवति एवमनया कमलायाः लक्ष्म्या उदयो न स्यादिति युक्तं ॥६२॥ हस्ताग्रेति॥ सरस्वती यतः चतुराननाद्ब्रह्मणः सकाशादुत्पन्ना चतुरं आननं यस्याः तस्माच्च अतः सदृशं गुणिनं धत्ते गुणाः तस्यः तद्युक्तं सदृशं वीणामित्यर्थः रमा जलध्यात्मजा समुद्रकन्या जडधीकन्या च ततः जलजं कमलं जडसंभूतं मंदं च तदेतत्सर्वं युक्तं कार्यं हि कारणगुणं धत्ते इति ॥६३॥ आवासमिति॥ एते कवयः राज्ञां कीर्तेः स्त्रीणां च सौंदर्यवर्णने प्रवृत्ते लक्ष्म्या निलयं पद्मं तुच्छीकुर्वंति नैतावदेव शिवेन शिरसा श्लाघ्यं भालरं चंद्रं भगवन्निवासभूतं समुद्रं तालं चेति रूक्षा कथमेतान्पश्ये इति युक्तमेव दारिद्र्यमिति॥६४॥ राजेति॥ रामभद्र इव रामचंद्र इति उपमानं कल्पयंते तत्र पूर्णकलाधरत्वं सदृश

एवं च पौर्णमास्यां तत्क्षण एव न सर्वदा तत्क्षणे यद्यपि
उपमानतां यायात् परंतु तत्रापि क्षणे कमलानंदग्रहो यदि
स्यात्तर्हि नान्यथेति कथमपि नोपमानं पूर्णतया संभवति
राजा भूपश्चंद्रश्च कलाश्चतुष्षष्टिः षोडशांशाश्च कुवल
यं भूवलयं उत्पलं च शुचिः शुद्धः श्वेतश्च वृत्तं चरित्रं वर्तु
लत्वं च तमः अज्ञानं तामिस्रं च अमृतं मोक्षः सुधा च
मित्रं सूर्यश्च ॥ ४६५ ॥ श्रीराम इति ॥ सूर्यवंशजोपि अहं न
द्यास्तीरेव सन् सीताश्लिष्टः मारुतसेवितश्चेति जवनि
का परिवृते पुष्पकं प्रतिवसामि इति शास्ती शीतबाधा
चेत्पुष्पकं हसंती सेव्येति देहीष्य शुचिः दीप्तानलं ॥ ४६६ ॥
श्रीरामचंद्र इति ॥ अग्निषोमयोः साम्ये कापि बाधा नोत्प
द्यतेति शास्त्रप्रसिद्धं रविवंशभवत्वात् उष्णः राम
चंद्रत्वाच्छीतलः एवं च साम्ये सति अनामयत्वं युक्तं

॥ १९ ॥

॥४६७॥ सार्थमिति॥ हे ईश अयंभावः भवतायदा चा
पलता धनुर्लता उत्थापिता हस्ते कृत्वा तदा शत्रूणां
चापलता चपलभावः कंपोभूत् यदा त्वया तत्र पुनरा
नतिः कल्पिता तदा शत्रुभिरपि आनतिः कृता यदा
तत्र ज्याप्रापणं मौर्व्यसिंजनं कृतं तदैव ज्याप्रापणं भूस तै
मर्पणं कृतं यदा जीवाकृष्टिः जीवाया ज्याया आक
र्षणं कृतं तदैव तेषां जीवनामाकर्षणं जातं हता इति ना
भावः अनंतरं मार्गणस्य बाणस्य स्वलक्ष्यं शत्रुरूपं
लक्ष्यं नासीत् इति वीररसे तेषां वासनापूर्तिर्नजायते इ
ति कृत्वा दानवीररसेन त्वद्वासनापूर्तिः कृता मार्गणो
बाणयाचकौ स्वंद्रव्यं स्वीयंच शतसहस्रसंख्याकंच॥४६८॥
मुक्तानामिति॥ रोहिणी नक्षत्रं कृष्णजन्माधिकरणं मु
क्तानां मौक्तिकानां ज्ञानिनांच स्वातिःजननी अभूदिति

आत्मनि भर्तुः प्राप्तिर्न स्यादिति सापत्न्यमत्सरेण रोहि
णी किंच नररत्नं सुषुवे कस्तत्रातिशय इति चेत् मुक्तो
त्तमैर्मृग्यमाणा पदधूलिर्यस्य तत् ननु स्वातिरपि
तादृशं रत्नं नृसिंहाख्यं सुषुवे इति किं तया अधिकं
कृतमिति चेत् तत्राह सौम्यमिति सोम भर्तुरनुरूपं॥
पुरुषाकारत्वात्॥ दृष्ट्वैवं मानुषं रूपं तव सौम्यं जनार्दनेति वचनात्
दर्शनीयतमत्वं॥ तत्तु उग्रं॥ उग्रं वीरं महाविष्णुमिति मंत्रवर्ण
नात् विजातीयं च पुरुषसिंहाकारत्वात् अतो भर्तुः सं
शयाकुलतया तत्र प्रेमातिशयो न स्यादिति भावः॥ ४६९॥
रोहिणीनक्षत्रे कृष्णजन्मकारणमाह॥ स्त्रीष्विति॥ अश्विन्या
दिषु राज्ञः चंद्रस्य भूपतेश्च विरूपे भवने प्रसिद्धं यद्
क्षेण मत्त्विमित्तमेव इतरपराङ्मुखस्य चंद्रस्य क्षयी भवि
ष्यसीति शापो दत्त इत्यादि भर्तुः प्रेयस्त्वेन मम महा
त्म्यातिशयो वर्तत एव अथ यदि अवतरिष्यता भवता हं

सत्कृता भविष्यामीति चेन्मम माहात्म्यस्य पराकाष्ठा स्यादिति तदर्थं ब्रह्मणो भक्त्या अभवदिति रोहिण्या देवता ब्रह्मेति प्रसिद्धं ये ह्येवा जनजन्मर्क्षमिति भा

तं

गवतं अवतरिष्यं भगवंतं प्रति तथा ब्रह्मणा प्रार्थित मिति तदनुरोधेन रोहिणी सत्कृता भूदिव ॥७०॥

सूर्यं वर्णयति ॥ औषधेति ॥ तरणि सूर्ये नौकाच ॥७१॥

नृसिंहं वर्णयति ॥ वयस्येति ॥ हे वयस्य सखे पश्य अ स्यजनस्य पंचा[illegible]स्यस्य सिंहाननस्य नृहरेर्वश्य ताचेत् शास्यस्य स्तुतस्यतस्य सस्यस्य धनधान्यादेः संपत्तिं विनश्येत् अपितु न स्वयं मोक्षसंपद्य वृणुते ॥७२॥

शिवं वर्णयति ॥ यइति ॥ अनंतः शेषः तेन केयूरकटकादिकरणात् सर्वाधिकोयशैलः कैलासः कुबेरसख्यं दर्शयन् भव्यार्थं जगत्कल्याणार्थं

आकृतिर्यस्य उपासकानां कार्यार्थं ब्रह्मणो रूप
कल्पनेति श्रुतेः बहवो निसर्गाङ्गानि तैर्निबद्धा
भाषा वाक् यस्य बहुवरभरं इति यावत् दुर्गा
भार्या यस्य करेहाटकं धत्तूरो यस्य मद्योत्पादना
र्थं तद्भक्षित्वा धत्तूरः कनकाह्वयः यद्विषः
करहाटकः ब्राह्मणजातिविशेषः कथं स हि अ
नंतहोरधारी प्रायेण कशैले इत्यधिकशैलं
वासो यस्य कशैल इति ग्रामनाम तत्र हि तेषां प्रा
यो वासः यद्दारिद्र्येऽपि समर्थतां दर्शयति वस्त्रपात्रभू
षणादिनो वल्गकृतिश्च यस्य भाषाविसर्गबद्धा
हंडाः टोपी दाराः कडी ताकाः फोडशी इति॥
स्त्रीणां चनिकारेण वत्थाः केलेनि घेतलेनि पाहि
लेनि इत्यादि दुर्गादेवी प्रिया यस्य उपास्यत्वात्॥

॥२८३॥ अस्मिन्निति॥ पार्वत्या विचारितं अयं भग
वान् शशीशः शिवः साधकस्वभावात् अत्र अपकृत
प्रातिकूल्यं नास्ति तत्सहचरत्वात् अहं कालिका ए
षा काशिका काशी च तथैव मिथः साफल्यभावर
हितएव परं इयं पंचवक्त्रान् सुतान् जनयति अत्र
ये मृतास्ते शिवरूपा भवंतीति भर्त्रनुरूपसुतजनयि
त्री अहं तु न तथा एकं षडाननं गजाननं पर
मिति जनितवतीति भर्तृविरूपसुतजनयित्री त
स्मादियं एकांतराभर्त्रा सहेति निश्चयः तत्कृतापि
कृत्या गेसुन स्यादिति अर्थांग लग्नेवेति शशी
शकालिका काशिकाशब्दाः प्रातिकूल्येन पठिता अपि
अनर्थदा न भवंति काशिका शशीशेन सह एकांतरा
समानमध्या उभयोर्मध्ये शिकारः एकत्र दीर्घः

अन्यत्र ह्रस्व इति प्रामीकत्वं ॥७४॥ शिवस्ताण्डवं
कालीनिकटे कुतः करोति तत्राह ॥ कालिकेति ॥ नील
कंठस्य शिवस्य मयूरस्य ताण्डवोत्सवः कालिका मेघ
पंक्तिश्च ॥७५॥ कपर्दमालीति ॥ कपर्दं जटाजूटं मल
ते धारयति कपर्दी वराटिकाः तन्मालां बिभर्तिच
भैक्ष्यपात्रं कपालं प्रपिटिकां परडीति लोके भूताधि
पः शिवः उपासक विशेषश्च भूत्या इति आराधकः
आराधनकर्ता आराधीति तस्यैव नामांतरं एवं शिवः
तव आराधकः संपन्नः परमस्य दीपिका कास्तीति चेत्
एवं विधो यो जातः तस्य भाल एव सी की तितेति शिव
नयने दीपलोवन्हिरास्ते ॥७६॥ संसारमिति ॥ न संति
विमुक्ता यस्मिन् ततू पशुपतिः शिवः मूर्खश्च तामसः
तमोगुणी अलसश्च अवयोः पुरपुराधीशयोः मुक्ति
सत्रं क्षेत्रे तव देवेश यत्र कुत्रापि वा मृताः क्रिमिकीटा

॥९४॥

प्याशुमुक्ताः संतु नचान्यथा इति श्रूयते ॥ ७७ ॥ स्वैरि
ति ॥ स्वैः स्वकीयैः अवंध्याः अरिष्टसंपादका ये गणाः तैः
वैरेण वंचिताः केरवा दैत्या येन तं स्वैरः यथेष्टचारी अ
निरुध्यामपि वत्सगद्दापतितो यो बंधः संसारस्तच्छिदं ॥
॥ ७८ ॥ चरंतमिति ॥ मल्लारिपक्षे करपालः खड्गः क
रवालः करपाल इत्यमरः यथापि कोशांतरे स्पष्टं श्रीमा
र्तंडः सूर्यः तत्पक्षे तुरंगैर्न तव्यक्तेन रथेन रजन्या
रात्रेश्चूर्णे चूर्णीकरणे नाशे इति यावत् भास्करः देदीप्यमा
नाः प्रचंडा ये कराः किरणास्तान्यालपितं ॥ ७९ ॥ महा
दोषाचारेति ॥ ये जारणं कुर्वंति ॥ महारात्रौ भयहीनाः
संतः स्मशाने भूतप्रेतैरधिष्ठितेपि मंत्रजपं कृत्वा परस्त्रि
यं वशीकुर्वंति तथा काशिस्थाः दोषाचारेपि कृते येषां
भयं नास्ति किमनेन स्यादिति महास्मशानं काशी भूता
धिपती रुद्रः महामंत्रं तारकं ब्रह्म सकृद्देवोपगता

॥एषेति॥

मुक्तिं वशीकुर्वंतीति ॥७८॥ गंगां वर्णयति ॥ स्वरापगा
देवनदी मद्यनदी च ब्रह्मघ्नः शिवः ब्रह्महा च शिवेन
ब्रह्मणः शिरः कृत्तमिति स ब्रह्मघ्नः ॥७९॥ पत्ये श्रीरिति ॥
लक्ष्मीः पत्ये नारायणाय कुपिता सती वैकुंठं परित्यज्य
अत्र भुवि वस्तुमगमत् इयमाख्यायिका व्यंकटेश
महात्म्ये प्रसिद्धा परंतु एनं कुवासं पृथ्वी
वासं कुत्सितत्वा संमन्वानायाः नीरज-
स्थलं कमलस्थानं रजोहितस्थलत्वात्
सौमनस्यप्र~~सिद्ध~~दं प्रसन्नचित्तत्वस्य
कारकं आसीत् तत्र सुमनोभावः पुष्प
त्वं च अथ तत्र मधुपानां मद्यपानां भृंगा
णां च सदा प्रसंग इति तत्रासती इदंतु

निःशेषरजस्कत्वं सौमनस्यं प्रकर्षेणैद्यती
ति एवं सत्यमिति मन्वाना तत्परित्यज्य ता
दृशं श्रेष्ठं करवीराख्यं तिष्ठत एव ननु अत्र
पक्षे तस्याः लक्ष्म्याः वासः इति वाक्कृतौ
क्लि कीशास्त्रीयाच उक्तिः तस्याः का गति
रिति चेत् सा तु अन्यथा अ॰ न्यप्रका
रेण वर्तमाना साधारणैर्न ज्ञायते यथा
कस्यांचित् मंजूषिकायां कस्तूरी क्रि
यत्कालं स्थापिताभूत् अथ तस्यां क्रि
यता कालेन निरष्कास्यनीतां मपि तस्याः पा

वासस्तत्रास्ति तद्द्रव्यस्थितायाः अनंतरं गताया अपि तद्रम्या वासोस्तीति तत्वं वासः स्रग्गंधः वसति

श्च ॥४-८२॥ अप्यवर्णमिति॥ ऊष्मा तापः तस्य परः उत्कर्षः उदयो यस्मात् तादृशं आवरणं निदाघमिताऽपि यत्र क्षमामेव प्रथयति निदिताऽपि क्षमामेव कुरुत इति आवरणं अकारं ऊष्मा

प [illegible] कारः तस्मात्परो उदयो यस्य क्षमा इत्य त्र पकारात्परं आवरणं गमिता क्षमा भवति॥८३॥

॥१६५

॥ शास्त्रिणां वर्णयति ॥ अर्थाहिरणोति ॥ अर्थः अभिधेयं द्रव्यं च ॥ अल्पपाः ध्यायेन कुर्वंतः कृपणाः ॥ अल्पपानां मते
कार्यत्वं ॥ ४८४ ॥ भूपादय इति ॥ यस्य शास्त्रिणः उपस
र्गात् उपद्रवात् ॥ पुनः पुनरागमनतस्तत्र न दैन्य दर्शि
न रूपात् भूपादयः राजादयोपि बहूनर्थान्विसृजंति ॥
भूसत्तापापापाने इत्यादयो धातवोपि येनासंजिते
उपसर्गेण ॥ अनेकार्थान् विसृजंति ॥ यथा प्रभवति
संभवति अनुभवति परिभवति ॥ पानमनुपानं ॥ ४८५ ॥
वैद्यं वर्णयति ॥ प्रवर्तत इति ॥ अगदंकाराः वैद्याः सर्वे
कारं किंचिदादौ द्रव्यं गृहीत्वा रोगचिकित्सायां प्रवर्तंते ॥
गुरुक्रमेण तु ॥ भगवता पाणिनिना यं क्रममुपदिष्टः ॥ कारे
त्यस्यागदस्येति सूत्रे ॥ ४८६ ॥ देवापीति ॥ गदी गदाधरः रोगी
च ॥ देवो महाविष्णुरपि ॥ आदौ नीचैः वामनः नम्रश्च ॥
भूत्वा प्राप्ता रसात्रिपदा भूः रसायनेन येन तादृशा नया ॥

आयः कृतं कार्यं त्रैलोक्यराज्यं अनामयं च ॥ येन तथा
सन् एनं रसार्पकं बलिं वैद्यं च ॥ अनं च यत् निगृहीतवान् ॥
किं पुनर्नरा एवं कुर्वंतीति तत्र चित्रं न ॥ ४८७ ॥ येनेति ॥ ये
जनाः येन वैद्ययोगेन रोगं तीर्त्वा तं पुनस्त्यजंति ते नराः
निर्गुणाः मंदाः यथा यु । विद्यापा अयं वैद्यः सचा सो योगः
तेन उपतापं तापत्रयोपेतं अविद्यामयं संसारं तीर्त्वा पुनः
विद्यायोगमपि त्यजंति ये निर्गुणाः कैवल्यभाजः येन त्य
जसि त्यजेति अंते ज्ञानस्यापि हानोक्तेः ॥ ४८८ ॥ सभ्यं
वर्णयति ॥ सभारतइति ॥ भारतेन सहितः तत्परिशीलन
कः सभायां रतः स्यात् ॥ यश्च भूरिः वित्ताविदाभावः ॥
वित्ताविद्वत्ता यस्य सः एवं भूरिवित्तं द्रव्यं यस्य तादृशः स्या
त् ॥ नान्यथेति ॥ ४८९ ॥ आश्चर्यं वर्णयति ॥ प्रदायेति ॥
आधिं मनोव्यथां बंधकं च ॥ गाहाण इति लोके ॥ ४९० ॥
कामांधं वर्णयति ॥ श्रुत्वेति ॥ मूर्धानं आंदोलयित्वा ॥
ऽमुत्र ॥ वदंते भासत्ते आत्मनेपदं ॥ ४९१ ॥ नैव्यायि

कें वर्णयति ॥ लिंगेति ॥ लिंगस्य गुह्यस्य परामर्शः वारं वारमास्फालनं व्यभिचारः परस्त्रीसंगः एतत्पदार्थद्वयं न्यायशास्त्रे ॥ एतन्नामकत्वेन प्रसिद्धं ॥ ईश्वरसिद्धिर्हि न्यायमंतरेण न स्यात् ॥ नास्तिकनिरासो

पक्षत्वात् ॥ ४९२ ॥ प्रश्नोत्तरं ॥ सकलमिति ॥ कलंक केन सहितस्येत्युत्तरं ॥ वराकस्य अनुद्धतस्येति वा ॥ ४९३ ॥

देवं ॥ राजराजेति ॥ राजराजः कुबेरः विधो देवैश्चंद्रे

वं

च ॥ ४९४ ॥ समीं वर्णयति ॥ जानीमहे इति ॥ जलस्य स्वभावः निम्नं प्रति सर्पणं ॥ ४९५ ॥ मैत्रीं वर्ण० ॥

वन्येति ॥ वन्यानां वने भवानां अरण्यकानां पश्वानां च ॥ कोशेषु धनागारेषु ॥ कोरकेषु उदयः अभिवृद्धिः उद्गमश्च ॥ श्रीर्लक्ष्मीः शोभा च ॥ मित्रता मैत्री सूर्यता च ॥ ४९६ ॥ स यदिति ॥ स्नेहबालहंसः स यो जातः उभयतः पत्रालिलेख्यानि पक्षाश्च ॥ यादि न प्रवर्तते रन् ॥

तदा मानसे चित्ते तन्नाम सरसि च ॥ विनोदं विहारं मोदं च
कथं तनुयात् ॥ सुखगत ये च नस्यादिति बोद्धव्यं ॥ सुष्ठु खे
गतिः सुखप्रोक्तिश्च ॥ ४९७ ॥ स्वांतेति ॥ मनेआलवीले
स्नेह वल्लीउमा ॥ सजीवंतीति कदा मंतव्यं ॥ यदि पुनः पुनः
वारंवारं ॥ पत्राणि लेख्यानि पर्णानि च समागत्य सु
मनो विनोदं मनसः आनंदं पुष्पविनोदं च प्रवर्तये दि
ति ॥ ४९८ ॥ चंद्र इति ॥ कलाभिः सहितः सुष्ठु करः शुं
डादंडो यस्य ॥ करैः करभारैः सहितः रत्नयोरेक्यं
सुष्ठु कुशलः करो यस्य सुतरां कलः मधुरः सुकलः
सम्यक् ध्यानव्ययज्ञः सुष्ठु कलागीनादयो यस्य
॥ सुकलो दात भोक्तौरिपुमरः ॥ ४९९ ॥ दैत्यजन इति ॥
शुक्राचार्यः ॥ शुक्रः अग्निः शुक्रं रेतः ॥ ५०० ॥ सरिदि
ति व्यर्थ स्यात् ॥ अभ्रेति पद भ्रांतं भ्रकोरांतं भ्रांतियु
क्तत्वं च ॥ ५०१ ॥ शीतकाले अलाशयान्निर्गच्छंतं धूम

॥ १९८ ॥

196

मुत्प्रेक्षते ॥ अरत्नमिति ॥ मा मकानां मत्प्रसूतानां अग्नेराप इति श्रुतिः ॥ शीतस्पर्शेतार विरागात इति जलान्निर्गच्छंतः ॥ १०२ ॥ अन्यथोत्प्रेक्षते ॥ शीतर्तुरिति ॥ धूर्यं कार्यभारिणं ॥ सूर्यो हि स्वतेजोग्नौ दिनांते निक्षिप्ते ॥ कुद्धं आरक्तत्वात् ॥ आग्नेयकोण तद्वल्लोकनायेव गतं चेतिज्ञेयं ॥ १०३ ॥ वक्षोज इति ॥ वक्षोजशब्द मध्ये ऊष्मा बकारो दृश्यते ॥ १०४ ॥ यद्धंबरांतः शायित इति ॥ अंबरांतः प्रावरण वस्त्रांतः पौरस्त्यः तारुण्यावस्था संभवः स्तनः शायितश्चेत् शीतवार्तानि ॥ कांतामालिंग्य सुखेचेन्नैव शीतबाधा ॥ आ कारे ॥ यथा पौरस्त्याः हस्तचित्रोत्तरभावी ॥ स हि पूर्वस्यां प्रादुर्भवति ॥ मृगमारभ्य ॥ तत्पश्चात्प्रादुर्भूय पुरो गच्छति तत्र शीतमस्ति ॥ पौरस्ते तूष्णोलि सर्वजनप्रसिद्धं ॥ ५ ॥

म

॥ हाहेति ॥ मकरसंक्रमणारंभः तत्रत्वतीवशीतमिति धनं जयस्य अग्नेः हाहा हूहू इति प्रकारैः शब्दैः सह संस्तवः परिचयः तिलोत्तमानां शानाद्यारंभेण सहितः तिलभक्षतिलदानाचेति स्मृतेः ॥ जंभभिदिंद्रः तस्यगृहं तत्र हाहा हूहू नाम गंधर्वयो रालापैः अर्जुनस्य सम्यक्स्तवः प्रियपुत्रत्वात् ॥ तिलोत्तमा रंभाचताभ्यां सहितः ॥ ५० ॥ खिन्न इति ॥ महाराष्ट्रे शार्करतिलान् ददति भंजंते च जनाः [illegible] खिन्नाः स्वेदेन अग्निरूष्मणासिक्तः ॥ कंटकैर्युतः तत्र केशरादि रंजनं कुर्वंतीति ॥ प्रकटितरागः सितया शर्करया सहितः ॥ अत एव मधुरः अन्यत्र स्तेदयुक्तः ॥ रोमांचयुक्तः प्रकटितो रागः प्रेमा यत्र हसितेन स्मितेन सहितः मधुरो रम्यः ॥ ७ ॥ ग्राम इति ॥ माघांतं पश्चिम धान्यौषधी रूपा लक्ष्मीः मुरवध्वनिं बुवारवं

प

सच महानर्थं विना नजायत इति ॥ ७८ ॥ बहुलोत्सव इति
॥ पुष्पसमयः वसंतऋतुदर्शनेच स्वध्वजः प्रसिद्धः का
मांकुशश्च ॥ ९ ॥ सूर इति ॥ सूरे सूर्ये शूरे च ॥ उदयं प्रसिद्धं
अभिवृद्धिंच प्रतापं आतपं शौर्यंच नक्षत्राणां क्षत्रभिन्ना
नां ॥ ४ ॥ दोषोपचय इति ॥ दोषाणामुपचयः वृद्धिः रात्रेरूपच
यश्च जघन्यं नीचं रतंच ॥ स्कृदिन पुण्यदिवसश्च शुचौ शु
द्धे सुखक्षात्तन स्नानादौ ॥ ५ ॥ पुरुषचर्यां वर्णयति ॥ भवि
तव्यमिति ॥ अज्ञातार्थे कृत्ययो विहितः ॥ अज्ञातो नरः नरक
इति ॥ १२ ॥ सदृशनइति ॥ सदृंतश्चेत्सम्यगशनं भोजनं यस्य
चिकलः कलाशून्यः क्लेशादिविव्हलश्च अस्कषुप्राणेषु रतः
बलरक्षणं चिकीर्षुः नास्ति स्करतं यस्य बहुस्करता विमुखः
अविनयशून्यः नयनीतिनयः पचाद्यच् अवीनां मेषा

णां नयः तेन औरश्चः धनगर इत्यर्थः ॥५१३॥ श्रेष्ठस्येति
॥ उज्वलता वपुर्वस्त्रभूषणादिभव्यता जघन्यकर्मणि नीचकर्म
णि रतेचं । सत्त्विवोपि मूर्धन्यतां शृंगारवीरकरुणाद्भुतहास्य
भयानकाः इति शृंगारो रसमूर्धेति रसमीमांसा जघन्यतां
अंतिमतां नीचतां च मूर्धन्यं श्रेष्ठं योगधारणादिना नित्यव
स्तु विवेकेन च तस्मात्त्रोकत्रयाणां पुरुषेण उज्वलेन भाव्यं
न मलिनेन शृंगारः शुचिः उज्वलः ॥१४॥ बह्वर्थतामिति ॥
यो नव्ययं करोति स बह्वर्थः अव्ययादीनां चादीनां अनेकार्थत्वं
तेषु अव्ययेषु सुपां सप्तविभक्तीनां प्रतिष्ठानास्ति अव्य
यादाप् [illegible] सुप इति लुक् विधानात् यो व्ययं न करोति त
स्य स्तुतरां प्रतिष्ठापिन ॥१५॥ स्तुत इति ॥ घनः गंभीरः
कठिनश्च सद्वृत्तः सश्च रित्रः वर्तुलश्च बलीनां मूर्धनि
स्थितः अन्यत्र बली त्रिवली मस्तके स्थितः बालिशः मूर्खः
शिशुश्च बालिशेन सह महता प्रसंगो न कार्य इति ॥१६॥

॥१००॥

॥महद्दाधारद्दानायेति॥ अचलापृथ्वी अचलाः पर्वताः॥५१७॥
द्विधापीति॥ बह्वी आशा यस्य बहुअभ्राति सः सुफलः द्रव्य
स्य सम्यक् व्ययं जानाति शोभनगीतादिकलायुक्तश्च॥१८॥
तनुग्रास इति॥ तनुः स्वल्पः यो ग्रासः भोजनं तत्र सति तनोः
शरीरस्य ग्रासः कार्श्यं असकृद्ग्रासे सकृद्ग्रासाभावे असूनां
प्राणानां ग्रासः मरणमित्यर्थः तस्मात्सकृत् सकलतरांच भोज
नं यस्य तथा स्यात् तेन जनः सकृत्भा कांतिः प्रतिभा च य
स्य तादृश स्यात्॥१९॥ देशस्थं वर्णयति॥ अधितिष्ठन्ति
ति॥ अभिमानी विशेषेण आलस्यधरः [illegible] शिरास्थित [illegible]
भारः॥ [illegible] न भग्नं भूतेः सम्पन्नः स्वयं करोति॥ तिलकेनै
मनं भक्षं माकरीति लोके॥ तत्र परः अन्यदेशस्थः॥
बाले [illegible] घाट्या द्विजः॥ शांकर इति॥ स हि अहंकाराधि
ष्ठितः [illegible] रुद्र इति प्रसिद्धः व्यालः सर्पः शिरास्थितः जटा
ण भरो जलभरः यस्य॥ गंगाधर इत्यर्थः॥ तिलकं

ष्टात्कूटं तद्रक्षणपरः ॥ भूतेः भस्मनः प्ययं करो
ति बटुर्भस्मधारित्वात् ॥ अग्न्यः ऊर्ध्वः यो देशः केणा
सः तत्रस्थितिः ॥ ९२० ॥ मार्जारं वर्णयति ॥ अमृते
केति ॥ अमृते दुग्धे ॥ स्वशिशून्भक्षयति ॥ गिरिकाः बा
लमूषिकाः तासां अनाः प्राणाः तान्नाशयति ॥ स्वश
नमूषिकाः ता सां अनाः प्राणाः तान्नाशयति ॥ स्वशा
पोरैक्यं ॥ अन्यत्र अमृते मोक्षे स्वपुत्रेष्वपि ममताशू
न्यः ॥ गिरौ कानने च आसनं स्थितिर्यस्य ॥ ९२१ ॥ शृं
गिणं वर्णयति ॥ शृंग्यर्भक इति ॥ अर्भकोपि शृंगी वृष
महिषादिः कुपितो महतामपि प्राणिनां घातायस्यात् ॥
यतः राजकुंजरः महागजः ॥ पंचतां मरणं प्राप्तः स्यात् ॥
शृंगिनामा शमीकमुनिपुत्रः तस्य शापेन राजकुंजरः ॥
नपश्रेष्ठः परीक्षित्मरणं प्राप्तः ॥ ९२२ ॥ धूम्रपत्रीनमा
खुरिति भाषायां ॥ तां वर्णयति ॥ सुपर्णेति ॥ सुष्ठुपर्णानि
तां बूलीदलानि तैः शीलितः सेवितः साधुः पूगः पूग

१०१

फलं द्विजगणस्य दंतानां दृढस्थितिं दार्ढ्यं ॥ धूमप
त्रीदंत दार्ढ्यं त्रदा पिलकरी सरेति वैद्यकात् ॥ सारः स्व
दिरसारः सुधां चूर्णं ॥ अन्यत्र सुपर्णो गरुडः साधूनां
सनकादीनां पूगं समूहः द्विजानां स्थितिपालनं सारं आ
रामिः सहितं चक्रं ॥ सुधा अमृतं ॥ एवं गदाभृ[illegible] वि ता
ष्णुना समम्श्वेत्सर्वदा सेव्यः किंन ॥ यतः रागं रक्तिमानं
स्नेहं च ॥ विष्णुस्तु वैराग्यं तनोतीति भेदः ॥ २३ ॥ ज
र्दीवल्लीयति ॥ जनार्दनेति ॥ धूमपत्र्येव एलालवंगकेशरपत्र्या
दि संस्कृता जर्दत्युच्यते ॥ जनार्दनः नरेभ्यो हितः सन् ॥ आ
कारस्य आकृतेः विपर्ययं कृत्वा रूपांतरं गृहीत्वा वल्लीव इव
॥ जनार्दनः नरहितः नकारद्वयेन रहितः जआर्द इति अव
शिष्टं ॥ तत्र ॥ आकारस्य विपर्यासः कृतः ॥ दकोत्तर भावं गत
श्चेत् जर्दा इति संपद्यते ॥ २४ ॥ भर्तुरिति ॥ विजयां नाम सखीं

पार्वत्या: विजयाजयाइति सखीद्वयं॥ विजया मद द्रव्यं भांगेति॥ साचशंभो: प्रियाशांभवीत्युच्यते॥२५॥ सायंका लं वर्णयति॥ संध्येति॥इन: सूर्य: स्वामीच॥ हरिपदं विष्णु पदं आकाशंच॥ रागो रक्तिमाप्रेमाच॥ चिरक्ता निविण्णा र क्तिमहीनाच॥५२६॥ मध्यइति॥ ऋतव: षट्वसंतादय:॥ तमे व समय: तस्यमध्ये वर्षाशरद्रूपे॥ हेमंतशिशिरयो: समासे नेति पंचर्तुपक्षे वर्षासु॥ मध्यऋतुसमयइत्यव्ययीभाव:॥ त तीयासप्तम्योर्बहुलमिति नामभाव:॥ परेमध्येषष्ठ्यावेति ए कारांतनिपातनेपि तस्यसंधिवशाल्लोप:॥ तादृशे काले मैथुन माचरति॥ कुक्कुरो रात्रिजागर:॥ संयमी॥ यानिशा सर्वभूता नां तस्यां जागर्ति संयमीति॥ भार्याऋतुसमयमध्यएवगच्छेति तेन ब्रह्मचर्यहानेरभावात्॥२७॥ मत्कुणं वर्णयति॥ य इति॥ रात्रिंचराणां मशकादीनां मध्येशेखर: अतिनिपुणत्वात्॥ द शाकारोवयव: आस्येमुखेयस्य॥ यथा रंध्रं शोष्यते॥ मशस्त: शाकारोवयव: आस्येमुखेयस्य॥ यथा रंध्रं शोष्यते॥

कोण: कोणपाली प्रशंसा वचनैश्चेति समास: साआश्रयो

॥४२॥

यस्य स्तंभकुड्यादीनां कोणेषुवसति वज्रेषुहीरेषु अबा
धितशक्तिः एतस्य रत्नेनहीरकाः स्फुटं तीति वज्रभस्म
करणे वैद्यकस्यछंं नरूधिरंविनायस्य आहारएवनास्ति
मध्वोश्वैत्रस्य योगेन समृद्धोभवति॥ रावणपक्षे॥ रात्रिचं
राः राक्षसाः दशमुखः कोणपाः राक्षसाः तेषां मालीपं
क्तिः तस्याः आश्रयो यस्य वज्रेण इंद्रायुधेन अबाधि
ताशक्तिर्यस्य मधुमद्यं अतएवयथारावणः सीताभि
संधानेन सकुटुंबो मृतः एव मयमपि शीतकालस्या
भिसंधानेसतीति॥५२८॥ मैथुनंवर्णयति॥ सततमिति॥
स्फुरतादैवतं बलिः एतन्नामा दैत्यः शुक्रः शुक्राचार्यः
स्फुरतं मैथुनं बलिनः बलवंतः शुक्रं रेतः तस्माद्बहु
व्यवायो नकर्तव्यः॥२९॥ स्त्रीणामिति॥अपरस्यअधः

205

स्थितिः रतिसमये ॥५३०॥ स्तनं वर्णयति ॥ पयोधरेति ॥
चंचलस्वभावः चांचली सा स्त्रीणां वस्त्रांतरे पयोधरोद्गमः
शीघ्रमेव भविष्यतीत्यस्य सूचिका यथा चंचला विद्युत् त
स्या इयं चांचली उपस्थितिः आकाशे मेघोद्गमस्य सूचि
का ॥३१॥ धाराधराणामिति ॥ स्पष्टं ॥३२॥ पयोधरेति ॥
पयोधरो मेघः स्तनश्च ॥ घनीभावः सांद्रता काठि[illegible]न्यंच
अंबरं नभः वस्त्रंच आश्लेषानक्षत्रं आलिंगनंच आश्ले
षानिर्गमे मेघाः विरलाः भवंति तथान्यत्र शैथिल्यं भव
ति ॥३३॥ पयोधरघनीभाव इति ॥ पूर्वार्धं सम ॥ हस्तनक्ष
त्रस्य करस्य च ॥३४॥ प्रौढां प्रति भर्तुर्नर्मोक्तिं वर्णयति ॥ स
द्वृत्तमिति ॥ सद्वृत्तं उत्तमचरित्रं वर्तुलंच ॥ यथा कथंचिद
पि यत्र स्पृष्टुं आदरो न भवति सच दूरादवलंबले सन्नि
कर्षं न भवति तद् देदं कुलः ॥ उत्तरं देवेन परमेश्वरेण

॥४३॥

206

भवताच जघन्यकर्मणि नीचकृत्ये कृते च योजितं तदनंतरं बालिशस्य अज्ञस्य बालस्यच संस्तवः परिच यः तस्मात्पातित्यं कथं नस्यात् तत्रच सति सर्वसंग च्छतएवेति ॥३५॥ स्तनाविति ॥ हृद्यो हृदिभावौ मनोहरौ च ॥५३६॥ वृद्धपुरुषस्य भार्यां वर्णयति ॥ पुरुषस्येति ॥ पु राणपुरुषः वृद्धः विष्णुश्च तस्य द्वितीयाभार्या भूदेवी च वसुमती द्रव्यवती पृथ्वीच वृद्धस्य स्त्री तस्य सर्व स्वं स्वाधीनं कृत्वा स्ते इति ॥३७॥ सर्वोत्तमस्येति ॥ स र्वोत्तमस्य गुणैः संपत्याच वृद्धस्य विष्णोश्च द्वितीयायो षित् भूः सा रसा पृथ्वी आढ्या धनिका किंच सार साढ्या कमलाढ्या कूर्मब्रह्मशिलारूढां नीलोत्पलकर द्वयामिति तद्ध्यानात् किंच सा रसाढ्या शृंगारेणाढ्या

विचाल्यमाना यद्दा तद्दा भुजंगराजस्य शेषस्य उत्तमांगे

शिरसि पतिता भुजंगाःजाराः तेषां राज्ञः श्रेष्ठस्य

उत्तमे अंगे पतति या यदुस्य द्वितीयाभार्या सा रसेन

आढ्या सती विचाल्यमानाचेत् व्यभिचारिणी भवति॥

॥३८॥ पुराण पुंस इति॥ कुनायकाःराजानः येकेपि

पुरूषा स्तैरपि एतादृशी या सा सर्वं सहत एव यातु

सती सा त्वन्यकृतनमर्दितनतरां सर्वं सहते तथानेयं

॥३९॥ परस्त्रीपराङ्मुखं वर्णयति॥ मामकमिति॥

किलं किंचितं रागभयलज्जादिगुंफः रते रभिव्यं

जकः भुजंगेनजारेण सर्पेणच भोगः रतिः सर्पदेह

श्च॥४०॥ जरां वर्णयति॥ ब्रवीमिति॥ यियासोः

निजधाम गंतु मिच्छोः शौरेः तु श्रीकृष्णस्य पादेपियया

जरया वेधः कृतः जरा नाम व्याधः सा आख्यायि
का भागवते स्प[illegible] स्पष्टैव॥ ५४९॥ कापा पक्षयेति॥
द्वेजरे शरीरनाशहेतू यथा राक्षस्या जरया जरासंध
स्य जन्मना द्विधाभूतशरीरस्य शरीरं दृढतरं संहितं
अन्या जरा तु नतथा दृढतर संधानयुतं करोति॥ ५४९॥
सु प्रत्यया दिति॥ यः बहुशः भव्या कल्याणकारिणी
आकृतिः यस्य तस्य हरे ध्याता स एव वैधः अजाद्या
त् अजोहं अद्वयोहं इत्याद्यात् सुप्रत्ययात् उत्त
मज्ञानात् जराकारं असारचितं तुच्छं कुर्यात् भायः
अपायः बहुशो भावेद्दस्यैने मुखस्थानीयत्वात् मुखं
व्याकरणं स्मृतमित्युक्तेः तस्याः व्याकृतेः व्याक
रणस्य ध्याता स्मर्ता वै व्याकरण इत्यर्थः स एव आ

प

रा

जाद्यात् स्क प्रत्ययात्॥ औजसादिरूपात् जॅका
रं जराशब्द संबंधिनं आकारं आवरणं आसारमि
तं कुर्यात् जराया जरसन्यतरस्यामिति सूत्रा
त्॥४३॥ इति संकीर्णं ॥ इं द्रोरिति॥ चंद्रस्य अ
भ्यंतरे यत्कृष्णं दृश्यते तद्विषये बहवो विवदंते
मम तु सिद्धांतः अनेन द्विजराजेन हृदये श्रीकृष्ण
एव प्रणिहितः तेन कारणेन यं द्वितीयायां दृश्यमा
नमात्रं जना नमंति नास्मै ग्रहाः द्रुह्यंति वि
धोर्नो रिपुरिति वचनात् सर्वग्रहानुकूल्येपि य
स्य बलमवश्यं अपेक्षते देवाश्च कृष्णपक्षे यमा
पीयानुष्टाः पुष्टाश्च भवंति वंशे च भगवदवतारः
श्रीकृष्णाख्यः गोकुलेनंदगृहे प्रसिद्धं एतादृक्

सौभाग्यमन्यथा कथं स्यादिति ॥ ५४४ ॥ ध्यात
व्यमिति ॥ अन्यत्र ग्रंथांतरे रामं प्रार्थयते ॥ ध्यात
व्यं इति स्पष्टं ॥ ४५ ॥ कवयरिति ॥ नकोरात् भ
यं प्राप्नुवंतं जनं श्रीकृष्णं विना को नु हरेत् कुर्या
त् ॥ नरकासुरेण बंदीकृतं स्त्रीजनं च कः कुर्या
त् विवहेदित्यर्थः तादृशः कृष्ण एवेत्यर्थः ॥ ४६ ॥
कतमो नामेति ॥ मृत्युः संसारः उदर्कः उत्तरफ
लं यस्य तादृशाद् घात् पापात् मुग्धजनं अवि
द्यांसं त्रातुं कृष्णं विनान्यो नास्ति यथा मरणप्र
दात् अघासुरात् मुग्धजनं गोपशिशुजनं प्रसि
द्धं ॥ ४७ ॥ यत्कृपेति ॥ स्पष्टं ॥ ५४८ ॥ ममनाथे

ति॥ प्रार्थितं स्पष्टं॥५४९॥ इयं स्वजननीमिति॥
स्वस्य आत्मनः द्रव्यस्य तदुपलक्षितप्रतिष्ठादे
श्च जननी माता उत्पादयित्री अलक्ष्मणः दरि
द्रः अन्यदीयां कालिदासबाणादीनां संबधि
नीं कस्यचित्महाढ्यस्य च पितृकुटुंबिनी माता
॥५५०॥ यस्येति स्पष्टं॥५५१॥ हृत्पुंडरीकांतर्संन्नि
विष्ट इति॥ स्पष्टं॥५२॥ शालि वाहनेति॥ स्पष्टं॥
॥इति श्रीमद्राजाधिराजरघुनंदनस्कंदरपदद्वंद्वारविंद
मकरंदमिलिंदायमानमानसेन शांडिल्यकुलतिल
कायमानेन पंतमहादेवनंदनेन गीतापराभिधान
वाराणसीगर्भसमुद्भवेन ब्राह्मण्याग्रगण्य [illegible] पद

॥७६॥

र

व्यारूढश्रीनिवासपंडितप्रतिनिधिधर्मपरिषत्
पुरुषप्रवरोज्वल्लेन पंतविठ्ठलेन विरचितःस्कन्धोद्ध
त्ला पवाभिध ग्रंथः समाप्तिमगमत्॥ श्रीमत्सीता
रामचंद्राभ्यां नमइति॥ श्रीराधामुकुंदःप्रसीदतु॥

॥छ॥ ॥छ॥ ॥छ॥

।।इतिश्रीसुश्लोकलाघवटीका।।
।।समाप्ता।।

७८

214.

[OrderDescription]
,CREATED=27.08.20 15:50
,TRANSFERRED=2020/08/27 at 16:25:54
,PAGES=214
,TYPE=STD
,NAME=S0003556
,Book Name=M-1544-SUSHLOK RAGHAV TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF

FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,